न्द्रियेष्वीक्षणमेवोक्तम् । कर्मेन्द्रियेषु भुजा एवोक्ताः । तेनैकैकेनैव पूर्णा ज्ञानशक्तिः क्रियाशक्तिश्च निरूपितेति ज्ञायते । एवं सति कर्मेन्द्रियाणि निरूपयन् यद्भगशब्दार्थरूपं ज्ञानं निरूपयति तेन जीवानामिव भगवतः कर्मेन्द्रियाणि न ज्ञानजनकानीति न, किन्तु स्वयं चिद्रूपाणि पूर्णज्ञानजनकानीति ज्ञापयति । चतुर्विधकार्यार्थमित्यादिना चतुर्विधक्रियाशक्ति विवरणम् । व्यूहकार्याण्येव चतुर्विधानि तानि । तेषां नियतकार्यत्वात् । भगवद्भुजानां क्रियाशक्तिरूपत्वेन सर्वेषां क्रियावतां मूलत्वात् पृथिव्यादिचतुर्णामिव भूतेषु क्रियावत्त्वात्तदाधिदैविकरूपत्वमपोऽप्याशयेन भूतत्वमुक्तम् । तेन लीलामध्यपातिनां तेषां प्रभुभुजरूपत्वमेव, न प्राकृतत्वमिति भावः । जरायुजस्वेदजाण्डजोद्भिज्जानि वा । तान्यप्युक्तरूपाणीति ज्ञेयम् । पुरुषस्य द्विभुजत्वमौत्सर्गिकमित्यत्र द्विगुणपुरुषत्वम् । एतस्यैव विवरणं, लौकिक इत्यादि । युद्धादिना जरासन्धादिमारणं लौकिकसदृशम् । अश्वत्थामास्त्रस्यैव चमूमारणं का युद्धापेक्षा स्यात् । अवस्थासाधनविरुद्धकार्यकरणं पूतनाशकटादिमारणमलौकिकम् । घातकार्यमिति । हननरक्षणयोरत्रैकदा करणं विरुद्धं, तथापि तत् कृतवान् । परीक्षितो लौकिकब्रह्मास्त्रस्य दाहनं, वंशजातस्य गर्भस्य रक्षणं, तन्मातुश्च । तत्राप्यनिवर्त्यब्रह्मास्त्रात् । एतदेव सङ्कर्षणरूपमपि । तथैव दृष्टान्तादिकमपि ज्ञेयम् । वेदोक्तमिति । कर्मब्रह्मविषयकमात्मपरमात्मविषयकं वा ज्ञानमित्यर्थः । भक्तिरपि सगुणा निर्गुणा च साधनफलरूपा वा । वैराग्यं हि सर्वदुःखनिवर्तकम् । भक्तदुःखनिवर्तनं तायुधैः । तेन तेषां वैराग्यरूपता । तेन भक्त्यैव शार्ङ्गनन्दकादिषु तद्भाव इति ज्ञायते । अत एव शाल्वादयोऽपि हताः । मधुसूदन इत्यादि । इतरौ या मधुसूदनो गदाचक्रे दक्षिणयोरब्जशङ्खौ वामयोर्धारयन् माधवो भवति । एवं सति गदाचक्रयोरब्जशङ्खयोश्च स्थितिमात्रसापर्ययेणात्र माधवत्वमपि । शङ्खाब्जे दक्षिणयोश्चक्रगदे वामयोर्धारयन्नारायणो भवति । तेन शङ्खाब्जयोश्चक्रगदयोश्चैकत्र स्थितिमात्रसापर्ययेण नारायणत्वम् । एवं त्रिव्यूहत्वे सङ्कर्षणप्रद्युम्नानिरुद्धरूपता च । शङ्खचक्रादिविपर्यासे, शङ्खगदे आदौ ययोस्ते शङ्खगदादिनी पद्मचक्रे उदायुधे ययोरिति तद्गुणसंविज्ञानो बहुव्रीहिः । शङ्खाब्जाभ्यां मारणासम्भवादायुधत्वं कथमित्याशङ्कायां तत्तात्पर्यमाहुः इन्द्रियेत्यादि । प्राणपोषितानीन्द्रियाणि हि कार्यसाधकानि । 'विन्नोऽसुग्नान्यनिःश्वसितस्य यस्य ध्वनिर्दीर्णदर्प' इति वाक्याच्छङ्खस्य तादृशसामर्थ्यरूपता । तत्रायं गारुडो, दर्पाभावे मृतप्रायो यतः । गतदर्पस्य चाटोपमर्दनानुनाशो भवति । प्रकृते च ब्रह्माण्डविग्रहो नारायण इति तदा सकाञ्जधारणेनैव यथा उपरिपतित्वा उपमर्दनं तथा भवतीति तथा । गदायां आधिदैविकप्राणात्मकत्वादधिभूतानुग्राह्यत्वमिति । तेजोरूपमन्तःकरणं, चक्रं च तथा । मुक्तिदासायां

चक्रेण मारयतीति तद्वतारतथैव भवन्ति। 'ये ये हताश्चक्रधरेणे'त्यवाक्यात्। स्वयं निर्लेप एव महाभूतैरेव मारयतीति तात्पर्येण पक्षान्तरमाहुः आकाशेत्यादि। शङ्खगदाद्यायुधमेतावतैव चरिताध्र्येऽप्युदायुधमितिकथनेनान्योपि भावः सूच्यत इति तमाहुः उदायुधानीति चेति। उदमुदकं तद्रूपाणीत्यर्थः। उदकत्वोक्तितात्पर्यमाहुः तत्रैवेति। गुरुपदार्थं हि तत् स्वस्मिन् पतितं मज्जयति। तदहङ्कारेणानमनात्सुरान् मावमयान् महाभूतान्येव पुनः प्रापयन्ति, न तु मुक्तिमित्यर्थः।

श्रीवत्स इत्यादि। अत्रैतावद्वाच्यम्। पुरुषोत्तमैकनिष्ठत्वेन तदसाधारणं लक्षणं श्रीर्भवति। तस्याश्चेतरागोचरत्वेन लक्ष्यज्ञानं कस्योपि न भविष्यतीति तत्प्रादुर्भावस्थानासाधारणधर्मं सर्वगोचरं कृत्वा स्वस्मिन् धारयति। तद्दर्शनेन तत्र श्रीस्थितिज्ञानेन पुरुषोत्तमत्वज्ञानं भवति। अस्य मुख्यत्वमुपपादयन्ति सर्वात्मकस्येति। 'पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया यस्यान्तःस्थानि भूतानि' इति भगवद्वाक्यात्, 'यः पृथिव्यां तिष्ठ'न्नित्यादिश्रुतिभ्यश्च जगत्तथा। 'परस्तस्मात्तु भावोऽन्योऽव्यक्तो व्यक्त सनातन' इत्युपक्रम्य, 'अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम्। यं प्राप्य न निवर्तन्ते तद्धाम परमं ममे'ति प्रभुवाक्याच्छ्रीव्रजजनमनोरथपूर्तये, 'दर्शयामास लोकं स्वं गोपानां तमसः परम्। सत्यं ज्ञानमनन्तं यद्ब्रह्मज्योतिः सनातनम्। यद्धि पश्यन्ति मुनयो गुणापाये समाहिता' इत्यादिवाक्यैः सर्ववेदप्रतिपाद्यत्वेनाप्यक्षरं ब्रह्म पुरुषोत्तमस्य लक्षणम्। चेष्टारूपत्वेन, 'अथ सर्वगुणोपेतः काल' इत्यादिना निरूपितो य आनन्दमयो लीलाकालः सोऽपि तथा। आदिपदाल्लीलाविशेषाश्च। तथाच सर्वात्मकत्वभगवत्त्वजगदादिलक्षणेषु ब्रह्म मुख्यं लक्षणम्। सर्ववेदप्रतिपाद्यत्वादाविर्भूतसच्चिदानन्दरूपत्वाज्ज्ञानिमुक्तिस्थानत्वात् पुरुषोत्तमगृहचरणात्मकत्वात्। अतः श्रीवत्सस्य लक्ष्मत्वमुक्तमन्यथेतरविशेषणवदिदमप्युक्तं स्यादिति भावः। अत्रोपपत्त्यन्तरमाहुः अत एवेति। जातिवेदाक्षरमह्माणि तदानन्दश्च सर्वशब्देन उच्यते। तदाधारभूतो भृगोर्देहः। तद्वतस्तस्य गतिर्भगवत्पर्यवसायिन्येवेति तथेत्यर्थः। किञ्च भगवत्तस्त्वगिन्द्रियाद् भृगोरुत्पत्तिः। तच्चेतरेन्द्रियेभ्यो विशिष्टमन्तर्बहिर्व्यापित्वात्तथा ज्ञानजनकत्वाच्च स्पर्शसुखाभिव्यक्तिहेतुत्वाद् भगवतः स्पर्शसुखाभिव्यक्तिहेतुः। श्रीस्तत आविर्भूतेत्याशयेनाहुः लक्ष्म्याश्चेत्यादि।

गलशोभीत्यत्र। सरस्वत्या ज्ञानशक्तिरूपत्वात्तथा कृतिः। अत्र विद्यादिपदानि त्यक्त्वा सरस्वतीपददानस्यायं भावः। सा हि वीणागानपरा, प्रभुश्च मुक्तोपसृप्य इति मुक्ताः सर्वे सङ्गीतविद्यया यथा प्रभुं सन्तोषयन्ति तदर्थमेव करणम्। एतेनैवंविधाना लीलास्थम-

१ लक्षणज्ञानं तस्यापि इति पाठः।

दत्तम् । अर्हस्य लोकसिद्धत्वेनापि तथा विशेषणमिति ज्ञेयम् । कुन्तलानां रसोद्दीपकत्वेन तेषु भक्तिप्रवर्तकत्वमपि सूच्यते । तान्येव पदानीति । कुन्तलानां भ्रमरतुल्यत्वेन तेषां षट्पदत्वेनैतेष्वेतान्येव तानीत्यर्थः । त्रयाणामपीति । वेदसांख्ययोगानामित्यर्थः । कुन्तलानां शास्त्राभिज्ञजीवत्वेन पूर्वमुक्तत्वात्तेषामनेकविधत्वे तज्ज्ञानप्रकारानेकविधत्वमेव प्रयोजकमिति कुन्तलानेकत्वोक्त्या तत्प्रयोजकमप्याक्षिप्तं भवतीत्यर्थः ।

उद्दामेत्यत्र । त्रयाणां कर्मत्वोक्तेरयं भावः । भूमावेव कर्ममार्ग इति तद्रूपकटचां भूषणत्वेन स्थितस्य कर्मत्वं युक्तम् । इतरयोः क्रियाशक्तौ प्रतिष्ठितत्वेनेति ।

कृष्णावतारेत्यत्र सम्यग्भ्रमो यस्येति । विविधपदार्थैर्महानुत्सवः कार्य इति
बुद्ध्या तत्र तत्र मनोधावनं भ्रमः । पुरःप्रकटे भगवत्यन्यत्रापि मनोधावन-
१०-३-११. स्यानुचितत्वात् परं तूत्सवरसतादृश एवेति भक्तिमार्गे स गुण एवेति
भगवच्छास्त्रेणापर्युदस्तः । ([1]वसुदेवदेवकीस्तुतितात्पर्यनिरूपणं द्वादशात्मेत्यादिभिः क्रियते । पूर्वं तमद्भुतमित्यादिना द्वादशधा प्रादुर्भाव उक्तः । अग्रे तद्रूपद्वाभ्यां वसुदेवदेवकीभ्यां ततो न्यूनाधिकभावेन निरूपणे विसंवादादन्यतराप्रामाण्यशङ्का स्यात्, तन्निरासः स्तुतिनिरूपितार्थाभ्यां भवतीति[2] ज्ञापयन्तीति द्वादशात्मेत्यादिना । [3]स्तुतिभ्यामिति पूर्ववद् द्वादशधैव निरूपितो हरिर्ज्ञेयः । तत्र प्रकारमाहुः त्रिधा च नवधेति । देवकीभिस्त्रिधा, वसुदेवैर्नवधेत्यर्थः । [4]स्तुत्या स्वरूपमाहुः [5]वैदिकोऽलौकिक उच्यत इत्यनेन । आद्यस्य नवधात्व इतरस्य च त्रिधात्व उपपत्तिमाहु यज्ञस्त्वित्यादिना । अग्निहोत्रदर्शपू[6]र्णमासादिरूपः पञ्चात्मकः । [7]चतुर्व्यूहात्मकश्चतुर्मूर्तिः षड्गुणैश्वर्यवान् साकारब्रह्मरूप उपास्यत्वेन तन्त्र उच्यते । तन्त्रपदेन भागवतशास्त्रमप्युच्यते । एतज्ज्ञापनायैव भगवत्पदम् । फलितमर्थमाहुः पञ्चात्मकश्चतुर्मूर्तिरिति । वेदे तन्त्रे चोपास्यत्वेनोक्तं रूपमिदमेवेत्यर्थः । ननु वैदिकत्वेनैव चारितार्थ्ये द्वितीयस्योक्तिः कुत इत्यत आहुः तन्त्रमिति । यथा वेदो भगवत्प्रापकः, तथा तन्त्रमपीति वेदतुल्यं तदित्यर्थः । तत्र त्रैवर्णिकानामेवाधिकारः, अत्र तु सर्वेषामिति मर्यादापुष्टिभेदेनोभयमपि भगवत्प्रापकम्, यतोऽतस्तथेति भावः । द्वितीयस्याः स्तुतेस्त्रिधात्वे हेतुमाहुः लौकिक इति । अत्र गुणशब्दः प्रकारवाची, न तु प्राकृतवाची । [8]'अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम' इति भगवद्वाची । 'अतोऽस्मि लोके वेदे च प्रथितः पुरु-

---

१. शोधपत्रमिदं श्रीमन्मथुरेशपुस्तकस्थम् । २. ज्ञापयन्ति मू. पा. ।
३. स्तुतिभ्यामपि मू. पा. । ४ स्तुत्योः मू. पा. । ५. वैदिको लौकिक मू. पा. ।
६. पौर्णमास मू. पा. । ७. चतुर्व्यूहात्मकश्चतुर्मूर्तिः मू. पा. ।
८. 'अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम' इति भगवद्वाचीति मूलपाठे नास्ति ।

षोत्तम' इति भगवद्वाक्याल्लोकेपि त स्वरूप प्रथित बाध्यम् । तच्चाधिदैविकादिरूप त्रिविधं स्मार्तमिति सा तथेत्यर्थः । लौकिकस्यैव हि वस्तुन [1]आधिदैविकादिरूपत्रितयं रूपमुच्यते । अत एव स्मृतौ परमात्मत्वेनैव भगवानुच्यते, आधिदैविकत्वात् । इदं स्तुतिव्याख्याने स्फुटीभविष्यति । उक्तार्थमनुवदन्ति सदेहाभावाय नवधेत्यादिना । पूर्वं वसुदेवेनैकेन श्लोकेन प्रार्थनं कृत, तेन दशश्लोका । त्रिरूपत्वोक्तिरेव मुख्येति त्रिधेत्युक्तम् । 'मर्त्यो मृत्युव्याले'ति 'विश्व यदेत'दिति च श्लोकद्वयं पर्यवसानतः स्तुतिरूपमिति चकारेण समुच्चितम् । [2]प्रतिपत्तिहेतुविरोधपरिहारयोरेव तत्र स्फुटं प्रतीते । फलितमर्थमाहुः शास्त्र इति । प्रतीयमानस्यैव शुद्धभगवद्रूपत्वमुभाभ्या तथेत्यर्थ । एव निरूपणस्यावश्यकत्वमाहुः बाधरूमिति । उभयोर्हेतुत्वाश्रुपत्वादिति ज्ञानं तस्मादित्यर्थ ।)

विदितोसीत्यत्र **यस्त्विव** यारभ्य **प्रयोगान्तम्** । अत्रेव ज्ञेयम् । असीति व्यवहारो युष्मच्छब्देनोपस्थित एव भवतीति स्थितावपि व्यवहारमात्रोक्तिर्या सा,

१० ३ १२ स तेन विनानुपपन्नस्तमाक्षिपतीत्यव्यलभ्यत्वाभिप्रायेणेति । अत एव, पिधेहीत्यादौ द्वारादिपदार्थस्यैवाध्याहारो, न तु पदस्यापि लाघवादिति भाष्य मन्यन्ते । प्रकृते त्वर्थस्य पुरःस्थत्वेन नाध्याहारापेक्षापि । वस्तुतस्त्वसिभवानिति समस्तं पदम् । तथाचासिशब्दयुक्तो भवानित्यर्थ । तदुक्तवं तेन व्यवहार्यमाणत्वम् । पूर्वोक्तपक्षे भवच्छब्दसंगत्यभावारुच्या पक्षान्तरमाहुः **अथवे**त्यादि । क्षराक्षरपुरुषोत्तमाः, आधिभौतिकादयो वा त्रय पुरुषा । असीति देहरूपेण सत्वेन प्रतीयमान उक्तः । भवानिति तदभिमानित्वेन अग्रिमेण परमात्मत्वेन प्रतीतिविषय उक्त । तेन श्रयुक्तसैन्धवघनदृष्टान्तन्यायोत्राभिप्रेत इति ज्ञायते ।

प्रकृतेः पर इत्यस्याग्रे **प्रत्यक्षदोषस्त्वि**त्यादि । शुद्धब्रह्मत्वेन पुरुषोत्तमत्वेन च वेदनं हि विदितोऽसीत्यनेन प्रतिज्ञातम । असि भवानितिव्यवहारश्च प्रत्यक्षविषय एव भवति । एवं सत्युक्तव्यवहारविषयस्यैव प्रभोरुक्तरूपत्वं सिध्यतीति तत्परिहार इत्यर्थः ।

ननु ज्ञातत्वे प्रामाणिके सत्युक्तदोषपरिहार । तच्च न वक्तुं शक्यम्, दोषत्वादित्यत आहु **ज्ञातत्वेति** । भवत्पुरुषपदाभ्या पूर्वं तयोक्तत्वादलौकिकचक्षुस्तत्सामर्थ्यरूपेणापि स्वयमेव हरिः प्रकटो जात इति स्वस्य ज्ञान यथा न विरोधि तथा वसुदेवज्ञानमपीत्यर्थः । 'अन्यदेव तद्विदितादथो अविदिता'दित्यादिश्रुतिरपि लौकिकयोस्तयोः सकाशादेव भेदमाह । अन्यथा वदद्व्याघात इति भाव । नन्वदृश्यत्वादिप्रतिपादकवेदाप्रतिपाद्यत्वाद

---

१ आधिदैविकादित्रितय मू. पा । २ प्रशक्ति मू पा ।
३ स्वज्ञानमिति पाठ ।

ब्रह्मत्वमपि न वक्तुं शक्यमित्यत आहुः विरुद्धा इति । यद्रूपं यदा दृश्यं तदेव तदैवादृश्यमपीतीन्द्रियसामर्थ्यलक्षणेनांशेन प्रभिच्छालक्षणेन तेन चोभयधर्मसिद्ध्या ब्रह्मत्वं न क्षतं भवतीत्यर्थः ।

स एव स्वप्रकृत्येत्यत्र आधिदैविकस्वभावेनेत्यादि । लीलौपयिकपदार्थाना-
१० ३ १४ मलौकिकत्वेन लौकिक्या प्रकृत्या न तत्सृष्टिः सम्भवतीति तथोक्तम् । अ-
न्यथा स्वपदानर्थक्यमिति भावः ।

त्वयीश्वर इत्यत्र, अविरोधे ईश्वरत्वब्रह्मत्वलक्षणं हेतुद्वयमुक्तं तृतीये पादे । च-
तुर्थेऽपि द्वितीयकोट्युपस्थितिर्न प्रामाणिकयतोऽपि न विरोध इति हेत्व-
१० ३ १९ न्तरमुक्तमिति, किञ्चेत्यादिना व्याख्यातम् । अन्यथा त्वविरोधः पूर्वेणोक्त
एवेत्यग्रे तु उक्त्योपचारोक्तिः शशशृङ्गभिया पलायनमनुहरेत् । वस्तुतस्तु, ननु साङ्ख्यादिषु गुणानामेव कर्तृत्वमुच्यते, इत्यत आह त्वदाश्रयत्वादिति । त्वमेवाश्रयो येषां तादृशत्वाद् गुणानां त्वन्निष्ठं कर्तृत्वं तेषूपचर्यत इत्यर्थोऽभिप्रेत इति ज्ञेयम् ।

देवकीस्तुतितात्पर्योक्तौ, इदानीं मारण इत्यादि । पूर्वे भगवतैव तु मारणसम्भ-
वेऽपि पूर्वमुद्यतायुधेन बाला मारिता इत्यधुनापि तादृशतद्दर्शनं पूर्वज्ञानसदृशम् ।
१० ३ २३ तथाच तु मारणैव तथेत्यर्थः । अन्यथेति । जन्याज्ञानाभावे प्राणस्थितिरेव स्यादित्यर्थः । न सिध्येदिति पाठे प्रथमः पक्षो रक्षा ।

१० ३ २५ व्यक्तेऽव्यक्तमित्यत्र पुरुषोत्तमाभिन्न इति । पुरुषोत्तमचरणात्मक इत्यर्थः ।

त्वत्पदाब्जं प्राप्येत्यत्र, ननूक्तपलायनविशिष्टस्य साक्षाद्भगवच्चरणप्राप्तिर्न सम्भ-
१० ३ २७ वत्यतोऽनुपपन्नमिदमित्याशङ्क्य तत्तात्पर्यमाहुः सत्सङ्गो भागवत चेत्यादिना ।

स त्वं घोरादित्यत्र, इदानीं मारणे चेत्यादि । रक्षाप्रार्थनेति शेषः । अ-
स्मिन् पक्षे रूपानुपसंहारातिरिक्तबाधकाभावात्तत्र रूपं वा यत्र स्थेयमिति भावः ।
१० ३ २८ एतदेवोक्तम्, अनुपसंहार इत्यादिना । अन्यतरेति । इदानीमेव मारणं लोके नैतद्रूपदर्शनमित्येतयोरन्यतरस्य तथा बाध इत्यर्थः । इदानीममारणं यत्र गमनं च मध्यमः पक्षः । तत्र सत्यपि यदि समभारयिष्यैवा यत्र गतिर्भवति तदा स्वतस्तन्मारणान्निवृत्तिर्भवतीति, तथापि दोषानिवृत्तिरित्याहुः मध्यमपक्षे स्वत इत्यादिना । तेन जन्याज्ञानस्यावश्यकत्वमुक्तं भवति ।

शङ्खचक्रेत्यत्र पद्मपीति । केचिद्देवा अपि चतुर्भुजा भवन्तीति तादृशे रूपे दे-
वानां नालौकिकत्वेन भानम् । इतरेषां तु भवतीति तथा । तादृशमपीति ।
१० ३ ३० उपसंहृतालौकिकप्रभं चतुर्भुजाकारमात्रमपीत्यर्थः । रूपं मदमित्यनेन

कंसादीनामदर्शनं प्रार्थितम । अत एव, मामदृश्यान्विदुरिम । अनेन तु तद्दर्शनेऽपि मनुष्यमात्रस्य तथा दर्शनं नाभूदितिमिति दर्शयन् प्रार्थितोऽतो नान्यतरवैयर्थ्यं शङ्कनीयम् । किञ्च, यद्यप्याद्येनैव द्वितीयचारितार्थ्यं भवति, तथापि रूपपदमात्रं ध्यानधिष्ण्यपदं च अथवा सर्वेषां तिरोधानं हरिर्मा करोत्विति विशेषप्रार्थनं द्वितीय कृतमिति ज्ञेयम् ।

त्वमेवेत्यत्र, भगवदुक्तवाक्यस्याताः पर्यमाहुः चतुर्दशेति । पूर्णब्रह्मणो देवकी-

१० ३ ३२ पुत्रत्वे न प्रमाणमिदमिति शङ्कामात्रस्य सर्वा अपि विधा अत्र प्रमाणानीति ज्ञापनाय तत्समानसंख्यावर्षैर्भगवतोक्तमित्यर्थः । प्रमाणस्य भावः प्रामाण्यं प्रमाणत्वमिति यावत् । तदर्थमित्यर्थः । नच संख्याया अपि तात्पर्यवत्त्वे प्रमाणाभाव इति वाच्यम् । श्रुतिसिद्धत्वात् । तथा हि । 'वैश्वानरं द्वादशकपालं निर्वपेत्, पुत्रे जाते यदष्टाकपालो भवति, गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति, यन्नवकपालस्त्रिवृतैवास्मिंस्तेजो दधाति, यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति, यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति, यद्द्वादशकपालो जगत्यैवास्मिन् पशून् दधाति' इत्यत्र कपालेषु द्वादशसंख्याविधानतात्पर्यं तदवयवभूतसंख्याफलेनैव या निरूपितम् । तत्संख्यायास्तत्तत्फलसाधकत्वेनापि तत्तत्फलसंख्यासजातीयत्वमेव प्रयोजकमिति ज्ञेयम् । 'अष्टाक्षरा गायत्री' तेजस्त्रिवृत्, दशाक्षरा विराडन्नं विराट्, एकादशाक्षरा त्रिष्टुप्, द्वादशाक्षरा जगती, जागताः पशवः' इतिश्रुतिभ्यः । ननु सकृत्पुत्रत्वेऽपि वरवाक्यसत्यत्वं वाक्यं तथात्वं कुत इत्यत आहुः त्रिगुणमित्यादि । लौकिकमेकगुणं, द्विगुणं वैदिकं, भगवदीयं त्रिगुणमतः सर्वाधिकमिदमुक्तमिहैव फलतीति चेत्तदा सत्यं भवति । वैदिकं तु जन्मान्तरेऽपि फलतीति तथा । भगवदुक्तं त्वामोक्षं यावन्ति जन्मानि तेषु सर्वेष्वेव फलतीत्येतदेव त्रिगुणत्वादिकं तेषु ।

अजुष्टग्राम्येत्यत्र । ननु प्रीतिसेवनार्थत्वाज्जुषेरनयोः प्रीतिमत्त्वादजुष्टत्वं[*] कथमि-

तिचेत् । सत्यम् । तथापि द्वितीयमर्थमादाय तथोक्तमित्याहुः सेवा न कृ-

१० ३ ३९ तेतीति । न वजुष्टत्वं[४]ऽनपत्यत्व प्राप्तमेवेति कथनं तस्य किंप्रयोजनकमित्याशङ्क्य तत्तात्पर्यमाहुः वैदिकेनापीति । अलौकिकप्रकारकतन्निषेधार्थकं तदित्यर्थः । अजुष्टत्यादिविशेषणतात्पर्याणि रागस्येत्यादिना मर्मणोक्तानि । ननु मोक्षाधिकविवक्षितलीलाऽमृताब्धिफलके मोक्षावरणपूर्वकहरिसदृशपुत्रवरणे मायामोहस्य हेतुत्वोक्तिर्भक्तिमार्गविरुद्धा, मोक्षस्य चैवमाधिक्यं भवेदित्यत आहुः इयं विशेषमादेत्यादि । तर्हि मदनुग्रहात्तत्र यत्नाथ इति यत्तु युक्तं, न त्वेवमिति चेद्, न । अनवबोधात् । प्रकटे भगवति

* तद्दर्शने इत्यपि पाठः । परं सोऽपपाठ एव । २ गायत्री । मू. पा. ।
३ जुष्टत्वे मू. पा. । ४ जुष्टत्वे मू. पा. ।

ज्ञानशक्तेरपि प्रकटत्वेऽपि ब्रह्मत्वेन भगवत्त्वादिना च ज्ञानाभावो यः स न मोहमृते । तथा ज्ञानं च लीलारसविरोधीति न तथा ज्ञापनम् । नन्वयमप्यनुग्रहादेवेतिचेन्ननु मोहोऽप्यनुग्रहादेवेति तुल्यचर्चा । तथाप्येवंविधेऽर्थे मोहोक्तिः कथं भक्तमनोरमा भवेत् । इत्थम् । अचिन्त्यानन्तशक्तेर्भगवतो नियतकार्या हि ताः सर्वा लीला अप्यनेकविधाः । एवं सति यान्तरङ्गलीलायामेवाधिकृता सा तल्लीलास्थभक्तानां मध्ये यस्मिन् यादृशी लीला प्रभोश्चिकीर्षिता तस्यैँस्तदुपयोगिपदार्थेष्वासक्तिं तदतिरिक्तविस्मृतिं च करोतीत्येतन्मात्रसाधर्म्येणैतच्छक्तिकार्येपि मोहत्वोक्तिः । प्रकृते प्रभौ सर्वशक्तिप्राकट्येऽपि स्वानुरूपातिरिक्तज्ञानाद्यभावात् प्रमाणमार्गात् प्रमेयमार्गोऽतिविलक्षणो बलिष्ठश्चेति ज्ञापनाय च । अत एव, 'न न्यवर्तन्त मोहिता' इति वक्ष्यते । न हि तत्रामोह उत्तम इति वक्तुं शक्यम् । निवृत्तिहेतुत्वात् । यथा यथैतन्मोहाधिक्यं तथा तथा पुष्टिमार्गे भावप्राचुर्यमिति ज्ञेयम् । अत एव गोविन्दापहृतात्मत्वेनैवानिवृत्तिसम्भवेऽपि मोहिता इत्युक्तम् । अत एव भगवन्मायावाचकपदयोरसमासः । दास्यभावात् पितृत्वादिभावस्य न्यूनत्वात् । यद्वा, 'समो मशकेने'ति श्रुतेर्भगवत सर्वसम्बन्धेपि भगवत्समत्वं नान्यस्यास्तीति तादृक्पुत्रवरणं मोहकार्यमिति तथोक्तिः । वस्तुतस्तु 'अपवर्गं न वयाथे' इत्येतावतैव चारितार्थ्येपि 'म' इति यदुक्तं तेन पुरुषोत्तमसम्बन्धी भक्तिमार्गीयो दास्यरूपो योऽपवर्गः स उच्यते । तस्य सर्वाधिकत्वात्तदवरणं मोहादेवेति तथा । ननु तदवरणोक्तिप्रयोजनं न पश्यामः । तया विनापि प्रवृत्तार्थोपपत्तेः । उच्यते । भगवद्वचनैरुक्तप्रकारकस्वरूपदर्शनेन च सर्वार्थतत्त्वज्ञानमभूदित्येवम्भूतास्मत्क्लेशेनाविर्भूतो भगवान् दास्यमेव कुतो न दत्तवानित्याशङ्काभावायैतदुक्तम् । अत्राय भाव । कामदित्सयेतिवचनान्नियतेच्छयैवाविर्भाव इति भवदकामित स्वतो न देयम् । अपवर्गो च भवतोः कामो नाभूदिति तथेति ज्ञापयितु तदुक्ति । तथापि परमकृपालुरेवं कुत कृतवानिति शङ्का तु, एवं सति यान्तरङ्गेत्यादिना प्रागेव निरस्ता । एतेनैव कामदित्सयेति वाक्यादेवाकामितादानस्य प्राप्तेः कामाभावस्य च स्वतः सिद्धत्वात्तदनुवाद किमर्थ इत्याशङ्कापि निरस्ता ज्ञेया । कामाभावहेतोर्मोहस्यापि निरूपणात् । अन्यथा मोहनमेव कुतः कृतवानिति शङ्का [1]तिष्ठेदेवेति । किञ्च, 'स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिन' इति वाक्यान्निरयतुल्यत्व यस्मिन् भगवत्परा मन्यन्ते तस्यापवर्गस्यावरणं भक्तानां मायामोहकार्यमिति कथं वक्तुं शक्यम्, अतो यथोक्त एवार्थो ज्ञेय ।

युवां मामित्यत्र, यदि भवद्भ्यामत्वेन ज्ञानं नोच्येत, किन्तु स्वातन्त्र्येण, तदा यथाकथञ्चित् स्नेहमात्रेण निरोधपदार्थमिद्धेरस्मिन् स्कन्धे ज्ञानमुच्यमानमे-
१० ३-५५. तदर्थोऽसङ्गत्यात्र प्रवेशमलभमानं वाक्यभेदापादकं भवेदित्याहुः अन्यथा बोधांश इत्यादि ।

१. तिष्ठेतैव मू पा. ।

इत्युक्त्वासीद्धरिस्तूष्णीमित्यस्य विवरणे, अत्र आत्मपदेन इदमाकूतम् । य-
थात्मा अविकृतो नित्यः शुद्धः तद्रूपस्तथैव मायायुक्तगुणविशिष्टा । अत एव
१०·३ ४६. 'तादृशगुणविशिष्टत्वं तस्याः प्रयोजिका, नासत्पदार्थस्य । संसारहेतुभूता माया
यथा जीवस्य स्वरूपं विस्मारयित्वा प्रापञ्चिकविषयासक्तिं जनयत्येवमियमपि भक्तानां स्वस्व-
रूपविस्मृतिं भगवदासक्तिं च जनयतीति येनाथद्धर्मसाम्येनास्यामपि मायाशब्दप्रयोगः । वस्तुतस्तु
यथाऽन्ये लीलोपयोगिनो गोपीगोपादय आनन्दरूपा एवमियमपीति ज्ञापनायात्मपदम् ।
अन्यथा पुरुषोत्तमस्वरूपभगवत्पदाभ्यामेवान्तर्भावेन मायाया भगवदीयत्वप्राप्तेरात्मपदं व्यर्थं
स्यात् । एवं सति, 'प्रकाशाश्रयवद्वा तेजस्त्वा'दिति न्यायेन भगवद्रूपत्वादत्र कर्मधारयो-
ऽप्यभिप्रेत इति ध्येयम् । तथाचेदं पद सर्वत्रानुसन्धेयं । तथाहि । अत्र लीलार्थं भगवता
तौ पितृत्वेनाङ्गीकृताविति भगवत्स्वरूपैव तयोस्तथाविर्भावः । अन्यथा निषेकजननाद्यभावेन
तयोस्तथात्वमुच्यमानं बाधितं स्यात् । एतदेवाह आत्ममायया पित्रोरिति । ननु 'एतद्वां
दर्शितं रूप'मिति मायया पूर्वस्मरणमेव भगवदिच्छया उक्तत्वात्, 'नान्यथा मद्भवं
ज्ञान'मिति वाक्यस्वारस्यादन्यस्यैवैतत्स्वरूपदर्शनं कथमेतयोरत आह आत्ममाया-
यया सम्पश्यतो'रिति । एतेन चक्षुरसामर्थ्येनादर्शनं सूचितम् । अतिशयेनोपक्रान्तका-
र्योपयोगित्वं हि मायात्वम् । तेन पूर्वोक्तत्वेन ज्ञानलीलोपयोगिमायाकरणकदर्शने
सम्यक्त्वं स्वरूपेणापि दर्शनं ध्येयम् । तयैव लीलायाः करिष्यमाणत्वात्, पित्रोरितिव-
चनात् । यद्वा, लौकिकत्वं सवैव लोकैरपवर्तितमिति दर्शने लीलोपयोगिमायाकरणत्वनिरू-
पणेन पितृत्वेनैव तत्र पुत्रत्वं प्राप्तमेव । तथ न केवलं, किन्त्वीश्वरत्वानुसन्धानसहि-
तमिति तदेव सम्यक्त्वम् । 'युवां मां पुत्रभावेन ब्रह्मभावेन चे'ति भगवद्वचनात् । भगवो-
त्स्वरूपमायाकरणदर्शने तदिच्छाविषयत्वमेव सम्यक्त्वम् । तथाच भगवन्मायया लीलानिरो-
धित्वेन तदीयत्वं स्वस्माद्युत इदमेव ज्ञानं सम्यग्दर्शनम् । एवं सति तथा पश्यतोस्तयोः पर-
मात्मनः शिशुत्वमेवेति तद्दर्शनप्रकारमुक्तम् । तस्मात् भगवान् षड्गुणसम्पन्नः परमकाष्ठा-

तच्छ्लोकोक्तरूपस्यैव, नचान्तरित्यादिना । शुद्धब्रह्मत्वमग्रे श्रुत्वैनोक्तमिति न काचिच्छङ्कात्र । लीलाया निरोधार्थत्वाद् यथैव [1]'सम्भवति तथैव करोती'ति न प्राकृतानुकरणलीलाया काचिन्न्यूनता । प्रत्युत भक्तार्थं[2] एवमपि करोतीत्यद्भुतमाहात्म्यस्यापकमित्येतत्सर्वं हृदि कृत्वा स्वस्यैव सर्वभवनसामर्थ्येन तथा कृतवानित्याद्युक्तमिति ज्ञेयम् । अत एव 'बभूव प्राकृतं यथे'ति प्राकृतदृष्टान्त उक्तोऽग्रे । अथवा [3]शेषे इदं सूत्रं शेषाधिकारकाण्प्रत्ययान्तोऽत्र प्रकृतिशब्दः । तेन यथा चक्षुषा ग्राह्यं रूपं चाक्षुषमित्यादिशब्दास्तथायमपीति प्रकृत्या ग्राह्यः प्राकृत इत्यर्थः सम्पद्यते । लौकिकालौकिकभेदेन हि द्विविधा जीवाः । तेषां प्रकृतिरपि तथा । तथाच, 'मल्लानामशनि'रितिश्लोकोक्तरीतिवदलौकिकप्रकृतिभिरलौकिकत्वेन ग्राह्यो, लौकिकप्रकृतिभिर्लौकिकत्वेनेत्येतादृशो, वस्तुतस्त्वलौकिक एव शिशुर्बभूवेत्यर्थः सम्पद्यते । अत्र लौकिकव्यवहारोपयोगि ज्ञानं लौकिकं, तद्वन्तस्तथा । शास्त्रीयं ज्ञानमलौकिकम्, तद्वन्तस्तथेत्युच्यन्ते । तेन नन्दादीनां लौकिकत्वेन भानेपि लीलाया अलौकिकत्वात्तन्मध्यपातित्वेन तज्ज्ञानादीनां न लौकिकत्वम् । तेषां पुत्रत्वादित्वेन ज्ञानं शास्त्रेणानूद्यते परं, न तु विधीयत इति [4]शास्त्ररीतिमपेक्ष्य लौकिकत्वमुच्यते । नैतावता काचिन्न्यूनतात्र । लीलात्वेनालौकिकत्वमुक्तमेव । यद्वा, प्रथमस्कन्धे भीष्मोक्तौ, 'प्रकृतिमगन् किल यस्य गोपवध्व' इत्यत्रेवात्रापि प्रकृतिशब्दो भगवत्स्वरूपवाची । तथाच पूर्ववत् प्रकृत्या स्वरूपेणैव [5]ग्राह्यः । तथा, 'न तत्र सूर्यो भाती'त्यादिश्रुतिभिः, 'नाहं वेदै'रित्यादिस्मृतिभिश्चेतरसाधननिषेधाच्छ्रुत्यन्तरे च, 'नायमात्मा प्रवचनेन लभ्य' इत्यादिनेतरसाधननिषेधपूर्वकं, 'यमेवैष वृणुते तेन लभ्य' इत्यादिना भगवतैव भगवाँल्लभ्य इति निरूप्यते । [6]तथाचैतादृशशुद्धब्रह्मरूपो लोकवेदप्रसिद्धः पुरुषोत्तमः शिशुर्बभूवेत्यर्थः । तयोः सम्पश्यतोरेव तथाकरणे उपपत्तिमाहुः लौकिकज्ञानेत्यादिना । सामर्थ्यस्य सामर्थ्यप्रकटनस्येत्यर्थः । इदमत्राकूतम् । अनेनैव रूपेणाधुनैव कंसं मारयित्वा सर्वसमाधानं कर्तुं सामर्थ्ये सत्यपि यद्रूपान्तरप्रकटनं तत् 'समुद्विजे भवद्धेतोरधीरधी'रित्यादिवाक्यैर्लौकिकरीत्यैव स्नेहातिशयो ज्ञायते[7] । येन भगवतः कंसाभिमुखत्वमात्रेपि प्राणापगमो भवेत् । लोकविद्वेषभिया रूपोपसंहारप्रार्थनेनापि लौकिकरीत्यैव स ज्ञाप्यते मातुः । पितुस्तु पूर्णमाहात्म्यज्ञानवत्त्वेनोक्तशङ्काभावेप्यनेनैव रूपेण अधुनैव कंसमारणे भक्तदुःखनिवृत्तौ सत्यां, स्थितौ प्रयोजनाभावादस्माकं पुनर्दर्शनं न भविष्यति चेन्न प्राणस्थितिर्भविष्यती'त्यभिप्रायेण तदवृत्तान्तकथनादेतद्रूपोपसंहारोऽन्यत्रा-

१ स भवति मू. पा । २ भक्तार्थं मू. पा । ३ शेषे इदं सूत्रमिति मूले टिप्पणम् । ४ शास्त्रीय मू. पा । ५ ग्राह्य तथा । मू पा । ६ तथा चैतादृश मू पा ।
७ ज्ञाप्यते मू पा ।

धुना गमनमभिप्रेतमिति ज्ञायते । अन्यथा माहात्म्यज्ञानवत्त्वेन सर्वज्ञतामपि प्रभोर्जानातीति न तन्निवेदयेत् । तथाच तदा तद्दर्शनसचोक्त्या तज्ज्ञानस्योक्तरूपस्य हेतुत्वं सूच्यत इति युक्तं तथात्वमिति ।

ततश्च शौरिरित्यत्र । सर्वमोहनस्वभावायास्तस्या आविर्भावे वसुदेवे तथात्वं कुतो नेत्याशङ्क्य तन्निवारणाय, भगवत्प्रचोदित इतिपदतात्पर्यमाहुः साधार-
१०-३-४७. णमोहस्येति । भगवता गोकुले स्वनयनार्थं ततः कन्यायाश्चानयनार्थं स प्रेरित इत्येतावति कार्ये भगवज्ज्ञानशक्त्यैव व्याप्त इति योगमायाजनितसर्वसाधारणमोहस्य निवर्तकमुक्तरूपं ज्ञानमिति तथेत्यर्थः । यथान्यः कश्चिच्चौर्येण गच्छन् पद्भ्यां शनैश्च गच्छति स्वचातुर्येण, तथैव वसुदेवोपीति ज्ञाने साधारणत्वम् । अन्यथा गोपाला माण्डीरमित्यायमपि गोकुलं प्रापितः स्यात् । यद्वा, भगवद्विषयकज्ञानतारतम्येन मोहापगमतारतम्यमिति भगवति लोकसाधारणं ज्ञानमधुनास्यास्तीति तादृङ्मोहोऽप्यपगत इति तथेत्यर्थः । तावान् यावोपि बन्धो निवर्तत इत्याहुः कपाटोद्घाटनं चेति । तदा देवकी'त्यादि । दर्शनेन हि मोहाभाव । समानकालत्वे जन्मनो दर्शनेक्षणे मोह एव भवेदित्यर्थ. ।

इति तृतीयाध्यायः ।

चतुर्थाध्यायोक्तिसन्दर्भे, अनिमित्त[2] इति । भक्तदुःखाभावादित्यर्थः । ज्ञापने इति । मायाकृतरोदनेन स्वज्ञापनम् । ततो गृहपालकृतबालजन्मज्ञापनं
१०४ च कर्मे । एते उभे अपि तथेत्यर्थः । ततोपीति । एतदुभयज्ञापनानन्तरं, 'यत्र क्व वा जात' इति मायाकृतं भगवज्जन्मज्ञापन, कंसकृतज्ञापनं च मन्त्रिषु । एते उभे अपि दुःखसुखदे इत्यर्थः । न चान्यथेति । मायामोहं विनेत्यर्थः । ननु धर्मस्थापनहेतोर्भगवदवतारस्य तन्नाशहेतुत्व कथमुच्यते । 'जातः खलु तवान्तकृद, यत्र क्व वे'ति वाक्यश्रवणेनैवानिर्दशान्निर्दशाश्चेत्यादिमन्त्रिणस्य जातत्वादित्यत आहुः तामसप्रभुक इति । तामसाश्च त इति । तद्गताः पश्वादय इत्यर्थ । एवमपि कण्टकन्यायेन धर्मप्रतिपक्षदूरीकरणं युक्तमिति भावः । पश्चादिति । तमःकार्यनिवृत्तेः पश्चाज्जातो धर्मस्तथेत्यर्थः ।

भुवि भौमानी यत्र । ननु 'भुवि भौमानि यथा यान्त्यपयान्ति तथात्मा न याति नापयाती'त्येतावतैव वाच्योऽर्थः सम्पद्यत इत्यन्यानि पदानि व्यर्थानि । किञ्च,
१०४१९. यथा भूर्न विक्रियत इति द्वितीयो दृष्टान्तो बाधितः । भौमानां भूविकारत्वादित्यरुच्या पक्षान्तरमाहुः भुवि भौमानि भित्यादीनी यादि । भुवि भौमानि भित्या-

१ दर्शनक्षणे इति पाठ· मूलस्थः । प्रथमाहते 'क्षणे लक्षणो वे'ति टिप्पण निरर्थकम् ।

२. अनिमित्तत मू. पा. ।

दीनि यथा यान्त्यपयान्ति च । भूतान्यश्वादीनि च यान्त्यपयान्ति । आत्मा त्वेतेषु भूतेषु विद्यमान एव न तथा । न याति नापयातीत्यर्थः । एतेन भूतानीतिपदस्यात्मनि सम्बन्धे प्रकार उक्तः । यद्यप्येवमपि भूतपदमेतेष्वित्यादिपदानि च न सार्थकानि भवन्ति, तथापि तेषु विद्यमानस्यापि तद्धर्मासंबन्धकथनात्तथात्वम् । अन्यथैतदर्थाप्राप्तेः । **दृष्टान्त एवेति** । दृष्टान्तनिरूपणवाक्ये भूतपदस्यापि प्रवेश उक्त इत्यर्थः । अतः परं, यथा भूरिति दृष्टान्तं विवृण्वन्ति **यथा वह्निरि**त्यादिना । भौमानि यदा विक्रियन्ते तदा तेभ्यो बहिः स्थिता स्थूलं भूर्न विक्रियते, तथैतेष्वन्तःस्थित आत्मापि तथा । एवं सति[1] तथैतेष्वित्यस्यावृत्तिः कार्या । तदेतदुक्तं, **तथैतेष्विति भिन्नवाक्य**मित्यनेन । अस्मिन्नेव पक्षे, एतेष्वित्या दिपदानि प्रकारान्तरेण व्याकुर्वन्ति **एतेषु मनुष्यदेहेष्वपी**त्यादिना । यथा बहिः स्थिता भूर्मनुष्यदेहेषूत्पद्यमानेषु न विक्रियते तथात्मापीत्यर्थः । अग्रे तूक्तेऽर्थे प्रमाणमुक्तमेते ष्वित्यादिना । अथ प्रकारान्तरेणार्थमाहु **वर्षाकाले**त्यादिना । एतेषु तृणादिषूत्पद्यमानेषु यथा भूर्विक्रियते, न तथा तदन्तर्गत आत्मेत्यर्थः । व्यतिरेकेऽत्र दृष्टान्तः । 'यः पृथिव्यां तिष्ठन् पृथिवीमन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीर'मिति श्रुतेः पृथिव्यन्तर्गतोऽभिमान्या त्मास्तीति मन्तव्यम् । विपक्षे बाधकमाहुः **अन्यथेति** । एकतृणरूपेण एकस्यात्मनो विकृतौ सत्यां निरवयवत्वेनांशभेदस्य वक्तुमशक्यत्वाद् द्वितीयादिषु तेषु भिन्नो भिन्न आत्माङ्गीकार्यः स्यादित्येकस्मिन् पृथिवीलक्षणशरीरेऽनन्ता आत्मानः कल्पनीयाः स्युरित्यर्थः । **अधिष्ठात्र्य इति** । त्वगादिगोलकेषु लोमादीनामिन्द्रियाणामोषध्यादयो देवता शरीराभिमान्यात्मनः सकाशाद् भिन्ना इत्यर्थः । इति श्रीजन्मप्रकरणश्रीटिप्पणी समाप्ता ।

इति चतुर्थाध्यायः ।

तामसप्रकरणे प्रमाणप्रकरणम् ।

पञ्चमाध्याये प्रकरणार्थसन्दर्भे, स्वभावस्येति । भक्तस्वभावानुसरणे भगवतः परमदयालुत्वं भक्तिमार्गोत्कर्षश्च सिध्यति । तदन्यथाकरणे क्लिष्टकर्मत्वं
१०५० स्यादनेकविधत्वं रसात्मता च लीलाया न स्यादिति भावः । सात्त्विकं विहायादावेव तामसप्रकरणनिरूपणस्य तामसत्वेनोक्तौ च हेतुमाहुः **लौकिकं तामस इति** । इदमत्राकूतम् । पुरुषोत्तमस्वरूपमेव फलं, नेतरदिति हि भक्तिमार्गे मुख्यः सिद्धान्तः, तत्सम्बन्धादेव अन्यत्र फलोक्तिः । एवं सत्यत्र स्वभावान्यथात्वाभावेन सात्त्विकानां ज्ञानादिविहितमार्गरुच्या राजसानां च विशेषतो लौकिकालौकिककर्माभ्यासङ्गेन स्वरू

---

[1] सति न मू. पा. ।

पविस्मृतिसम्भवेन सम्यग्निरोधासिद्धिः, तामसानां तु[1] मौढ्यात् यत्राग्रहः पतति तत्र स न गच्छति कथञ्चनेति लोके दृश्यते । व्रजवासिनां च भगवत्स्वरूपविषयकः स्नेहस्तादृशो जातो येन स्वरूपातिरिक्तस्य भगवदुक्तस्यापि धर्मस्यानङ्गीकारोभूत्तथैवाप्रेतनज्ञानस्यापि । तेन सर्वात्मना निरोध एतेष्वेव फलित इत्येतद्धर्मसाम्येन पुष्टिमार्गस्य मर्यादातो विपरीता गतिरिति ज्ञापनाय च तामसत्वं प्रकरणस्योच्यते । वस्तुतस्तु निर्गुणमेव । 'तस्मान्मद्भक्तियुक्तस्ये'त्यारभ्य 'न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहे'ति भगवद्वाक्या'त्स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिन' इति वाक्यात्तत्साध्यमोक्षस्यापि नरकतुल्यत्वेन गणना, अतोपि भक्तिमार्गाद् ज्ञानमार्गस्य हीनत्वमिति भगवदेकनिष्ठविशुद्धभाववतां सर्वाधिकत्वं शास्त्रसिद्धमिति दिक् । एतदेव लौकिकत्वं[2] तामसे मुख्यमितिपदेनोच्यते । व्यापकत्वेनात्मत्वेनान्तर्हृदि हरिरस्त्येवेति श्रवणेपि बहिर्लोके प्रकटं यद्रूपं तदेवोक्तरीत्या मुख्यमत्र, नान्तरात्मादिरूपमित्यर्थः । मर्यादामार्गतो वैलक्षण्यात् स्त्रियोऽत्र मुख्या इति ज्ञापयितुं तत्रापि मर्यादायां यो मुक्तिप्रतिबन्धकत्वेन सम्मतः काम. स एवात्र भगवत्प्रापक इति च ज्ञापयितुं काम एवान्तःफलं यस्यास्तादृशी सेत्यर्थः । अत्रासम्भावितत्वभानं न कार्यम्, यत एतादृश्येव कृतिरग्रे स्फुटा निरूपयिष्यत इत्यर्थः । किञ्च, मर्यादायां विहितभक्त्या भगवदाविर्भावः, अत्र तु कामवशादेव दैन्ये सति प्रकटे प्रभौ स्नेहः, सोपि तथा, तच्छास्त्रानुसारी, न तु विध्यनुसारीत्यर्थः । 'एका भ्रुकुटिमाबध्ये'त्यादिकथनात् । तथा चात्र निःसाधनेभ्यो ब्रह्मादीनामपि साधनैरप्यप्राप्यं भजनानन्दं तदधीनत्वमङ्गीकृत्य दत्तवानिति सर्वोत्कर्षवत्त्वेन तत्तथेत्यर्थः । यद्वा, अग्रे गजदशान्तदानैर्भगवान् स्वयं कामवशाद्भक्तानां समीपमागच्छतीति ज्ञाप्यते । तथा चोक्तरीत्या कामेनोद्भूते प्रिये स्नेह इत्यर्थः । न ह्येवमन्यत्र सम्भवतीति युक्तमग्रे तत्कथनमिति भावः । लौकिकसारूप्येण चतुर्विधलीलाकरणे लौकिकत्वेन भगवति ज्ञानवतां निरोधासिद्धिरित्याशङ्क्याहुः एकमिति । यथैकेन पूतनास्तनपयःपानेन लोके वीर्यप्राकट्यं, तस्याश्च मुक्तिः, प्रमेयबलप्राकट्यं लोके वेदे च, पूर्वभक्षितानां बालानां कृतार्थता, अन्येषां च रक्षा, 'तोकेनामीलिताक्षेणे'तिवाक्यादग्रे व्रजवासिनां माहात्म्यज्ञानपूर्वकः स्नेहस्तात्कालिकश्च विस्मयोन्येषां श्रवणादिफलं चेत्याद्यनेककार्याणि जातानि, तथा सर्वापि लीलेत्यर्थः । एवं सति प्रतिपाद्याननुगममाशङ्क्य तदनुगमकं रूपमाहु. प्रपञ्चेति । आसक्तिरत्र मुख्या, तद्विस्मृतिरङ्गम्, तया विना सर्वथासक्त्यसम्भवात्तथा च निरोधत्वमेव तथेत्यर्थः । नन्वत्र बलदेवादिकार्यमप्युच्यत इति न सर्वा भगवल्लीलेत्याशङ्क्याहुः येनैवेति । आविष्टचरित्रमिति भावः । अन्यथा निरोध. तेनापि न स्यात् । अत एव 'बलपार्थभीमव्याजाह्वयेन हरिणे'ति ब्रह्मणोक्तम् । एवं सति प्रपञ्चविस्मृतिरित्यनेनैवास्य श्लोकस्य

---

१. तु लोके मौढ्यात् मू. पा. । २. लौकिक मू. पा. । ३. अलौकिकत्वेनेति मूल पाठः ।

गतार्थतेति शङ्का निरस्ता ज्ञेया । पूर्वं प्रतिपाद्यत्वेनात्र तु परिचायकत्वेन तदुक्तेः । उत्सवावि-ष्टेत्यादिना क्रमेणैतत्प्रकरणस्थाध्यायप्रतिपाद्यनिरोधाधिकारिण उक्ताः । समुच्चय एवास्य, न त्वेतन्मात्रत्वम् । भगवदासक्तानां तत्सम्बन्धमात्रेण सर्वासां लीलानां हृद्यत्वात् । आद्ये स्पष्टम् । तृतीये 'नन्दादयश्चाद्भुतदर्शनाकुला' इति वाक्यात् । 'अहो बतात्यद्भुत'मिति 'मान-यामास विस्मित' इति च । 'आसीत् सुविस्मिते'ति च वाक्यैराश्चर्याभिनिवेशिनो निरुद्धाः । तुरीयेऽध्याये शास्त्रे पुरुषोत्तमनामत्वेन प्रसिद्धानि कृष्णवासुदेवादिनामान्यत्र कृतानीत्यलौ-किकम् । गर्गेण स्पष्टतयोक्तेऽपि नन्दाबोधोऽपि तथा । अलौकिकत्वेन ज्ञात्वा तेषु नामसु ये रता-स्तेऽतः परमस्यैवैतानि नामानीति ज्ञात्वाऽस्मिन्निरुद्धा भविष्यन्तीति च । रिङ्गणलीलाप्यलौकिक-रीत्या दैत्यनाशनपूर्वकभक्तेष्टदेति तथा । लोके हीनत्वापादकत्वं[1] चौर्यं[2] भगवत्युत्कर्षाधायकं नि-रोधसाधकत्वादेवमपि भक्तमनोपितकरणाद्यलौकिकत्वम् । मृत्नाभक्षणं, तत आस्ये विश्वदर्शनं शरणागतिर्महदनुग्रहश्चेति सर्वमलौकिकमिति तादृशानामेतच्छ्रवणेन निरोधः सेत्स्यतीति तथा । पञ्चमे दधिभाण्डभेदनादिकं लोकदृष्ट्योपद्रावकमिति तथा । अग्रिमा लीला स्वभक्तोपद्रा-विका चेति । षष्ठे नलकूबरमणिग्रीवौ स्त्रीस्वभावरताविति तत्कथा तथा । स्त्रियश्च स्वभावश्च राजसतामसादिस्तयो रता इत्यर्थः । नात्र क्रमो विवक्षित इति । अतःपरं द्वितीयाध्यायतात्पर्य-मुच्यते । तत्रादौ हरिशरणगमनेनैव भयनिवृत्तिरिति तत्त्वम् । अनधिकारिणुवस्तुतया प्रमे-यबलतत्त्वं चोच्यते । रक्षाकरणेन स्वामिनीनां च तत्त्वमलौकिकस्वतादृक्स्नेहवत्त्वादिलक्षणम् । हरौ रक्षाकरणं लोकरीत्येति लौकिके तत्त्वे रतास्तथा । सप्तमे वृन्दावनावासपर्यन्तं महानेवो-द्यमो निरूपितो 'गोपीभिः स्तोभित' इत्यादिना । अग्रे च लीलेयम उक्त इति तथा । अथवा । यथाक्रममेव निरूपणं ज्ञेयम् । तथाहि । पूतनाया आगमनप्रकारागमनभगवत्कर्मकग्रहणपू-तनाकर्मकमारणप्रकारतद्देहपानाक्रमणतन्मुक्तितसहजरूपतद्दाहगन्धादयः सर्वे आश्चर्यरूपा इति तादृशानां निरोधः । तृतीये स्वोत्सवार्थमपि लौकिकप्रवाहधर्मासक्त्या स्वविस्मृतौ प्रकारान्तरेणास्मरणे शकटं भङ्क्त्वा मातुर्नितोषकरणमलौकिकम् । तस्य वैपरीत्येन तथात्वमपि तथा । प्रवालमृद्वङ्घ्रिस्पर्शमात्रेण तथाहृतिरपि तथा । अकस्माद्गुरुत्वप्रकटनमारभ्य कुशलेनाग-मनपर्यन्तं सर्वमलौकिकम् । [3]जम्भालीलायां तथात्वं स्पष्टम् । उक्तत्रिविधलीलायामाश्चर्यरू-पत्वमप्यस्तीति तादृशानामप्यत्र निरोध इति समुच्चयार्थोऽपिशब्दः । तथाप्यलौकिकत्वं मुख्य-मिति पृथक्त्वम् । चतुर्थे चौर्यादिलीलाया लोकप्रतीत्योपद्रावकत्वमिति तथा । नामरूपा-देरलौकिकत्वेनोक्तनिरोधस्यापि समुच्चयार्थश्चः । पञ्चम आवश्यकत्वज्ञानेन दास्याद्यभावे स्वयमपि कर्मकरणम् । पुत्रे च शिक्षार्थं तथा करणं लीलाभाव. । षष्ठे नारदोक्तिभिर्लोकन-

---

१. हीनत्वापादक मू. पा. । २. लोटापुस्तके कर्मेऽस्य कर्तृ इति क्रमम् । ३. जृम्भ मू. पा. ।

त्वम् । परमार्थतस्तत्त्वं स्तुत्येत्युभयत्र रतास्तथा । सप्तमे मन्त्रणपूर्वम्थानत्यागापूर्वतत्परिग्रहतत्रगमनाद्युपमोक्तेस्तादृशास्तथेति । अत्रोक्ताधिकारिणो यथासम्भव लीलास्थास्तदन्ये च ज्ञेयाः । सप्तस्वप्यध्यायेपूक्तासु लीलासु सप्तविधा अपि यथासम्भवमधिकारिण इति ज्ञेयम् । आवश्यकमिति । तदनन्तरमेव शीघ्र करदानार्थगमनोक्त्येति शेष । यदि केनाप्यंशेन नन्दो वसुदेवागमनं जानाति तदाकाशवाणीवृत्तान्तज्ञत्वेन सञ्जातवृत्तान्तशङ्कया स्वपुत्रत्वे सन्दिहान एव वोत्सव[1] कृतवानिति कस्यचिच्छङ्का स्यात् सापि तदैव मथुरागमनेनापास्तेत्याहुः अन्यथाज्ञानेति । उपपत्त्यन्तरमाहुः उत्सवस्त्विति । यथाकथञ्चिद्गमनसम्भवेऽप्युत्सवस्तु स्वपुत्रत्वनिश्चयं विना न स्यादित्यर्थः । नन्दः स्वपुत्रमादायेत्यत्रोदारधीरिति विशेषणसूचित महाहानिकविषभगवदुपयोगिद्रव्यानयनं चान्यथा न स्यादित्याहुः द्रव्येति । यद्यपि श्रमश्रमामाधारणं तथानानमात्रमेवाह्लादहेतुस्तथापि महतामन्तःकरणमतथाभूतं वस्तु न गृह्णातीत्याशयेनाहुः अन्तःकरणमतीत्यापीति ।

अलङ्कृत इत्यस्याभासः । अन्यामपि शुद्धिमित्यादि । अत्रायं भावः । बाह्याभ्यन्तरभेदेन शुद्धिर्द्वेधा । एतत्तारतम्येन भगवदानन्दानुभवतारतम्यमिति
१०-५-१. मर्यादा । प्रकृते चोत्सवरसानुभावकमलङ्करणमिति तथात्वमिति ।

१०-५-८. मूलस्थपाणिपदतात्पर्यमाहुः रिक्तेत्यादि ।

१०-५-९. सम्बद्धा इति कुलदेहसम्बन्धयुक्ता इत्यर्थः ।

नवकुङ्कुमेत्यत्र, मुखेषु तादृक्पद्मजत्वोक्त्या व्यञ्जितमर्थमाहुः गन्ध इत्यादिना । भावज्ञापकत्वसाम्येन कटाक्षोक्त्योरैक्यविवक्षया चतुष्टयत्वमुक्तम् । कटाक्ष-
१०-५-१०. युक्तास्ता इति वा । तथा च गन्धादिवक्रोक्तिगानपर्यन्त ताभिर्ज्ञापितं ज्ञास्यति । यतस्तच्चतुष्टय ज्ञेयम् । लोभात्मकं रसं तु स्वत एव ज्ञास्यतीति योजना । एतेन भगवतस्तु रूपादिपञ्चविषयविषया ये भोग्यास्ते एता एवेति सूचितम् । तेनैतासु भगवत आसक्तिः सूचिता भवति, मिथश्चित्तव्यतिषङ्गोपि । चतुष्टयज्ञेयपदे रसस्यैव वा विशेषणे ।

कृष्णे विश्वेश्वर इत्यत्र सञ्ज्ञेत्यादि । ननु विश्वेश्वरादिपदसामानाधिकरण्यात्तद्वत् कृष्णपदमप्यानन्दहेतुत्वेनोक्तम्, न तु नामत्वेनेति सञ्ज्ञेत्यादिकथनं
१०-५-१३ न घटते । अस्तु वा, तथापि[2] व्रजवासयुक्ति परं न घटते । शुकस्तु जानात्येवेति युक्तं तदिति कथमेवमिति चेत्, सत्यम् । यदा यादृशी लीला भवति तत्कालीनां तादृशीमेव तां शुको वदति । यथा 'चिरं पाहीति बालक' इति । तथा च तदा लोके

१. एवोत्सव मू. पा । २. अस्तु वा तथा मू. पा ।

तन्नामप्राकट्यं भगवता न कृतमिति तत्कथनमयुक्तमित्याशयेन तदुक्तम् । यत्तु नामत्वेन नोक्तमित्युक्तम्, तत्राप्युच्यते । पुरुषोत्तमस्वरूपं सदानन्दात्मकमिति केवलस्वरूपवाचित्वेन कृष्णपदमेव मुख्यं नाम । नन्वीश्वरादिपदवद्धर्मपुरःसरत्वमिति तत्सामानाधिकरण्येप्यस्य नामत्वेनैवोपस्थिति । यथान्यशब्दानां धर्मपुरःसरं धर्मिवाचकत्वेपि सत्ताशब्दस्य न तथात्वम्, तथात्रापीति । **मारयेदिति** । बालकानिति शेषः । **महानपकुर्यादिति** । पूज्यपूजाव्यतिक्रमजन्यदोषप्रयोजको भवेदित्यर्थः ।

तत आरभ्येत्यत्र, यदा पूर्वोक्तेत्यादि । अत्रायं भावः । रमाक्रीडत्वोक्त्यैव
१० ५ १८ सर्वसमृद्धिमत्त्वस्य प्राप्तावपि पृथक् तन्निरूपणाद्धरेर्निवासेत्यनेनैव हेतुकथनेपि
तत आरभ्येति पार्थक्येन पूर्वानधिकथनाच्च पश्चादिसमृद्धौ विष्ण्वाराधनस्यैव
नैकट्यात् हेतुत्वमवगम्यते । तादर्थ्यचतुर्थ्याराधनस्यैव मुख्यफलत्वेनानुषङ्गिकत्वमत्रेति ।

दिष्ट्या भ्रातरित्यत्र इदानीमित्यादि । वसुदेवबुद्धिमनुसृत्येदमुक्तमिति ज्ञेयम् ।
१० ५ २३ वस्तुतस्तु प्रजाशब्दोपत्यमात्रवाची यत्प्रे वचनादिदानीमप्रजयोक्तिः कन्याभि
प्रायेण तस्या गतत्वात्तथात्वम् । प्रजा यत्समपद्येति[1] तु भगवदभिप्रायेण ।
अन्यथेदानीमप्रजस्य प्रजा समपद्यतेति विरुद्धं वाक्यं स्यात् ।

न तेष्वित्यत्र, यथात्मन इत्यादि । नन्दस्यातिप्रियत्वात् तत्तोषार्थं स्वगृहे नन्दा-
१० ५ २८ कारणमुचितं यद्यपि, तथापि तथाकृते भगवति देवकीपुत्रत्वं कंसः सम्भाव्य
नन्दानिष्टं कुर्यात्तदा सुहृन्नन्दः क्लिष्टो भवेदतो नाकारणम् । इदमप्येकं दुःख
मेतदुक्त्या ज्ञाप्यते, तेन यथात्मनो नन्दस्य स्वगृहे नाकारणमिति सम्बन्धः । शेषं हेतुत्वे-
नोक्तम् ।

निःसाधनफलात्माय प्रादुर्भूतोऽस्ति गोकुले ।
अतो वयं सुनिश्चिन्ता जाताः सर्वत एव हि ॥ १ ॥

इति पञ्चमोऽध्यायः ।

षष्ठेऽध्याये वीर्ये वर्णनीये भक्तदुःखोक्तिरनुपपन्नेत्याशङ्क्याह **माययेति** । 'माये-
१० ६ ० त्यसुरा' इति श्रुतेरसुराणां तद्रूपं तथोपास्य इति तत्सम्पादितपूतनारूपं
मायारूपमिति तया करणभूतया कृत्वा भगवतैव कृतं दुःखमित्यर्थः । अत
एव स्वामिनीनां क्षोभमानम्, अन्यथा साभिरेव सा निरसेत । अत एव सद्भावाय मुक्तिदानं च । अन्यथान्यत्र प्रविश्य पुनर्दुःखदानसम्भवेन सर्वात्मना तन्निवृत्तिर्न स्यात् । तर्हि

१ यत्समपद्यतेति मू. पा. ।

घर्थं वाच्यः । प्रकृतेऽपि 'पतिं द्रष्टुमागता श्रियममसते'ति वाक्याद्भगवत्वेन ज्ञानवतीभिरेव रक्षा कृतेति ज्ञायते । एवं सति यथैकस्मिन्नेव पुरुषे पुत्रत्वमानत्याः स्त्रियास्तद्दर्शने वात्सल्योत्पत्ति स्वपोषणपुष्टत्वपोष्यत्वादिज्ञानस्य च, पतिभावत्या विनयविशेषपूर्वकरसभावो मर्मैहिकपारलौकिकनिर्वाहक इति च भाव उपपद्यते । जारभावत्यास्तु तत्र यद्देषु स्वरसपोषकत्वज्ञानेन प्रौढिपूर्वकविविधरसभावविशेषोत्पत्तिस्तदनुरूपभावाः पुरुषेषु पद्यन्ते । न ह्युक्तभावविषया धर्माः पुरुषस्त इति वक्तुं शक्यम्, अनुभवविरोधात् । तथा च तत्र विद्यमाना अपि धर्मास्तत्तद्भावैकगम्यत्वेन तत्तद्भाववतीनामेव विषयास्तथा स्नेहभावे सत्येव ये धर्मा भगवन्निष्ठाः स्फुरन्ति ते तत्र सन्त एव तादृगेकवेद्या एव तयेति न भ्रमशङ्कापि । यथा 'न चान्तर्न बहिर्यस्ये'तिश्लोकोक्तधर्मवत एव दाम्नावच्छिन्नत्वम्, तथा लोकविलक्षणत्वेन माहात्म्यज्ञानजनकत्वेन ज्ञानप्रकरणोक्तधर्मविपरीतधर्मा लीलारूपा अपि प्रभौ सन्तीति नानुपपत्तिः काचित् । अत एव 'अतृप्तमुत्सृज्य जवेन सा यया'वित्युक्तं शुकेन, अन्यथा 'न चान्त'रित्यादिधर्मवत्त्वेन तृप्तिस्तदप्राप्त्या चातृप्तिर्विरुद्धा नोक्ता स्यात् । किञ्च । शास्त्रं हि यथाधिकारं ब्रह्मस्वरूपं निरूपयति । ज्ञानमार्गीयेभ्यो भक्तिरसादानान्मोक्षमात्रदानाच्च रसात्मकब्रह्मधर्मबोधने प्रयोजनाभावान्नैतान् धर्मान् ज्ञानमार्गे निरूपयति । नह्येतावता तदतिरिक्तधर्माभावः सिध्यति । येषु तज्ज्ञापनप्रयोजनमस्ति तान् ज्ञापयतीति भगवतीमन्त्रिगादिषु तदज्ञापनम्[1] । ते च ब्रह्मधर्मा स्नेहे जाते स्वत एवानुभूयन्त इति फलरूपत्वेन साधनमार्गे तदकथनं युक्तं च । ज्ञानकर्मादीनां विहितत्वेन साधनमार्गीयत्वात् । ननु ज्ञानमार्गस्याक्षरविषयत्वेन तथात्वस्य युक्तत्वेऽपि भक्तिमार्गीयेष्वपि केषाञ्चिन्मुमुक्षूणामुक्तधर्मास्फूर्तिः[2] स्नेहवतां तु तत्स्फूर्तिः, तत्रापि तारतम्यमिति कथमिति शङ्का 'यथैकस्मिन्नेव पुरुष' इत्यादिना निरस्ता ज्ञेया[3] । यथा प्रत्यासत्तिसाम्येऽपि न चक्षुषा गन्धादिग्रहोऽयोग्यत्वात्तथात्रापीति ज्ञेयम् । किञ्च 'रसो वै स' इत्यादिश्रुत्या लीलाया स्वरूपात्मकत्वान्नानुपपत्तिः काचित् । यथैतत्तथा विद्वन्मण्डने प्रपञ्चितमस्माभिः । यद्वा । 'तेन ब्रह्मविदो वयं पूतं ब्रह्म पुनीमहे' इत्यादिश्रुतौ ब्रह्मणः पावनं श्रूयते । तच्च ब्रह्मात्मकातिशयविशेषप्राकट्यमेव । प्रकृते च 'रसो वै स' इत्यादिश्रुत्या भगवतो रसात्मकत्वात्तस्य च भावात्मकत्वाद्रक्षाकृत्या स्वामिनीभावविशेषरूपातिशयप्राकट्यमभूदिति तत्रैवोपयोगो रक्षाकृतेः । सौन्दर्यविशेषाभिव्यक्तौ मण्डनकृतेरिव । अत एवाधुनापि स्वक्षुत्पिपासादि ज्ञापयति भक्ते हरिः । पूतनातः स्वस्मिन्नानीतानां बालकानामग्रे विनियोगयोग्यतासिद्ध्यर्थं राक्षसीस्पर्शजदोषोऽवश्यं निवारणीय इति स्वामिनीकृतरक्षायास्तन्निवारणमप्येकं प्रयोजनं भगवदभिमतमिति

१ तज्ज्ञापनम् मू. पा । २ धर्मास्फूर्तिं मू. पा । ३ ज्ञेया इति मू. पाठे नास्ति ।

ज्ञेयम्। एकस्या भगवल्लीलाया अनेककार्यसाधकत्वात्।

१०-६-२१ अङ्गानि करणानि आत्मा कर्ता। तदाहुः करणकर्तृभेदेनेति।

अव्यादज इत्यत्र, अङ्घ्रिरयमित्यादि। अयं भवनीयत्वेनोच्यमान, इत्यर्थः।

१०-६-२२ परिदृश्यमान एवाधिदैविकोऽजपदेनोच्यते। स स्वाधिष्ठानभूतमाध्यात्मिकं स्वस्मिन् विद्यमानमेव वा यादिति प्रार्थनेति भाव।

१०-६-४४ य एतदित्यत्र। इष्टजनकं मोक्षजनकमित्यर्थः।

इति षष्ठोऽध्यायः।

सप्तमाध्यायप्रकरणार्थोक्तौ, सङ्ग्रह इति। अग्रे स्वोपयोग्यात्मोत्तमानामता

१०-७-० दशाना च स्वीयत्वेन स्थापनं हि लोके सङ्ग्रह इत्युच्यते। सोऽत्राधुनिक निरोध एव। तथा च सङ्ग्रहनिमित्तमीर्यत इति सम्बन्धः। सौशा दुःखोक्ते

रतात्पर्यमाहुः यश इति। सर्वगमिति। चरित्रमिति शेष। दुःखमिति वा। एवं सति तन्निवारके सर्वेषामासत्त्या चरित्रगानेन यशस्सिद्धिरित्यर्थः। आद्यपक्षे चरित्रस्य सर्वगत्वे हेतुमाहुः स्वासत्त्येति। सर्वेषां तदा गानसम्भवेन तथेत्यर्थः।

तस्मिन्नेव दिवसे रोहिणीनक्षत्रमितिवाक्यमनतिप्रयोजनमपि स्वरूपकीर्तनपरमिति

१०-७-४ ज्ञेयम्, न तु व्याख्यानमिति।

न तद्व्रजस्थानां भगवदीयत्वात्तत्पूजनं चेत्स्यात्तदुदिताश्रवणं न स्यात्। किन्त्व न्यव्रजस्थानां तत्रापि केवलं भिक्षुकाणां तेन तथेत्याशयेन तैश्चेरसत्त

१०-७-६ इत्याद्युक्तम्।

अप्रमेयं बलमित्यत्र। यद्यप्यत्र संशयो न कण्ठोक्तस्तथापि बालोक्ते श्रद्धाभावो

१०-७-१० ऽस्या तन्निश्चयाभाव एवायाति, न तु विपरीतनिश्चयोपीति संशयप्राप्तिरित्याशयेन तु सन्देहस्त्वनेनेत्यादि।

येऽसूयेत्यत्र। विप्रवाच एव सत्यत्वमुक्तम्, न कृतेरपीति यत्तत्तात्पर्यमाहुः कृतं

१०-७-१३ तु सर्वेषामिति। सर्वेषां भगवतो विप्राणां च निर्दोषाणां कृतमपि सत्यमेव, परन्तु तद्वचनाविरोध्येव, न तु स्वच्छन्दचरितमपीत्यर्थः। स्वकर्तव्य जातीयत्वेन ग्रहविषयत्वाभाव एव कृतौ सत्यत्वाभावो ज्ञेयः।

एकदेत्यत्र, वाचिकमित्यादि। पूतनावधे रक्षाकरणे वाङ्नियुक्तेति तन्निरोध

१०-७-१८ उक्तः। शकटभङ्गे भगवदर्थं कायिको व्यापार उक्त इति तथा। तृणावर्तप्रसङ्गे भगवन्निमित्तकं दुःखं वक्ष्यते मानसमिति। मानसो निरोधस्तथा। प्रकरणान्निरोध एव विशेष्य इति लिङ्गमविवक्षितमत्रेति ज्ञेयम्। उक्तत्रयसम्बन्धिनिरोध

करणं वा विशेष्यम् । रक्षाविधानशान्त्यादेर्भगवल्लीलात्व उपपत्तिमाहुः अन्यथेति । एतस्य निमित्तत्वाल्ल्यब्लोपे पञ्चमी ज्ञेया । तथा च तत्प्राप्य तद्विषयत्वं प्राप्येति यावत् । ज्ञानहेतुषु स्वरूपतद्धर्मेषु सत्स्वपि स्वलीलार्थं तेषामन्यथाज्ञान स्वस्मिन् प्राकृततुल्यत्वेन ज्ञानमुत्पाद्य स्वयमेव सर्वं करोतीत्यर्थः । तेन रक्षाविधानादिना पूर्वस्माद्वैलक्षण्यभानं यथा लोके तथा स्वस्मिन्नपि प्रकटयतीति ज्ञेयम् । तथा ज्ञानाभावे तूक्तप्रकारको निरोधो न स्यादिति भाव । अन्यथाज्ञाने सति कायवाङ्मनोनिरोधकथनाच्छालैत्यद्भुतत्वं चरित्रेऽस्मिन् ज्ञापितं भवति । किञ्च । एकस्मिन् बाले सर्वेषां सहजस्नेहो लोके न सम्भवतीति तथात्वं यदत्र तद्भगवत्कृतमेवेति ज्ञायते । यद्वा । मानसिकनिरोधस्यावश्यकतामाहुः अन्यथेति । अत्र गुरुत्वात्मकस्वधर्मज्ञापनपूर्विका लीलोच्यत इत्येतत्कथनाभावे जीवसहजाज्ञानतो हेतो र्नन्दयशोदादिः 'सर्वं करोतीति ज्ञानं सर्वेषां भविष्यतीति तदभावायैतदुच्यत इत्यर्थ । अनिमित्तश्चेति । अङ्गारोहे कालो न निमित्तमिति न विद्यते कालो निमित्तं यस्य तादृगारोह इति च न तत्कथनमित्यर्थः ।

महापुरुषमादध्याविथत्र, आगतस्त्वित्यादि । उक्तविधासक्तौ मातृत्वेन परानुरोधाभावाद्गोचारणरात्रिलीलादिकं सर्वं प्रतिबद्धं तथा स्यादुक्तज्ञाने

१०-७ १९. सार्वदिके वा लीलारसानुभवो न भविष्यतीत्याशङ्क्य गोकुले समागमनं सर्वसुखदानार्थमिति यथैव तद्भविष्यति तथैव सम्पादयिष्यतीति न काप्यनुपपत्तिरित्युक्तमेतेन । किञ्च । कालेनेत्यादि । आनुषङ्गिकफलस्यासार्वदिकत्वादपि ज्ञानमिदं न स्थास्यतीति भावः । मुख्यं फलं तदेव स्वयं, निरोधो वा तत्कृतः

गोकुलं सर्वमावृण्वन्नित्यादि प्रकरणार्थनिरूपणेऽविद्यापर्वपञ्चककथनं तच्चानुपपन्नम् । यशोदादिस्नेहे तथात्वस्यायोगादत आहुः लौकिकादिति । प्राकृतबालके

१०-७-२१. तादृक्समये लोकानां यथा शङ्का तथात्रापि सा ययुक्तेत्ययमंशो लौकिक स तत्पर्वरूप उच्यते । न तु स्नेहदुःखादिरपि । अलौकिकत्वात् । एतदेवाहुः लौकिकादिति । लौकिकसजातीयत्वादुक्तभावस्य पर्वत्वमुच्यत इत्यर्थः ।

सा वीक्ष्येत्यस्याभासोक्तौ, अत्रापि तस्या इत्यादि । अत्रायमाशयः । मातुर्हि पुत्रत्वेनैवात्र स्नेह, स च लौकिकसरूप एव वाच्यः, परन्तूत्कटः

१०-७-३७ स्वरूपतोऽलौकिकश्च । तथा च तत्र लौकिकविजातीयधर्मदर्शनं प्रथमत एव स्नेहप्रयुक्तातिभयजनकम्, येन प्राणस्थितिर्न भवति, अतः क्रमेण किञ्चित् किञ्चित तथाविधधर्मदर्शनेऽग्रे सहजभगवद्धर्मत्वेन ज्ञानाद्वैर्येण सर्वसामञ्जस्यं भविष्यतीत्यधुना तथा ज्ञानाभावाद्वैर्याभाव एवाधिकाराभावरूप उच्यते । तेन क्षणमात्रं प्रदर्श्य तिरोहितं कृत्वा विस्मयरसमुत्पादितवानिति सर्वं सुस्थमिति ।

इति सप्तमोऽध्यायः ।

अष्टमेऽध्याये प्रकरणार्थोक्तौ, संस्कृतान्येव नामानीति । सत्त्वशोध-
१०-८-०. नस्य मर्यादामार्गीयत्वाद्धुरुपदेशलक्षणसंस्कारवन्त्येव तानि तथेत्यर्थः । इयद्-
वधि यशोदाद्यधीनमेव गमनादिकमुक्तमस्मिन् सत्त्वशोधकाध्याये स्वातन्त्र्येण रिङ्गणादिलीलोक्त्या सत्त्वशुद्धिपर्यन्तं स्त्रीसम्बन्धि लीलाविशिष्टं रूपं न भावनीयम् । पाक्षिकोपि दोषः परिहरणीय इति न्यायात् । किन्तु केवलभगवत्कृतलीलाविशिष्टमेव रूपं तच्छुद्ध्यनन्तरं सा लीला भावनीयेति तात्पर्यं ज्ञाप्यते । एतदेवाहुः स्वेच्छा लीलेत्यादिना । स्वेच्छया, न त्वन्येच्छया कृता या लीला तद्विशिष्टं रूपं शोधकमिति सम्बन्धः । पूर्वस्मादे-तस्य वैलक्षण्ये हेतुमाहुः आनन्देति । आनन्दरसरूपत्वादित्यर्थः । गूढाभिसन्धिमुद्घाट-यन्ति अन्येच्छयेति । भक्तानां भगवत्सम्बन्धेनैवानन्दो, भगवांस्त्वानन्दरूप एवेत्यस्मि-न्नध्याये न दुःखकथनम्, अन्याधीने चरित्रे क्वचिद् समप्युक्तमिति तस्माद्वैलक्षण्यमित्यर्थः । [1]कंसस्यैतज्ज्ञानं स्वानिष्टमित्युक्त्या[1] रहसि नामकरणाद्दुःसङ्गवर्जनमङ्गत्वेन सूचितमिति तदाहुः दुःसङ्गवर्जनमिति ।

अयं वै रोहिणीपुत्र इत्यत्र, वस्तुत इत्यादि । अप्राकट्यदशायामव्यवहार्ये
१० ८-१२. भक्षणि सत्यन्यपदार्थवल्लोके केवलं स्वरूपत एव भगवन्नामप्राकट्याभावाद्भग-
वतः प्राकट्यात्मकगुणयोगादेव लोके नामानि प्रकटानि भवन्तीत्यर्थः । यथाश्रुतार्थकथने नामानि रूपवन्नामरूपस्यापि भगवतो रूपाणीत्यारभ्याखण्डान्येवेत्यन्ते-नाग्रिमग्रन्थेन विरोधः स्यात् । यशोदायाः पुत्रत्व इति । अत्रायं भावः । गर्गः पूर्ववृ-त्तान्ताभिज्ञोऽत्रागत्याधुना भगवद्भाववत्त्वेन भगवति यशोदापुत्रत्वलक्षणं धर्मं च दृष्ट्वा सन्दिहानस्तत्र[2]निश्चयं जानंस्तद्वाक्यद्वयं वा इत्युक्तवान् । अत एव विपरीतनिश्चयो गोक्त इति भगवन्नामकरणप्रस्तावे सम्यग्भगवद्भावानिश्चयोभूदिति तवात्मजस्ते सुतस्येत्युक्तवान् ।

तान्यहं वेदेत्यस्य विवृतौ, सारूप्येण साधकमित्यादि । ननु साङ्केत्या-
१० ८-१६. दिना भगवन्नामोच्चारणस्यापि फलसाधकत्वं श्रूयत इत्याशङ्क्य तत्तात्पर्यमु-
च्यते । सङ्केतिते पुरुषे सदानन्दत्वादिधर्मबाधेन भगवन्नाम्नस्तत्रावाचक-त्वाल्लौकिक एव शब्दस्तत्समानाकारस्तद्वाचकः स इति मन्तव्यम् । तथा च सारूप्येणापि मोचकमिति माहात्म्यज्ञापनपराण्यप्रवर्तमानस्य च प्रवर्तनपराण्युपाख्यानानीत्यर्थः । ज्योतिः-शास्त्राभिज्ञत्वं भाविज्ञाने लोकप्रतीतिमनुसृत्य हेतुत्वेनोक्तम् । भगवद्धर्माणां तच्छास्त्रागम्य-त्वात् । 'न लभ्यते यद्भ्रमतामुपर्यध' इति वाक्यात्[3] । भाविरूपनामज्ञानहेतुत्वेन[4] वा तदुक्तम् ।

१. १–१ एतन्नास्ति मूले । २. तत्रेति मूले पाठः ।
३. अथवा मामभिजानातीत्यधिक क्वचित् । ४. ज्ञाने हेतुत्वेन मू. पा. ।

एष वः श्रेय आधास्यदित्यत्र, स्वयं पुरुषार्थरूपोपीति। ननु धार्यधार-
क्योर्भेदाद् भगवदतिरिक्तस्य श्रेयस्त्व भक्तिमार्गविरुद्धमित्यत आहु स्वयमि-
१०८१७ त्यादि। एवं सति श्रेयोधारकत्वं नन्दादीनामेव तत्प्रतिबन्धकनिवर्तक-
त्वेन भगवत्युपचर्यत इत्यर्थ। तथा च नन्दादीना भक्तत्वेन सर्वपुरुषार्थरूपस्य भगवत
स्तत्राविर्भूय विराजमानत्वादन्यस्य श्रेयस्त्वाभावपि तद्धारकत्वमुक्ताभिप्रायेण भगवति न
विरुध्यते। यद्यपि भगवति विद्यमाने दोषाणा प्रतिबन्धकत्वमेव न सम्भवति, क्व तन्निवर्तक-
त्वेनोपचारः, तथापि लीलया निरोधसिद्ध्यर्थमस्य प्रभुणा लोकरीतिरेव स्वीकृता। यतस्त
दर्थं स्वरूपमपि तथा प्रदर्शितवान्। तदुपपादितं 'बभूव प्राकृतः शिशु'रित्यत्र। लोके च
यथा यथा प्रतिबन्धबाहुल्यम्, तन्निवृत्त्या पुन फलानुभवः, तथा तथा दुरापत्वज्ञानेन फ-
लेप्यासक्तिरधिकतरा भवतीति दृश्यते। अतो नन्दादीनामासक्तिसिद्ध्यर्थं स्वेच्छयैव दोषरू-
पान् पूतनादीन् प्रतिबन्धकत्वेनोद्भाव्य तन्निराकरणद्वारा स्वयमेव तच्छ्रेयोरूपं फलतीति
मनस्यभिसधाय साधूक्तं स्वयमित्यादि तातचरणै।

नारायणसमो गुणैरित्यत्र। उपमेये तत्समाना धर्मा ये त उच्यन्ते। एत
१०८२० त्सृष्टिविलक्षणा हि लीलासृष्टिरियम्। यस्यामुत्पादितास्तु जीवगणा नन्दादयस्त-
सम्बन्धिनो यावन्तो भावा भगवद्विषयकास्तदन्त इति तद्भावपोषार्थं भगव-
त्यपि तथैव स्वनिष्ठा गुणाः प्रकटीक्रियन्त इति भगवद्गुणव्यापकत्व तेषाम्। न च
मन्तव्यमेतादृशा एव केचन जीवाः सन्ति, येषामेतादृक्सामर्थ्यं सहजमस्तीति, यतस्तद्रूपः
स्वयमेव प्रकटो जात इति ज्ञापनायाहु तावद्गुणप्रसिद्ध्या इत्यादि। एतेन प्राकृताना
नैतद्दर्शनप्राप्तिरिति ज्ञापित भवति। द्वितीयेत्यादि। अत्रैतादृशो व्रजसुन्दरीपरिग्रह एव।
रसाधिक्ये पुम्भावेनाभिमोकधर्माः स्पष्टा। तृतीये गोपिकाधीनत्वादि स्पष्टम्। 'अहं भक्त-
पराधीनः' 'एव मदर्थोज्झित'त्यादिवाक्येभ्यः। एतदेवोक्तं त्रिविधा अपीत्यादिना। श्रिया
कीर्त्येत्यत्र, एवं कृष्णोपि करोतीति। व्रजसुन्दरीणामिति ज्ञेयम्। अग्रे स्पष्टम्।

कालेन व्रजतेत्यत्र आभासोक्तो, तस्मिन्नेवाधिदैविके गच्छतीति। नन्वेवं
सति गतेर्गमनमुक्तं भवतीत्यनुपपन्नमिति चेत्, अत्रेदं प्रतिभाति। उत्तरदे-
१०८२२ शसम्बन्धफलिका हि गति, तत्तत्कालविशिष्टा लीला च नियमेन विद्यमा
नैव क्रमेणाच्छाद्य क्रमेणाविष्क्रियत इति रिङ्गणादिलीला यस्मिन् काले स कालोधुना प्रक-
टित इत्ययमेव पूर्वलीलाकालस्योत्तरदेशस्थानीय इत्युक्तन्यायेन तत्सम्बन्धित्वे जाते तदाधेय-
रिङ्गणलीलामपि प्रकटितवानिति हृदयम्। तथा च लीलानित्यत्वज्ञापनाय कालेन व्रजतेत्यु-
क्तमिति सारम्। उपविष्टमित्यादि। दृक्सन्निधिरूपस्यैवानुवादोयम्। अन्याश्रित

मित्यादि । कथञ्चित् केनाप्यंशेनान्याश्रितं रूपमित्यर्थः । स्वतः स्वातन्त्र्येण क्रियमाणलीलाविशिष्टं रूपमित्यर्थः । **सर्वथा** । सर्वांशेन स्वतः क्रियमाणलीलाविशिष्टं रूपमित्यर्थः । **निर्गुणेति** । ताभिश्चरित्रे ज्ञापिते सति तदनन्तरं ताभिः परिदृश्यमानं निर्गुणावस्थवेद्यं रूपमित्यर्थः । अखिलैतत्प्रकरणतात्पर्यमाहुः **सात्त्विकादीति** । सात्त्विकादिभेदोपलक्षितास्ते ते ये पुरुषास्तत्तद्धृदयगामिनि रूपे सति सा हृदयस्थितिस्तथा कृत्वान्तिमे रूपे स्थिरा भवति, स्वरूपमात्रनिष्ठा भवतीत्यर्थः ।

गोकुले रामकेशवावि यत्र, रिङ्गणलीलायां केशवतः शोभातिशयो भवतीति तत्राधिवयं मन्वानैरुक्तम्—वस्तुतस्त्वित्यारभ्यापेक्षाभावादित्यन्तम् । भगवद्वाचकत्वे योऽर्थस्तमनूद्य तत्रारुचौ हेतुमाहुः **प्रत्ययेति** । मत्वर्थीयप्रत्ययाभावे तत्सौन्दर्यालाभादिति भावः । उभयोस्तरतमभावेपि गतिसाम्ये हेतुमाहुः **भगवद्गतित्वेनेति** । बलदेवेप्याविष्टस्यैव गतिर्निरूप्यते । सा चैकैवेति तथेत्यर्थः । वयसोधिकत्वेन बलदेवरिङ्गणं पूर्वं कुतो नोक्तमित्याशङ्क्यात्र भगवद्गतिरेव वाच्या तत्सम्बन्धश्चात्र नामकरणमारभ्येति भगवद्रिङ्गणलीलासमय एव तदुक्तिरयीत्याशयेनाहुः **भगवत्सन्निधान** इत्यादि । पाण्योः सहगावोक्त्या गौणत्वोक्तिपूर्वकं रिङ्गणे जानुनोः प्राधान्येन निरूपणस्य तात्पर्यमाहुः **जानुभ्यामिति** । सर्वमूलरूपत्वेनैतयोः सुतलाधिदैविकरूपत्वमुच्यते । 'द्वे जानुनी सुतल'मिति वाक्यात् । तथा च रिङ्गणलीलायां जानुनोरपि घर्षणं संभवतीति तमंशमादायेदमुक्तम् । घर्षणे पीडासंभवात् तस्याश्चात्रायुक्तत्वाल्लोकसाम्येन सर्वकरणात् तज्जनितकिणधारणेनापि सा तदपास्य दैन्यगामिनीति मन्तव्यमिति भावः । न च जानुनोरेव सहभावो वाच्य इति वाच्यम् । अस्या लीलाया प्रथमगतिरूपत्वेन तस्याश्च पदधर्मत्वेन तयोरेव प्राधान्यस्योचितत्वादिति भावः ।

उज्झितगृहा इत्यत्र, सूचितमानुपद्धिकमप्यर्थमुक्तवन्तः **एवं कर्मभ्य** इत्यादिना ।

१०-८-२४. **प्रेक्षन्त्यो ज्ञानपरा** इत्यादि । उक्तत्रिविधासु तासु मध्ये स्वाद्याः कौतुकं मत्वा वत्सपुच्छालम्बनेन गतिं द्रष्टुमेवोद्यता, इति, ज्ञानपराः । प्रियदर्शनकटाक्षस्पर्शादिरसाविष्टानामन्यत्र रागाभावः स्पष्टः । तृतीयास्त्वेकाकी प्रियः प्राप्त इति सन्तोषाद्रसन्त्यो जाताः । **विनियोगस्त्विति** । उक्तत्रैविध्यकथनेनेत्यर्थः । अङ्कं नयन्तीलङ्के या नयन्तीति तयेति तदुपस्येति वा ।

१०-८-२५. **गृहाणि कर्तुमि**त्यत्र, **पञ्चमलीलायामिति** । जन्मप्रकरणमुक्तं फलप्रकरणं पञ्चममिति तत्रोक्ता सा पञ्चमीति ज्ञेयम् । **ततस्त्विति त्रिभिरिति** । ततस्त्वित्यस्मादग्रिमैस्त्रिभिरित्यर्थः । तद्भाववतां निरोध हेतुत्वेन लीलायामपि ते गुणा उपचर्यन्ते ।

व्रजस्त्रीणां मुदं जनयन्नित्यत्र, अन्वयेति । तन्निर्देशो न स्यादित्यनेन
सम्बध्यते । अन्यथैवस्यैव विवरणं शिष्टेन । तथा चानुषङ्गिकं फलं व्रजस्त्रीणां
१० ८.२७. सुखकरणम्, न तु तदेकप्रयोजनत्वेन लीलाकरणमिति चेत् स्यात्, तदा
'व्रजस्त्रीणां मुदं जनयं'न्निति शुको न वदेदित्यर्थः । अनावश्यकत्वादिति भावः । निरो-
धस्यात्रोद्देश्यत्वेनापि तथा मन्तव्यमिति हृदयम् । तर्हि तद्धर्मप्राधान्यात् ता मुमुदिर इति
वदेन्न तु प्रभुप्राधान्येनेति चेत्, तत्राह निरोधजनकत्वं स्वस्येति ।

मर्कान् मोक्ष्यन्नित्यत्र । सोपीत्यादि, यद्यपि श्रौतं ज्ञानं न सहजमेतासां
भगवता लीलार्थं न ज्ञाप्यते च, तथापि भगवद्धर्मनिरूपणे चित्ते तदावेशाद्
१० ८.२९. भगवति सोपि धर्मोस्तीति वस्तुस्वभावात् तस्यापि स्फूर्तिः । तत्रापि भोजनप्र-
करणादस्यैव धर्मस्य । अन्यथा पुरःस्थिते प्रियेऽयमित्यनुवृत्त्या स इति न वदेयुरिति भावः ।

हस्ताग्राह्य इत्यत्र । पञ्चविधमित्यादि । प्रकारशब्दोत्र साधनवाची । तथा च
पीठादिसाधनयुक्तं तद्युक्तं चेति द्विविधम् । यस्मिन्काले तद्गृहे कोपि न
१० ८.३०. भवति । तत्कालविषयकं ज्ञानं वस्तुविषयकं च तथा । तदीयांशज्ञानामिति ।
पूर्वोक्तज्ञानस्यांशा पीठादयो विषयत्वात् ज्ञानस्य स्वतो निरंशत्वेन तस्यैव तथात्वात् ।
तथा च स्वगृहे सदा तज्ज्ञानमिति तत्सम्बन्धिभगवज्ज्ञानमपि सदेत्युपकार एवेत्यर्थः ।

न मुपाल्लघुमैच्छदिरपस्य विवृतौ, यावान्नारयन्त्यासक्त्येति । नेत्यत्यन्त-
पदविशेषणम् । अत्यन्तासक्तौ तु याद्यानुसंधानमेव न स्यादिति भावः । सो-
१० ८.३१. प्युद्गत इति । भगवद्विषयकः पुत्रत्वेनाप्यामोपि निवर्तिष्यत इति सम्बन्धः ।
अत एव प्रणता स्वमतिप्रकारगणनया'मेव मे सुत' इत्युक्तवती । निवर्तने हेतुमाहुः स्वसमा-
नेति । पुत्रत्वेन स्नेहाद्धि मृद्भक्षणे शिक्षार्थं लोकन्यायेन विरुद्धाचरणमपि संभवतीति तच्चि-
कीर्षायां स्नेहसमानविषयको विरोधो भवतीति स्वधर्मप्रदर्शनेन सोपि निवर्तिष्यत इत्यर्थः ।

एकदा क्रीडमाना इत्यत्र, ये स्त्रीणां सुखार्थं इति । पूर्वं वयस्यैर्व्रजबालकै-
र्व्रजस्त्रीणां मुदं जनयंश्चिक्रीड इत्युक्तम् । तथा च तच्छब्दस्य पूर्वपरामर्शि-
१० ८.३२. त्वेन त एवोच्यन्त इत्याशयेनाहुर्ये इत्यादि । निरोधस्येति । मृदानिष्टहे-
तुत्वेन ज्ञानेन हि तदभावाय निवेदनम् । नच स्नेहं विना न संभवतीति कथं तदक-
रणमुक्तमिति चेत् । उच्यते । क्रीडमाना इत्यात्मनेपदप्रयोगेण न भगवदर्थं नापि
भगवत्सहं क्रीडयम्, किन्तु स्वार्थमेव परस्परमेवेति च ज्ञाप्यते । सर्वभावेन निरोधे तु तथा

१. प्रणतास्मेतिविप्रकारेति पाठः ।

करणं न सम्भवतीति तथोक्तमाचार्यैः । व्रजस्त्रीमुज्जनगत्यैवोद्देश्यत्वेन तदुपयोगिलीलोपयोगित्वेन बालकसहभाव इति हृदि कृत्वा खीलक्षादित्युक्तम् । अत एव मुख्यो निरोधो न सम्पन्नः, आनुषङ्गिकस्तु जातः इति भावः । तत्कार्यम् । निरोधाकरणकार्यमित्यर्थः । यथैव ता भगवत्सङ्गता भवन्ति तथैव सम्पादयतीति चौरतिकर्तृत्वं रामे । अत एव रसरीत्या ताम्बूलाद्यङ्गीकार एवास्य रोचते, न त्वलौकिकत्या अपि मृद इति स्नेहवशादेव दोषदृष्टिस्तत्र । अत एव रामाद्या इत्यत्रातद्गुणसंविज्ञानो बहुव्रीहिः, तेन बालकविजातीयो भावः सूच्यते । रामे गोपबालकत्वाभावात्तथा । गोपानां त्वग्रे निरोधो वक्तव्य इत्यधुना तथा न निरोध इति तथोक्तम् ।

पुत्रशब्दविवरणं लोकसम्बन्धीति ज्ञेयम । तथा च यत्र लौकिक एव स एतादृशस्तत्र
१०-८-३३. भगवानङ्गीकृततथात्वः स्वापराधकरणात् क्रियारूपादर्शतीति युक्तमेवेति भावः ।
अत एव वचनमेव, न तु क्रिया काचिद्विरुद्धा ।

भयसम्भ्रान्तप्रेक्षणाक्षमित्यत्र, प्राकृता बाला हि ताडनभिया मातृसंमुखं द्रष्टुं न पारयन्ति, प्रभुरपि ताननुकरोतीत्यस्यालौकिकत्वेन तत्तात्पर्यमुच्यते प्रदर्शयिष्यमाणमित्यादि । मुखारविन्दे प्रदर्शयिष्यमाणं रूपं मलधर्मवाद् ज्ञानात्मकमेव । तत्साधनत्वादपि तथोच्यते । एतस्य भविष्यमाणमधिकरणं माता । अग्रे ज्ञानजननात् । तत्र च भगवति दोषारोपो विरोधी गुणः । भगवत्प्रेक्षणं ज्ञानरूपमिति तच्चेन्मातर्यागच्छति, तदा तेन ज्ञानमाविर्भवति । तच्चोक्तगुणशङ्कयेतस्ततः एव भ्रमणं करोति । न तु संमुखं निरन्तरं यशोदाविषयकं भवतीति तथा । अत एवाग्रे ज्ञानं जननीयमिति मातरमीक्षते । परन्तु प्रकर्षेण नेति ज्ञापनाय प्रशब्दो मूले । विरोधी च गुण इत्यादिनेक्षणप्रेरणायां हेतुत्वेन प्रभुतात्पर्यमुक्तम् । वस्तुतस्तु तत्कालीनमौग्ध्येनैव मोहिता नान्यत्कर्तुमशक्नोत् । तथापि स्नेहभरवशतोऽस्मिन्नर्थे विज्ञप्तिः कार्यैवेति तां कृतवती ।

तत्र सम्बोधनेन कृपालुत्वमुक्तम् । तथाहि न दान्ता अदान्ता असंयतेन्द्रियाः पुरुषा
१०-८-३४. इति यावत् । तेषामप्यासौ निरुपधिहितकर्तेत्यर्थः । मृद्भक्षणमस्मद्धितं
न भवति, मनःखेदहेतुत्वादिति भावः । अत एव हेतुरेव पृष्टः, भगवांस्तु मात्रादिसम्भावितमृदशनकार्याभावादेव हेतुविचारो न युक्त इत्याशयेनोत्तरितवान् । अन्यथा लोके बालस्वभावमेव प्रसिद्धं हेतुं जानन्ती कस्मादिति न वदेत् । तदानीं ज्ञानदित्सया तादृगीक्षणेन चैतावन्मात्रं ज्ञानमभूदग्रे सम्पूर्णं भविष्यत्येवेति हृदयम् । भगवत्प्रेरणया गन्तव्यमेवेत्यनेन पितृचरणैर्ज्ञापितम् ।

सर्वे मिथ्याभिशंसिन इत्यत्र, नैवेद्यमिति । उपासनामार्गीयैः पूजायां दत्तं नैवेद्यं तथेत्यर्थः । शुद्धान्नसम्बन्धेनेति । साक्षाद्भगवद्भक्षितत्वेनोच्छिष्टं
१०-८-३५. यदन्नं तच्छुद्धान्नपदेनोच्यते । मुक्तशिष्टान्नमुखारविन्दमध्यस्थं चर्वितं ताम्बूलमिव मुख्यमुच्छिष्टं भवति । न ततोन्यत्फलरूपं शोधकं वास्तीति तत्सम्बन्धेन तथा वाये-त्यर्थः । अन्यथा साधारणभगवत्सम्बन्धो वात्र शुद्धिपदार्थ इति न वक्तुं शक्यम् । भगवदन्तःस्थितानां पूर्णपुरुषार्थत्वेन तथाविधेन तेन कृतार्थत्वोक्तेरनुचितत्वात् । यत्त्वेते बालका इत्यारभ्य मिथ्याभिशंसिन इत्यन्तं वाक्यं तन्मर्यादामार्गपरं ज्ञेयम् । 'वशे कुर्वन्ति मां भक्त्ये'ति वाक्यात्तथैव तत्तोपरतथैव भगवतः कर्तव्यं भवतीति स्वमर्यादामतिक्रम्य भक्तेच्छानियम्यत्वाङ्गीकारात् पुष्टिमार्गीयभक्तिमार्गे भक्षणादिकं सर्वमुपपद्यते । वस्तुतस्त्वयमेव पुरुषोत्तममर्यादा यद्भक्तवश्यत्वम् । अत एवाधुनापि भाग्यवतो भक्तानाज्ञापयति भोग्यविषये[1] ज्ञानमिश्रभक्ते मर्यादाभक्तिमार्गीयभक्तेऽनवतारदशायां चानशनादयो धर्मा भगवता प्रकटीक्रियन्त इति तद्विषयाणि तथाविधवाक्यानीति ज्ञेयम् । यद्यपि यथा सर्वे ब्राह्मणा भोजयितव्या इत्यत्र सर्वपदस्य निमन्त्रितपरत्वम्, तथात्रापि रामादिपरत्वमिति नानुपपत्तिः काचित् । तथाप्याचार्यैस्तु बाला इत्येव इति वाऽनुक्त्वा सर्वपदं भगवतोक्तमिति तत्तात्पर्यमुक्तमेते बालका इत्यादिना । तत्तात्पर्यं चोक्तमेव । ज्ञानप्रकरणत्वादपि तथोक्तिरिति न भक्तिमार्गीयविरोधः शङ्कनीयः ।

यद्येवमित्यस्याभासे, अपेक्षितमिति । मुखव्यादानमित्यर्थः । विशेषेणासमन्ता-
१०-८-३६. देहीत्यपि ध्वनिः । भक्तिमार्गीयत्वमत्र विशेषः । तस्यापि यावती मर्यादास्ति यावद्रूपं वा तत्तदानमाङ्घोर्थे । अत एव सर्वात्मभावावधि ज्ञानं जातम् । अन्यथा तदतिरिक्तबुद्धीनां भगवद्विषयिणीनामपि कुमतित्वं नोच्येत ।

अव्याहतैश्वर्यं इत्यस्याभासे, कथं सर्वसंवाद इति । 'यः पृथिव्यां तिष्ठ'न्नित्यादि सर्वश्रुतिसंवाद इत्यर्थः ।

सा तत्रेत्यत्र, प्रविकृतिरूपमिति । यथा 'क्षुरः क्षुरधान' इत्याद्युपनिषद्भिस्तथा ।
१० ८-३७. सूनोस्तनौ सूनोर्विदारितं यदास्यं तस्मिन्नथ वीक्ष्येति सम्बन्धो ज्ञेय इत्याशयेनाहुः तस्मिन्नन्तर्बहिः सर्वत्रैवेति । अन्यथा तनुविशेषणत्वेन स्त्रीलिङ्गत्वापत्तेः ।

किं स्वप्न इत्यत्र । सन्ध्यपरत्वादिति । 'तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने
१० ८-४०. भवत', इदं च परलोकस्थानं च, सन्ध्यं तृतीयं स्वप्नस्थान'मिति श्रुतौ स्वप्नस्य सन्ध्यात्वमुक्तम् । एतदेहलोकमध्यपातेवेति तद्वैलक्षण्यम् । कार्त्स्न्येनेत्यादि ।

---

१. भोगविषये मू. पा. ।

स्वमसृष्टेरसत्यत्वे व्यासचरणैर्हेतुरुक्तो 'मायामात्रं तु कात्स्न्येनानभिव्यक्तस्वरूपत्वा'दिति । एतदर्थस्तु स्वमसृष्टिर्मायामात्रम्, तत्र हेतुरग्रे यस्य यादृशं स्वरूपं देशकालवस्तुसापेक्षं तथाभिव्यक्तिः कात्स्न्येनाभिव्यक्तिस्तदभावादिति । **उभयोश्चादर्शनमिति** । द्रष्टृमायिनोर्मायिकैः पदार्थैः सहादर्शननियम इत्यर्थः ।

चेतो मनःकर्मेत्यत्र, कायिकमग्रेति । उत्तमकायहेतुप्रारब्धमित्यर्थः । **परस्प-**
१०-८-४१ **रव्याघातादिति** । एकदैवैकस्यैव वस्तुनोन्तर्बहिश्च स्थितिकथने तथात्वा-
दित्यर्थः ।

विचारेपीति । मायिकानां भ्रमप्रतीतानां वस्तूनां विचारासहत्वम्, अत्र च
१०-८-४२. तद्वैपरीत्यमित्यर्थः । मायातिरिक्तस्त्वहमिति विवरणे पुल्लिङ्गनिर्देशो बुद्धिप्रकाराणां
दुष्टत्वेन गणनाच्छुद्धजीवमात्राभिप्रायेण कृतः ।

सद्योनष्टस्मृतिरित्यत्र, अनुभवस्मरणयोरिति । न संस्कारनियम इत्यर्थः ।
१० ८-४४. अन्यथा अनुभवाव्यवहितोत्तरक्षणे यत्र स्मृतिः सा न स्यात् । न चैवंविधा
सा नास्तीति वाच्यम् । बाधकाभावात् । न चोपनीतभानमेव तत्रेति वाच्यम् । स्मृतित्वोच्छेदप्रसङ्गात् । संस्कारोपनीतत्वस्य सर्वत्र वक्तुं शक्यत्वात् । न च ज्ञानातिरिक्तस्योपनायकत्वाभावान्न तथेति वाच्यम् । अप्रयोजकत्वात् । वर्तमानाभावेपि ज्ञानजनकत्वस्योपनायकत्वेन संस्कारेपि तत्सत्त्वात् । न च संस्कारजन्यत्वस्य स्मृतित्वात् नैवमिति वाच्यम् । साक्षात्प्रमाणजन्यज्ञानत्वस्यानुभवत्वेन तदतिरिक्तज्ञानत्वस्य स्मृतित्वात् कृतद्वारातिरिक्तानन्तरितत्वं साक्षात्त्वं विवक्षितम् । अत एव स्मरामीत्यनुव्यवसायस्तदुत्तरक्षणे तमेव विशेषमवलम्ब्य भवति । यथानुभवत्वसामान्येप्यनुमित्यनन्तरमनुमिनोमीत्येव प्रत्ययो न त्वनुभवामीति तथेति भावः । यद्वा । लौकिकवस्तुतत्त्वनिरूपणे नास्माकं प्रवृत्तिरिति लोके स्मृतिः संस्कारजन्यैवास्ताम् न वा, प्रकृते त्वलौकिकप्रदर्शनप्रस्तावेन तत्सम्बन्ध्यग्रेतनमप्यलौकिकमेवेति ज्ञापनाय तथोक्तिः । एतदेवात्रपदेनोच्यते । स्मृतिनाशोक्तेस्तदुत्पत्तिरवश्यं वाच्या । सा चोत्पत्तिक्षणोत्तरक्षण एव नष्टेति ज्ञापनाय सद्यःपदं मूले । अन्यथा नाशस्यानुक्तिसिद्धत्वेन तन्न वदेत् । एवं सति द्वितीयक्षणाधिकरणकनाशस्याप्राप्तत्वात्तदा 'तन्नाश इति ज्ञापनाय सद्यो नष्टस्मृतिरित्युक्तम् । तेनेदमप्येकमलौकिकं चरित्रमिति ज्ञाप्यते, आस्तिकैर्द्वितीयक्षणे लोके तन्नाशानङ्गीकारात् । एतेन भक्तिरसानुभावकत्वेन मोहने विलम्बासहिष्णुत्वं भगवत उक्तं भवति । यथा ज्यायतारार्थे गर्भसङ्कर्षणं तथेदमिति भावः । यद्यप्येवं संस्कारजन्यत्वं तदजन्यत्वं वा न सिध्यति, तथाप्यत्र कालान्तरेपि स्मृत्य-

१ तन्नाशक्षण एव तस्य नाश इति मूले पाठः ।

भावस्य वक्तव्यत्वान्नष्टसंस्कारेत्येव वदेत् । स्मृतिनाशस्य स्वत सम्भवेन तदुक्तिस्तदर्थं मोहो- क्तिश्च न स्यात् । एवं सत्यन्यथानुपपत्त्यैव तेनानुभवेन स्मृतिरेवोत्पन्ना सा चोक्तरीत्या नष्टा, संस्कारस्तु न जनित एव, भगवदिच्छाभावादिति मन्तव्यम् । एतदेवाभिसन्धायोक्तमाचा- र्यैरत्र भगवन्मतमित्यादि । किञ्च । संस्कारवादिना सर्वोत्पत्तिमन्निमित्तकारण वेनादृष्टस्यापि स्मृतिहेतोर्वक्तव्यत्व आवश्यकत्वाल्लाघवाच्च तदेवास्तु, कृतं संस्कारेणेत्याशयेनापि तन्निषेध उक्तः । न चानुभवस्याविहितत्वेन तदजनकत्वात्प्राचीनस्य तस्यानुभवं विनाऽजनकत्वात्तस्य च नष्टत्वेन सहकार्यभावात्स्मृतिरेव न स्याद् अनुभव विनापि वा स्यादिति वाच्यम् । अनुभवत- द्ध्वंसयोरन्यतरस्य सहकारित्वात् । त्वयापि सदृशादेरननुगतस्यैवोद्बोधकत्वाङ्गीकारात् । एतदेवोक्तम् स्मृतिरपीत्यादिना । नाश्यते चेति । स्वसमानाधिकरणस्वसजातीयप्रागभावास- हभूत क्रियत इत्यर्थः । न च प्रतियोग्यभावयोरेकत्राजनकत्वान्नैवमिति वाच्यत् । व्यक्तिभे- देनादोषात् । न चैकजातीयेपि तथेति वाच्यम् । ज्ञानजातीय उभयोरपि जनकत्वात् । नन्व- भावत्वेन कारणत्वे प्रतियोगिनः प्रतिबन्धकत्वापत्त्या नैवं वक्तुं युक्तम्, ज्ञानं प्रत्यभावस्य विष- यत्वेन कारणत्वान्न दोषः, संसर्गाभावत्वेन प्रतिबन्धकाभावस्य हेतुत्वेनात्र तथात्वाभावादिति चेत् । अत्राप्यनुभवध्वंसत्वेन कारणत्वान्न दोष इति तुल्यम् । अन्यथानुभवप्रागभावेत्यन्ता- भावे च सति स्मृतिप्रसङ्ग । एतच्चानुभवाव्यवहितोत्तरक्षणेपि स्मृतिमङ्गीकृत्योक्तम् । तदनङ्गीकारे तद्ध्वंसस्यैव सहकारित्वं वाच्यम्, तच्चोक्तरूपेणेति भगवन्मतानुवादग्रन्थो यथाश्रुत एव साधीयान् भवतीति सर्वं सुस्थम् । न चैव यागजापूर्वासिद्धि । श्रुत्या यागस्य हेतुत्वमुक्त मिति तदभावस्य तथा कथनायोगात् । प्रतियोग्यभावयोरेकव्यक्तिजनकत्वादर्शनाच्च । ननु घटतदभावयोः स्वसमूहालम्बिज्ञानजनकत्वं दृष्टमिति चेत् । सत्यम् । प्रति- योगितावच्छेदकधर्मस्यैव यत्कार्यजनकतावच्छेदकत्वं तत्कार्यं तद्ध्वंसेन न जन्यत इति हि नियमः । तत्र यागत्वस्यैवोभयजनकतावच्छेदकत्वान्न तथा वक्तुं शक्यम् । प्रकृतेऽनुभ- वस्याजनकत्वान्नोक्तदूषणापत्तिः । अत एवानुभूत स्मर्यत इति व्यवहारो भूतेक्तानुशास- नादतीतानुभवविषयत्वमेव तदर्थ इति ध्वंसस्यैव हेतुत्वमवगम्यते, अतीतमनुभवविषयत्वं यत्रेत्यर्थो ज्ञेयः । श्रुतिबलाद्यागेन तथा वक्तुं शक्यमिति आरोपणात्पूर्वेव कृत इति । अङ्गारोपणनिरूपणात् स तथा कृत इति ज्ञाप्यत इत्यर्थः । मोहसहित इति । शुद्धं हि जलादिकमन्ययोगेन मलिनं भवति । प्रकृते च प्रवृद्धोपि स्नेहो न निरवधि, किन्तु पुत्र- त्वोपाधिक इत्याशयेन कलिलतोचेत्यर्थः । यद्वा । पूर्वोक्तज्ञाने सति भगवति भक्षणशय- नशौचोष्णादिधर्मास्फूर्तिः सहजा । स्नेहे च सति त स्फूर्तिः सहजा । तथा चोभयोर्विरोध इति स्नेहसम्बन्धो यः कलि कलहो विरुद्धधर्मोपमर्दनमिति यावत् त लाति स्वीकरोत्ये- तादृशं हृदयं यस्या सा तथेत्यर्थः । तेन हृदि ज्ञानतिरोभावपूर्वकः स्नेहभर उक्तो भवति ।

ज्ञानं निरूप्य तदन्ते स्नेहस्य प्रकृष्टवृद्धिकथनं तत्फलत्वाभिप्रायेण। अन्यस्य तत्त्वेनानुक्तेः। अन्यथा तु ज्ञानस्य निष्फलत्वापत्तिः। अननुसन्धानेपि वैदिकसंस्कारस्यालौकिकातिशयजनकत्ववज्ज्ञानस्यापि स्नेहवृद्धिहेतुत्वमिति भावः। जातिकुलधर्मपरता मातृत्वं च पूर्वावस्था। स्नेहवर्धिन्या मायायास्तत्त्वात्स्नेहेन: सततमन्यत्यागपूर्वकं भजनमेव भवेदिति विहितभक्तौ प्रवेशः स्यात्, न तु पुष्टिमार्गीयलीलारसानुभव इत्यर्थः।

नन्दः **किमकरोदि**त्यत्र, पञ्चभिरुत्तरदाने तात्पर्यमाहुः **कर्मव्युदासस्येति**।

१०-८-४६. नेदृशं फलं कर्मणो भवितुमर्हति, किन्तु महदनुग्रहस्यैवेति कर्मव्युदासस्य वक्तव्यत्वात् तस्य चाग्निहोत्रदर्शपौर्णमासचातुर्मास्यपशुसोमात्मकत्वेन पञ्चात्मकत्वात् तावद्भिस्तद्व्युदासोक्तिरित्यर्थः।

कृष्णोदारेत्यत्र, उदारत्वोक्तितात्पर्यमाहुः **साधनफलमित्यादि**। अधिकारः

१०-८-४७. साधनम्। तस्य हीनत्वात् तज्जन्यं फलमपि तथा। अथवा। सुखसाधनरूपं वैदिककर्मणः फलं पश्वादिरूपं तथा। साध्यफलं स्वर्गादि मोक्षान्तम्। 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती'ति श्रुतेस्तथा। स परमानन्द एव चेत्तथा। तदा पश्वादि तज्जन्यं लौकिकमलौकिकं च सुखं तादृशमेव परमानन्दरूपमेवेत्यर्थः। **लौकिकवदिति**। लौकिकवत् परिदृश्यमानं परमित्यर्थः। लोके वेदे च फलात्साधनमपकृष्टं दृष्टम्। यत्र परमकाष्ठापन्नं वस्तु साधनं तत्र तत्साध्यफलस्य का वार्तेति भावः।

अस्त्वित्युक्त इत्यत्र, **फलग्रहणार्थमित्यादि**। अत्रायं भाव। पुरुषोत्तमानन्दाधिष्ठानं

१०-८-५०. ब्रह्मानन्द इति तद्योग्यत्वार्थं ब्रह्मानन्दता महदनुग्रहेण सम्पन्नास्मिन्, तदा हि सर्वत एवानन्दस्फूर्तिर्भवति। एवं सत्येतेनैव पूर्णार्थताज्ञाने पुरुषोत्तमाविर्भावः स्वस्मिन्न भविष्यतीति भक्तिरसानुभवार्थमुक्तं **बाधकमंशं त्यक्त्वा तथा प्रसिद्ध इति**। **अयुन इति**। निषेकादिहेत्वभावादिति भावः। **मोक्षदानार्थमिति**। भजनानन्दो भक्तिमार्गे मोक्षस्तद्दानार्थमित्यर्थः, न तु प्रासङ्गिकमिति। प्रासङ्गिकं प्रयोजनं प्राकट्यहेतुर्न भवितुं शक्नोतीत्यर्थः। प्रासङ्गिकप्रयोजनान्तरमाहुः **सर्वार्थमिति**। स्वरूपकीर्तिभ्यां सर्वोद्धारार्थमपि प्रकट इत्यर्थः। एतेनाप्युक्तमोक्षपदस्योक्तमोक्ष एवार्थ इति ज्ञेयम्। अन्यथा पुनरुक्तित्वप्रसङ्गात्। नन्दचरणानां यद्विषयकोधिकारो येषां वा सर्वात्मना निरोधो न कृतो भगवता ते गोपगोपीपदेनोच्यन्ते। अन्यथा वयस्यानां व्रजस्त्रीरत्नानां चाग्रे सर्वाधिकनिरोधोक्तिर्विरुध्येत। अत एव सत्सङ्गव्यतिरेकेणापीत्येततात्पर्यमुक्तम्।

कृष्णो ब्रह्मण इत्यत्र, **साक्ष्यर्थमिति**। निःसाधनजीवनिमित्तं प्राकट्यं तदधीनत्वेन लीलाकरणादिकं च ब्रह्मणि श्रुतिविरुद्धमिति शङ्कानिरासं वेदात्मक-

१०-८-५२. तत्संमत्या कर्तुमित्यर्थः। अत एव श्रुतिरप्याह, 'नायमात्मा प्रवचनेन लभ्य'

इत्युपक्रम्य 'यमेवैष वृणुते तेन लभ्य' इति, 'ते ते धामान्युश्मसी'ति 'विष्णोः कर्माणि पश्यते'त्यादि । एतदर्थस्तु **त्रिदशमदनेस्माभिः प्रपञ्चितः । तेषां प्रीतिजननं** इत्यादि । स्वेच्छया या स्थितिस्तदपेक्षयाधिको व्यापारो भगवता न क्रियत इति ज्ञापनाय 'वस प्रीतिं चर' इत्युक्तमित्यर्थः । अन्यथा[1] लीलायाः प्रीतिजननोक्त्यैव वासस्य स्वतःप्राप्त्या तत्कथनमनर्थकं स्यादिति भावः ।

इत्यष्टमोऽध्यायः ।

नवमाध्याये निवारितापीति । ननु मायाकार्याद् भगवत्कार्यं बहिर्गमनं भगवत्कृते
निवारणे सत्यपि कथं गृहकृत्ये प्रवृत्तिरित्याशङ्क्य तत्र हेतुमाहुः **पुनर्मोहि**
१०९१ **तेति** । निषेधेन पूर्वमोहापगमेनावश्यकमपि कार्यं त्यक्त्वा भगवत्परापि 'स स्मितमीक्षती मुख'मिति वाक्यात् स्मितेन पुनर्भगवता मोहिता सती तथा जातेत्यर्थः । नन्वन्यासक्तिहेतुत्वेन निरोधविरोधि पूर्वमोहनमित्याशङ्काभावायाहुः **गुणगान** इति । भगवत्कृतत्वा मोहस्य तत्कालेऽपि गुणगानार्थमेवाभूदित्यर्थः । **माहेश्मिन्नस्मि न्यपत्यम्** । विपर्यासश्चकार्यं भगवत्कृतत्वं च । तेन द्वाभ्यामुक्तमिति शेषः । तर्ह्येवंरूपतन्निषेधानुचित इत्याशङ्क्य तन्निमित्तमाहुः **ततः श्रमोऽभवदिति** । ततः श्लोकद्वयानन्तरमेकेन श्रमोऽभवदिति निरूप्यत इत्यर्थः । यत एवमतो भक्तक्लेशासहिष्णुत्वेन स कृत इत्याहुः **अत इति** । लोके धनपुत्रार्थमिति न्यायेन भगवदर्थमिदमिति ज्ञानेन माता प्रवृत्तेति कथं कोप इत्याशङ्क्य तत्र हेतुमाहुः **भ्रान्तेति** । भगवतस्तदपेक्षाभावात्[2] तथात्वात् भ्रम इति तथा । एतादृश्यैव भक्तिमार्गमर्यादेति ज्ञापनाय प्रवेदित्युक्तम् । **तान्** यष्टिग्रहणादिपदार्थानित्यर्थः । तपोऽन्तःकरणदोषापहं दुःखरूपं भगवत्प्रापकं चेत्यनुधावनयत्नेन[3] तपस्त्वमुक्तम् । अत्रापि प्रचुरदोषबुद्धिमत्त्वात्तथा । अत एवाग्रे यष्टित्यागः । सर्वात्मना दोषारोपनिवृत्तेस्तु प्रापकस्य दुःखस्य भक्तिमध्यपातित्वं नोक्तम् । अत्रायं भावः । पूर्वमेव स्वसमर्पणमकृत्वा तावत्क्लेशानन्तरं तथाकरणे कथनं विशेषो वाच्यः । स च पूर्वं यष्टिग्रहणेन क्लेशानन्तरं तत्त्यागेन चान्तःकरणगत एवेति उच्यते । एवं सति 'वार्थं मे दुश्चरं तप' इति वाक्यात् तत्कृतालौकिकविशेषहेतुस्तप इति तथोक्तम् । भक्त्यानुक्तो हेतुस्तत एव । एतदेवाभिसन्धायोक्तं **परोक्षेत्यादि** । परोक्षवादविषय एवासाक्षि चेदित्यादिनाप्युक्तः ।

दधिनिर्मन्थने काल इत्यत्र, **क्रियाशक्तेरित्यादि** । क्रियाशक्तिर्भुजयोः प्रतिष्ठिता ।
तदाधिदैविकश्चेद् । 'इन्द्रियं वै दधी'तिश्रुतेस्तस्येन्द्रियरूपं तदिति तथा ।
१०९२
वस्तुतस्तु परोक्षवादविषय एवार्थोऽनेनोक्तः । तथाहि । क्रियाशक्तेरिति पञ्चमी

---

१ लल्ग मू पा । २ भावत मू पा । ३ यने मू पा ।

हेतौ । भगवद्वियोगे[1] हि सर्वेन्द्रियगतस्तादृक् क्षोभो भयप्रतिप्रचुरो, येन तत्तदाधिदैविकस्यापीन्द्रियं क्षुभितं भवति । तदा भावविशेषैर्गुणगानं भवति । यथा व्रजरत्नानाम् । तदेतत्प्रसङ्गादुक्तं भगवत इत्यादिना ।

क्षौमं वास इत्यत्र सुभ्रूरित्यस्याभासः, **नन्वेवमतिमक्रम** इत्यादि । व्रजजनक्लेशहेतुभूतानां नाशाय दुःखप्रापणाय च मृत्युयमौ तत्राजक्षाविति कुचकम्पस्य
१०-९-३. क्लेशहेतुत्वेन तत्कर्त्री पूर्वोक्तदेवतां तौ कथं न तथा कृतवन्ताविरयर्थः । सर्वनियमनत्वेन तयोर्यमत्वम् । दिक्पालस्यात्रातथात्वमिति ज्ञापनायेदमुक्तम् । भाव्यर्थः श्रमरतस्यानङ्गीकारे तद्धेतौ न प्रवर्तेत । तथा च तदङ्गीकृत्य ममन्थेति सम्बन्धः । क्लेशे भ्रूसङ्कोचसम्भवेनात्र च शोभनत्वेन तदभावात् क्लेशाभावो ज्ञाप्यत इत्याशयेनाहुः **पर्यवसानादिति** । तददण्डः पर्यवसानं । रज्ज्वाकर्षे भुजद्वयस्यापि व्यापृतत्वं भवतीति दक्षिणवामयोर्यथाक्रम तद्रूपत्वम् । अत्रायं भावः । अस्त्यत्र क्रिया द्विविधा । भगवत्सम्बन्धिनी गार्हस्थ्यसम्बन्धिनी चेति । प्रधानत्वाप्रधानत्वाभ्यां[2] तद्रूपत्वमुच्यते । तत्तत्कङ्कणानां भक्तिमार्गीयनियमरूपत्वं कर्ममार्गीयदेवतारूपत्वम् । तदाश्रितत्वात् । सुभ्रूरितिस्वतन्त्रविशेषणत्वं सर्वेषामनुक्ताभरणकर्मत्वोक्तेस्तात्पर्यमाहुः **क्लिष्टं सर्वत्रेति** । क्लेशरूपसमानधर्मवत्त्वं सर्वेष्वस्तीति ज्ञापनाय तथेत्यर्थः । विशेषणत्वोक्तौ[3] प्रकारकत्वापत्त्या तदप्राधान्येन तत्क्लेशस्याप्रयोजकत्वात् तद्धेतुभूतमन्थनेनुचितत्वं न ज्ञापितं भवेदिति भावः । शीर्ष्णः सत्यलोकाधिदैविकरूपत्वेन तदुपरि ज्ञानिनां जीवन्मुक्तानामेव स्थानमिति तथोक्तम् । लीलामध्यपातिनां भगवदात्मकत्वमभिसन्धायैवं सर्वत्राचार्यैर्निरूप्यत इति ज्ञेयम् । प्रभौ स्नेहवतां तथैव तत्सम्बन्धिष्वपि स्नेह इति मातुस्तादृक्श्रमदर्शने तदसहिष्णुत्वेन क्षोभात् मुक्तानामपि स्वधर्मविस्मृतिर्भवतीत्याशयेन **मा लक्ष्मीरित्याद्युक्तम्** । किञ्च । सर्वमूलभूतभगवदाविर्भावस्थानत्वेन सर्वमूलभूतत्वान्मातरि तादृशधर्मे सति तत्कार्यपरंपरायां स्वत एव तादृशत्वं भवतीति भावेनापि तथोक्तम् । विपक्षे बाधकमाहुः **आकृतीत्यादि** । मन्थनोत्तयैव तदनुरूपावृत्तेरपि प्राप्तेस्तत्कथनं पुनर्मन्थनोक्तेश्च[4] तथा स्यादित्यर्थः । एवं सति विशेषस्यावश्यवाच्यत्वे मन्थनस्यानुचितत्वज्ञापनमेव विशेष इति वक्तुं युक्तमिति लोकतः परमार्थतश्च तथात्वमुक्तम् । किञ्च । पूर्वं दधिनिर्मन्थने काल इति वाक्याद् गुणगानाङ्गत्वेन मन्थनमुक्तम् । तेन मन्थनेन न किमपि क्लिष्टमभूत् । तथैव चेन्द्रमेपि स्यात् निवारयेत्प्रभु- । निरोधाविरोधात् । एवं सत्यग्रे निषेधस्य वाच्यत्वात् तद्धेतुभूतं निरोधविरोधिमन्थनमवश्यं वाच्यमित्ये-

---

१. भगवद्वियोगे मु. पा. २. तत्प्रधान- मु. पा. ।
३. प्रकारता- मु. पा । ४. -योक्तिश्च मु. पा. ।

केन तदुक्तम् । एव सति विवृतिस्तथाविधेति युक्ततरम् । अन्यथा निषेधोक्तिर्विरुद्धा स्यादित्यभिसंधायाहुः शुकवाक्येत्यादि । मन्थनसामयिकाकृतेः साधारणत्वेन विशिष्टलीलारूपत्व न सम्भवतीति 'युक्तमश्लोकलीलया गृहीतचेता' इति लक्षणं शुकवाक्यं तथा स्यादिति वा । उक्तरीतिस्तु माहात्म्यज्ञानहेतुत्वेन भक्तिजनकत्वादुत्कर्षः । पूर्ववदिति । निष्क्रमणो सवत्रदित्यर्थ ।

तमङ्कमारूढमित्यत्र, दैत्यानिति । उक्तन्यायेनाधिदैविकस्वरूपत्वादङ्कस्य भूस्थितास्तास्तथाकर्तुमित्यर्थ । मात्रा ग्रहणसम्भवेपि स्वयमङ्कारोहणस्येदं
१०९५ तात्पर्यमुक्तम् ।

उत्सिच्यमान इत्यत्र । वैदिकाग्निहोत्रादावलौकिकदोषजनकं यथा, तथा लौकिके तल्लौकिकदोषजनकमित्याशयेनोक्तं दोषजनकं चेति ।

स जातकोपेत्यत्र, तत्त्रय निवारणीयमिति । यशोदाया अपराधस्तन्निष्पादितकलोभस्य च नाशनमेतन्मारणार्थमाधिदैविकविज्ञापनं चेति त्रयम् ।
१०९१६ आधिदैविकश्चेदाध्यात्मिकं मारयेत्, सर्वांशेन मारयेत्, तथा सत्यग्रिमकार्यं न भविष्यतीति तत्तन्मारणस्य निवारणमत्रोच्यते । भगवांस्तत्कालीनापराधहेतुभूतलोभमात्रं नाशितवानिति पूर्वोक्तेन लोभं तद्गतं भाण्डं च स्फोटितवानित्यनेनाग्रिमग्रन्थेन न विरोधः । अत्रैवाग्रे त्रयमुत्पादयितुं भिन्नमिति । यथाधिदैविकेन तथा कर्तुमुद्यतम् । तथान्या यशोदा तद्गतं लोभं च भगवदेकविषयम् । तदुपभोग्यत्वेन भोगविषयान् दुग्धादींश्चान्यानुत्पादयितुं स तयेत्यर्थः । तेन क्रोधातिशयो निरूपितो भवति । तदुभयमपीति । आधिदैविकं लोभं रजोगुणं चेत्यर्थ । ननु पुत्रदुग्धयोः समानप्रीतिविषयत्वेपि नैवं संभवतीत्यनुपपन्नमिदमित्याशङ्क्य तत्रोपपत्तिं वदन्तो दधदर्शनाभेदनस्यापि तात्पर्यमाहु दैत्याविष्टेवेति । सा यशोदाग्निना पयोविषयिणी स्नेहकला प्रभुविस्मारकत्वेन दैत्याविष्टेवोद्गतेति तथागमनमभूत् । तत्रात्र 'चालौकिकप्रकारेण करिष्यन् 'सयश्च कपालानि चाग्निहोत्रहवणी च शूर्पं च कृष्णाजिनं च शम्या चोलूखलं च मुसलं च दृषच्चोपला चैतानि वै दश यज्ञायुधानी'ति श्रुतेस्तथेत्यर्थः । तच्छ्रवणे पुत्रानुसन्धानात् तथा । तत्रैव कथनमयुक्तमितीवे युक्तम् । वस्तुतस्तु भगवत्कृतो मोह एव तादृगिति तथात्वम् । अत एवास्यापि लीलात्वं [2]तथाप्यनुचितमभूदिति तथोक्तमाचार्यैः । जघास हैयङ्गवमन्तरङ्गत इत्यत्र, आधिदैविकदैत्यानामिति । मातृदर्शनयोग्ये स्थाने भक्षणे तस्याः क्रोधो भवेत् । अतो यत्र भक्षणे कृते तदनुत्पादस्तत्र तथाकृतवानिति भाव ।

---

१ चालौकिक— मू. पा । २ तथाप्यनु- मू. पा ।

मर्काय काममित्यत्र, **पूर्वमपि दैत्यावेशेनेति** । पूर्वमपि यत्सम्पादितं
तन्मर्काय यच्छतीति सम्बन्धः । तत्र हैयङ्गवगतं हेतुमाहुर्**दैत्यावेशेनेति** ।
१०.९.८. भक्तीयपदार्थस्य स्वयमनङ्गीकारात्[1] । क्रूरे विनियोगाच्च दुष्टत्वं लक्ष्यते । स चालौकिक एव दोषो वाच्यो, लौकिकस्यादर्शनात् । तदेतदुक्तं दैत्येत्यादिना । शकटदृष्टान्तेनान्यत्राप्येवंभूते दृष्टिः कार्येति नासम्भावना काचित् । **चौर्यविशङ्कितेक्षण**मित्यत्र । **तस्याश्चौर्यदोषनिवारणायेति** । पुत्रस्नेहस्नुतेति वाक्यात् भगवदेकभोग्यस्तन्यनिरोधश्चौर्यम् । तच्च तदीयवस्तुनो यथेच्छं विनियोगकरणेन सन्तोषान्निवार्यते । विशब्दस्य कालवाचित्वपक्षमादायाहु' **तस्या ज्ञानं कालेनेति** । मातृत्वं ज्ञात्वा तथा व्यवहरतीति तथा । 'पृष्ठे कृतो मे यदधर्म' इति वाक्यात्पृष्ठभागदिशि पापस्थानमिति तत्र व्याप्ता दृष्टिस्तद्विषयिणी भवत्येवेति भावेन पापदृष्टिरित्युक्तम् ।

विस्रंसितकेशबन्धनेत्यत्र, **उत्पत्तिप्रलया**वित्यादि । कशब्देशशब्दयोरुत्पत्तिलयाधिष्ठातृदेववाचकत्वात्तद्वाच्यत्वात्केशानां तयोस्तत्र सत्त्वं ज्ञायते । तत्स-
१०.९.१०. त्त्वेनैव तदधिष्ठेयोत्पत्तिलययोरपि । एतादृशान्मुक्तानां युक्तमेवाजननम् । अन्यथा स्वाधिष्ठातृसहितोत्पत्तिलयाधिष्ठानाच्च्युतिर्न स्यादिति भावः । तत इति । तादृशानां बन्धादित्यर्थः ।

न चान्तर्न बहिरित्यत्र, **किञ्च जगन्मयोय**मित्यादि । जगच्च य इत्यत्र
१०.९.१३. चकारार्थकथनमिति ज्ञेयम् ।

तद्दाम बध्यमानस्येत्यत्र, **भगवता स्वस्मिन्दोषद्वय**मित्यारभ्य **ज्ञापयितुमेवमाहे**त्यन्तम् । अत्रेदं प्रतिभाति । बहिः प्रकट एव प्रभो पुत्रव्यवहार[2]
१०.९.१५. इति तत्कृतमन्त स्थितस्याज्ञानम् । दोषारोपे बहिरनुभूयमानोप्यननुभूयमान इव भवति । दोषज्ञानपराभूतत्वाद् दृष्टेः । तदिदमुक्तमन्तर्बहिःस्थितिमित्यादिना । मूलस्थविशेषणद्वयतात्पर्यरूपं लीलापदार्थानां सच्चिदानन्दरूपत्वमभिप्रेत्य दाम्नि ज्ञानकरणे निरूपिते । ननु ज्ञानेन वस्त्वन्यथाभावाभावाद्वेष्टनमसम्भवि, दाम्नस्तथात्वे सुतरां तथेति चेत् । अत्र वयं वदामः । अत्र हि भगवान् भक्तप्राधान्येन लीलां करोति, अतो यथा मर्यादाभक्तिमार्गे भगवद्विषयकापराधे भक्तानां दण्डः कालादिभिस्तदधिकारिभिः क्रियते तथा [3](पुष्टि)पुष्टिमार्गे भक्तविषयकापराधे यथैव ते चिकीर्षन्ति, तथैव प्रभुरङ्गीकरोतीति वस्तुस्थितिः । अत्र भजनविरोधिभावजननमेवापराधः । एवं सति पुत्रवेष्टङ्गीकृते तद्धर्माङ्गीकारोपि जात इति मातृनियम्यत्वस्यापि स्वस्मिन्नङ्गीकारात्तत्स्वामिकदाम्नामपि तादृक्

१. —कारात् क्रूरे मू. पा. । २ पुत्रव्यवहार मू. पा. । ३. पुष्टिपुष्टिमार्गे मू. पा. ।

सामर्थ्यं दत्तमस्तीति तथा । इदमेवोक्तमन्यथा यदिरपीत्यादिना । एवं सति दामभि- र्नियमने दण्डसम्पत्तिर्भवति । अत्र तथाभावेऽङ्गद्वयं प्रतिबन्धकं निसर्गेश्वरत्वनिसर्गदास- त्वलक्षणं भगवत्तद्दासगतम् । न हि दासनियम्यः प्रभुर्भवति । यद्यपि मातृनियम्यत्वमङ्गी- कृतमिति तेनैव सर्वात्मना नियमनं सम्भवति, तथापि यथा भगवद्धर्मत्वेनाङ्गीकारो वलिष्ठ- स्तथैश्वर्यस्यापि तथात्वादबाध्यत्वाच्च न तथा सर्वात्मना भवितुमर्हति । उक्ताङ्गीकारात्परं तावद्वेष्टनमभूत् । भक्तेषु प्रभुनियम्यत्वस्यापि नित्यत्वात् । अतस्तथा न्यूनमभूत् । अत एव सर्वोपयोग्यङ्गमानेन न्यूनतोक्ता । अग्रे त्वीश्वरत्वेनान्यथा कर्तुं समर्थत्वात्तदेव स्वनियमने साधकं कृतवानिति वक्ष्यते कृपयासीत्स्वबन्धन इति पदेन । कृपाया ईश्वरधर्मत्वे- नैश्वर्यमेव करणत्वेनावगम्यते । अन्यथैतत्कार्यं न स्यात् । न हीश्वरादन्यः स्वस्वरूपमर्या- दातिक्रमणे[1] जीवस्वरूपमर्यादातिक्रमणे च समर्थो भवति, अस्वतन्त्रत्वात् । यथा जगत्क- र्तृत्वादेरीश्वरधर्मत्वेपि नैतादृशत्वं तथा भक्तानामप्येतदतिपौरुषमिति ज्ञाप्यते। यद्वा । बन्ध- नन्यूनतोक्त्योर्मध्ये विशेषणद्वयकथनेन तयोरुभयत्र हेतुत्वमभिप्रेतमित्यवगम्यते । बन्धने तयोर्हेतुत्वमुक्तम् । तादृशन्यूनतायामपि तयोस्तथात्वमुच्यते । विशेषणाभ्यां हि तज्ज्ञानप्रकार उच्यते । भगवांस्तु निरुपधिस्नेहेन दोषारोपाभावयुक्तेन वशो भवति । तथा च पुत्रत्वेन स्नेहः सोपाधिरिति दोषारोपश्चास्तीति वशीकरणे प्रतिबन्धकमेतद्द्वयमिति ज्ञापनाय द्व्यङ्गुल- न्यूनतोच्यते । अत एव स्वपदम् । यद्वा । स्वार्भकस्य कृतागसः इति मातृविशेषणम् । अतृप्त- स्यागावगूरणबन्धनोद्यमे कृत्वा कृतागस्त्वम् । प्रथमतोर्भकस्तत्रापि स्वस्यैव तादृशे तथा कृतिरत्यनुचितेति ज्ञापितम् । तथा चैतादृश्यास्तद्दाम तथाभूदिति सम्बन्धः । तथा च बाह्या- भ्यन्तरापराधवत्सम्बन्धित्वात्तथा न्यूनमभूदिति भावः । दामसामर्थ्ये सत्यपि भगवदिच्छया तथात्वे न्यूनं चकारेत्युक्तं स्यात् । तथा नैवमुक्त्या वस्तुस्वाभाव्यादेव तथात्वमिति बोध्यते । पूर्वापरयोर्भगवत एव सत्त्वादित्यादिग्रन्थस्याय भाव । 'एवं सन्दर्शिने'ति वाक्यात्तत्प्रदर्शनार्थमिमां लीलां कृतवानिति गम्यते । यद्यपि भक्तनिवेदितान्नवस्त्रभूषणा- द्यङ्गीकारेपि भक्तेच्छयैवेति सोपि तथा भवति, तथापि तेषामिष्टत्वाल्लोके तदङ्गीकारो न तथा तद्बोधकः । बन्धनं तु दुःखहेतुत्वेनानिष्टं लोक इति तदङ्गीकारस्मृततरा[2] तयेत्यनेन प्रकारेण प्रदर्शितवानित्युच्यते । अत एवानिर्वमावे तत्र दर्शितं भवति, किन्त्वेवंभावेनैवेत्याशयेन मूल 'एवं संदर्शिने'त्युक्तम् । किञ्च । ईश्वरे दुःखाभावेन तथा भक्तेच्छापूरणे न कोपि विशेषः सिध्यति यद्यपि, तथापि मात्रतिरिक्तभक्तानां श्रवणेपि दुःखहेतुरिदमिति भक्तदुःखहेतुकरणं भक्तिमार्गविरुद्धमिति सर्वथा पुरुषोत्तमस्याकर्तव्यं भवतीति तस्यापि करणेनातिशयेन

१. –क्रमणे मू. पा । २. –कारस्तत्तरात्त मु. पा. ।

तथात्वं बोधितं भवति । एवं सत्युदरस्य व्यापकत्वाचत्र कुत्रचित्स्थितिवद्गृत्वपृष्ठभागे पार्श्वयोश्च दाम्नः स्थितिर्न विरुद्धा । किन्तु दाम्नावच्छेद्यत्वं विरुद्धम् । तच्च तदाद्यन्तयोर्मेलने भवति । यद्यप्युक्तदेशे स्थितिवद्यथात्रापि स्थितिस्तथोक्तदेशे तन्मेलनवदत्रापि तत्सम्भवति, तथाप्यत्र स्वरूपप्राकट्यात् तद्धर्माणामपि व्यापकत्वादीनां प्रकटत्वेन स्वकार्योन्मुखत्वान्न तत् संभवति । स्वस्यैवावच्छेदकत्वे तत्साधनोच्छेदप्रसङ्गः । तथा च दाम्नोरन्तयोः मतोदरेणैव न तथा सम्भवतीति न्यूनताया आवश्यकत्वेन प्रथमातिक्रम-इति न्यायादल्पेत्यादिनोक्तहेतुना च तथा न्यूनमभूत् । अग्रे 'कृष्णः कृपयासीत्स्वबन्धन' इति वाक्यात्स्वयमेव स्वरूपमर्यादामतिक्रम्य तथाभवदित्युक्तम् । 'सर्वतः पाणिपादान्त'मित्यत्र तत्स्वाभाविकधर्मरूपवसनभूषणविशिष्टानामेव देशापरिच्छेद उक्त इति न तैरवच्छेदः शङ्कनीयः । व्यापकत्वस्येति । स्वाभाविकव्यापकत्वस्यैवानवच्छेद्यत्वे हेतोः सत्वात् कृत्रिमतःकरणमप्रयोजनकमयुक्तं चेति भावः । अल्पपरिमाणत्वेन प्रतीयमानस्यैव तदधिकपरिमाणवस्त्वमवच्छेदकाधिक्येपि सर्वत्र समानपरिमाणत्वेन प्रतीयमानत्वं च चन्द्रन प्रतिबिम्बयोरस्तीति तद्दृष्टान्तमाहुः प्रतिबिम्बादाविति । यथा द्वादशसहस्रयोजना नकत्वेपि चन्द्रमण्डलस्येतो यावपरिमाणकं तद् दृश्यते तावत्परिमाणकमेवोद्याने सरस्सरित्प्रभृतिषु च, तथात्रापीत्यर्थः । तथा सति तु पूर्ववैलक्षण्यज्ञानादशक्यताज्ञानेन भूयो योजनासम्भवोपि । इदमेवोक्तं वैलक्षण्याज्ञानादित्यनेन । यद्वा । तदैव निकटस्थमणिस्तम्भादिगतभगवत्प्रतिबिम्ब आदिपदात् तच्छायायां च पूर्ववदेवोपालम्भादित्यर्थः ।[1]

कृष्णस्त्वित्यस्याभासे, एवं स्वमनोरथ इत्यादि । अधुना चितो मातुर्गमन-
मुच्यते, अग्रे बाला ऊचुरित्यनेन तेषां तत्र स्थितिर्ज्ञाप्यते, नान्येषाम् । एवं
१०-९-२२. सत्यर्थाद्गोपीनां गमनमुक्तं भवतीति तदिदमुक्तम् । एतास्तु तादृशं तं द्रष्टुम-
क्षमा इति तादृग्गेहेपि संमुखं मुखं न कृतवत्य इति तद्गेहाद् बहिरेव प्रसन्नमुखा जाता इति ज्ञापनाय विशेषणमुक्तम् । एवं स्वमनोरथे सिद्ध इति तु मातुर्धैर्ये हेतुरुक्तः । अथवा, अधुनाप्यनाक्लिष्टप्रियास्तदभिलाषिण्यो दाम्ना बन्धनाभावं दृष्ट्वा स्वार्थे सन्दिहाना जाताः । सम्पन्ने तस्मिन्स्वमनोरथोपि सेत्स्यतीति निश्चयेनैतासामेव स सिद्ध इति तथोक्तम् ।

इति नवमोऽध्यायः ।

दशमेऽध्याये स्वमेव काल इत्यत्र, वस्तुनः परिच्छेदकत्वमित्यादि ।
नतु समवेतस्य वस्तुनो घटादेः परिच्छिन्नत्वेन तत्समवायिनो भगवतोपि
१०-१०-३०. परिच्छेदापात इत्यत आह वस्तुन इत्यादि । सर्वं ब्रह्मेति वादो सर्ववादी ।

---

१. पूर्ववदेवोपलम्भात्- मू. पा ।

तथा च सम्मते स्वस्यैव सर्वभवनसामर्थ्येन वस्तुरूपेणाप्याविर्भाव इति न तत्कृतपरिच्छेद-शङ्का भगवतीत्यर्थः । अथवा समवेतस्य परिच्छिन्नत्वेपि न समवायिनस्तथात्वं सर्वेषां वादिनां सम्मतं, शब्दस्य तथात्वेप्याकाशस्यातथात्वादित्यर्थः ।

गृह्यमाणैरित्यत्र, तेषां धर्मिणामित्यादि । भगवदग्रहणहेतौ सत्यप्यग्रह इति वक्तुं

१०-१०-३२ तद्धेतुमाहु तेषामित्यादि । तेषां घटादीनां त्वदाश्रयत्वादाश्रयस्य च सहभाननियमात्तथा भवितु युक्तमित्याशयपक्षे धर्मिणां घटादिधर्मिणामपि तथात्वाद्धर्मिसहभाननियमात्तथेत्यर्थं । यद्यप्येवं धर्मिपदमनर्थकं तथापि प्रत्येकं भिन्नहेतुकथनार्थमिति ज्ञेयम् । एव सत्यप्यग्रहे हेतुमाहेत्याहु तत्र हेतुरिति ।

इति दशमोध्यायः ।

एकादशेऽध्याये प्रकरणतात्पर्यनिरूपणे । वत्सचारणदोषस्य निवृत्तिर्वं समारणमिति

१०-११-० तन्निवृत्तिरूपं तदित्यर्थं । अनीश्वरस्यैव कर्म वत्सचारणमितीश्वरस्य तत्करणमनुचितमिति दोषबुद्धिस्तन्मारणकथया निवार्यते । न ह्यनीश्वर एवंभूतं ज्ञातुमेव हन्तु वा शक्तो भवत्यतस्तन्निवृत्तिः । किञ्च [1] । तस्यासुरत्वेपि वत्ससारूप्यतद्यूथगतत्वाभ्यां त सम्बन्धि वं लक्ष्यत इति पशुत्वेन कण्टकशर्कराक्षेत्रप्रवेशहेतुभूतमार एव निवर्तित इति ज्ञाप्यते । तथा सत्यपराध स्यादिति । एवं सति वत्सास्तच्चारणं च । तयो सम्बन्धिदोषस्येत्यर्थः सम्पद्यते । भगवदीयेषु प्रवेशस्य फलं करकमलसम्बन्ध । दोषबुद्धेः फलं स्वरूपनाश । तेन निर्दोषबुद्ध्या भक्तसङ्ग कार्यो, न त्वन्यथेति ज्ञापितं भवति । मूले[1] भक्तानिष्टनिवर्तने लोकवेदयोरगणना च । गोपालरूपेति । दम्भस्यैव लोभावृताभ्यां कृत्वान्तःकरणे भगवत्तिरोधायकत्वमिति सेवकानां सोनुचित इति तद्रूप बकं मारितवानित्यर्थ ।

दर्शयंस्तद्विदामित्यत्र, व्रजे यावद्विधा इत्यारभ्य भगवानुवाहेत्यन्तम् ।

१०-११-२ इदमत्राकूतम् । प्रभुपुत्रत्वेन सर्वेषां यथेच्छं भगवति व्यवहर्तुमशक्यत्वे सति यदि भगवांस्तत्तद्भावानुरूपं तेषु स्वयं न व्यवहरेत्तदा रूपचेष्टादिभिर्भगवदाश्लेषादिविषयक उत्कट उत्पन्नो भावः स्वविषयमप्राप्य को वेद किं कुर्यादतस्तथा करणमावश्यकम् । इमे एवं[2] वहनताडनवहने उक्ते । भगवता यत्रकुत्रचित्तथाकरणे तेषां च सर्वसमक्षं यथेच्छं करणे बालत्वेनैव लोकाविगानमपि । इदमेव बालचेष्टितैरित्यनेनोक्तम् । किञ्च । परम्पराहर्षजननं एवेयं व्यवस्था यत्र, तत्र साक्षात्स्वरूपेण येषु तज्जननं तेषां रीति कथं वक्तुं शक्येत्याशयेन बालचेष्टैरित्यस्याभासमाहुः तदपीत्यादि ।

---

१ भवति मूले । मू. पा.　२ एव मू. पा ।

करणस्य व्यापारत्वेन बालचेष्टितानामेवात्र तथात्वम्। यत्र स्वरूपमेवासक्तिहेतुस्तत्र साक्षात्तज्जननमिति ज्ञेयम्।

गोपवृद्धा इत्यस्याभासे, **सर्वदेवाधिष्ठितेति**। आधिदैविका इन्द्रादयोऽन्तरङ्गसेवका
१०-११-१०. भूत्वा तत्तल्लीलोपयोगिस्थानं सज्जीकृत्य प्रभुं प्रतीक्षन्त इति तथात्वम्।

मुक्तः कथञ्चिदित्यस्याभासे, उत्पातत्वं चेति। न स्यादिति शेषः। प्रतिकारवत
१० ११ १३ एवोत्पातशब्दवाच्यत्वादिति भावः।

वृद्धान्बालानित्यादिषु। तदा केवलं स्वोपकरणमात्रपरत्वे तामसत्वं, प्रभुत्वेन कर्यमार्गीयद्विजसहितत्वेन च राजसत्वम्। प्रमाणप्रकरणे यशोदानन्दनिरोधो
१०-११ २०. मुख्य इत्येतत्प्रकरणार्थभूतनिरोधतारतम्यज्ञापनाय सात्त्विकत्वकथनम्।

अनुकृत्य रुतैर्जन्तूनित्यत्र, तेषां दोषदूरीकरणार्थमिति। लीलाविरोधिभावप्रकटनं दोषः। अलौकिकत्वज्ञानं च तथा। प्राकृताननुकरणं च तद्धेतुः। तथा च
१०-११-२९. तदजननार्थं तदनुकरणमित्यर्थः।

पितरं जगद्गुरोरित्यत्र। तस्यैतन्निदर्शनार्थमिति। यथा गोपाल्सूनुरपि तत्पितृत्वेन परब्रह्मरूप एव, तथा प्राकृतसंघातेषु प्रतीयमानोऽपि जीवोऽक्षररूप
१०-११-४०. इति ज्ञापनार्थमित्यर्थः।

१०-११-४९. **निलायनैरित्यत्र, ब्राह्मणोपीति**[1]।

सूक्ष्मरूपेण विश्वासमुत्पाद्य प्रतिबन्धके। तेनैवापगते स्वेष्टरूपमाविष्करोति हि॥ १॥
भक्तार्तिहृतिरिष्टाप्तिः फलं तदितरेष्वपि। निरोध्येषु प्रभौ दोषारोपाभावः फलं त्विह॥ २॥
कदाचिन्निजभक्तानां पित्रादीनामनुज्ञया। सत्संगतस्तत्र लीलाः कुर्वन् कृष्णो विराजते॥ ३॥
क्वचित्परस्परं गुणानुरागवशतो वने। कथञ्चिद् भक्तसंगे सत्यनिशं रमते प्रभुः॥ ४॥
कदाचिद्भक्तपित्रादिनिषेधेऽपि निजाग्रहात्। नयति स्वेष्टदेशांस्तं चातुर्येण प्रतापवान्॥ ५॥
कदाचित् कौतुकावेशं ज्ञापयन् स्वस्य गृष्वसौ। अन्यसंगनिवृत्त्यर्थं वानरैः सहितः प्रभुः॥ ६॥
पुलिनस्थितभक्तार्थ्यै बहुधोपायकार्यभूत्। तत्स्थितप्रतिबन्धं च नाशयत्येव सर्वतः॥ ७॥
अन्यथेदभिमानेन भक्तनैकत्वमाप्नुयात्। बालभावाग्रहेणैव तमपास्य तदा स्वयम्॥ ८॥
स्थित्वानेकविधा लीलाः करोति व्रजवल्लभः। [2]स्थापयित्वान्यगमनप्रतिबन्धकमात्मनः॥ ९॥
केवलस्य गतौ तत्र साधनं विदधाति च। भक्ता हि विविधैर्भावैर्युक्ता हरिरपि क्वचित्॥१०॥
एकत्रैवाखिलान् भावान् क्रमेणोत्पाद्य तान् रसान्।
भुङ्क्ते कदाचित् प्रत्येकं तत्र तत्र स्थितस्तथा॥११॥

---

१. ब्राह्मणोपीत्यादि। मू. पा.। २. स्थापयित्वान्य- मू. पा.।

अथवैकत्र पुलिने वेणुवादनलीलया । संगतेष्वखिलान् भावरमान् सुङ्क्तेऽयुदारधीः ॥१२॥
एतदेव ब्राह्मणोर्घेत्यादिनोक्तं सुगोपितम् । एतदग्रे मूल्रूपलीलेत्यादि निरूपितम् ॥१३॥
तद्भावः प्रोच्यते सम्यक् तदनुग्रहतः स्फुट. । प्रमाणत्वप्रकरणोपसंहारेऽपि शुद्धता ॥१४॥
ब्रह्मता नोच्यते चेत् तत्सिद्धं नो भवति द्वयम्[1] । अत एव त्रयं प्रोक्तं ब्रह्मतापरिचायकम् ॥१५॥
सर्वाज्ञातस्वरूपं हि ब्रह्म पूर्वं रिरंसया । ततोऽखिलजगद्रूपं भूत्वा तत्रातिदुस्तराः ॥१६॥
मर्यादाः कुरुते लीलासिद्धचै यद्वा प्रपञ्चत । अतांतरयाश्रये भक्तिमार्गानप्यकरोद् दृढान् ॥१७॥
अशेषवेदशास्त्रोक्तफलभोगाय वेदताम् । आत्मनः प्रकटीकृत्य क्रीडतीत्यपि सूच्यते ॥१८॥
भक्ताः सर्वं परित्यज्य प्रभुप्राप्त्यै यथा रह । स्थितास्तथा चेत् कुरुते स्वयमेव[2] तदा परः ॥१९॥
यतो नान्यप्रतिज्ञेयं 'ये यथे'त्यादिनोदिता । साक्षात्स्वरूपदानेन परा लीलेयमिति यपि ॥२०॥
लीलासम्बन्धि वस्त्वत्र सर्वं भगवदात्मकम् । प्रवर्तकं यतो वेणुनादो वेदात्मकोत्र हि ॥ २१ ॥
एतत्सर्वं ज्ञापयितुमेतल्लीलात्रयं शुके । उक्तमित्युक्तमाचार्यैर्गोप्यन्वं चापि सूचितम् ॥२२॥

अग्रेऽध्यायत्रयं प्रक्षिप्तमित्युक्तम् । तत्र 'कौमारं जहतुः' 'ततश्च पौगण्डवयःश्रिता'विति युक्त सन्दर्भ इति । मध्येऽप्यकथा 'त्वेवं विहारै'रि यस्य 'ततश्च पौगण्डवय' इत्यस्य च वक्त्रा नोक्तेति ज्ञायते । अन्यथैतदध्यायत्रयानन्तरमेव कौमारत्यागं वदेत् । किञ्च, 'पौगण्डे परिकीर्तित'मिति वाक्यात् पूर्वाध्याय एव तत्प्राप्ते'स्ततश्च पौगण्डवयःश्रिता'निति वाक्यं विरुद्धं स्यात्, तदनर्थकं च । तृतीयाध्यायान्ते 'त्येवं विहारै'रिति श्लोकोऽधुना कैश्चित्पुस्तकेषु लिख्यते, तदप्रामाणिकमितोऽपि तथात्वं तेषां ज्ञेयम् । भगवत्प्रियात्तत्लीलानुवृत्तिश्चेतदनुवृत्त्यभावात् । तृतीयस्कन्धे श्रीमदुद्धवैर्द्वादशे स्कन्धे सूतेन चैतत्कथाया अकथनाच्च । 'न भारती मेङ्ग मृषोपलक्ष्यते,' 'न वै क्वचिन्मे मनसो मृषा गतिः', 'न मे हृषीकाणि पतन्त्यसत्पथ' इति ब्रह्मवाक्यविरोधश्च । ईश्वरं तत्वेन ज्ञानवतस्तत्परीक्षाकृतेर्महानर्थरूपत्वाद्, 'भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचि'दिति भगवद्वाक्यविरोधश्च । तोकेन जीवहरणमित्यादिनिरूपकस्य सदेश्वरत्वेन ज्ञानवतस्तादृग्धाष्टर्यस्यासम्भवाच्च । आचार्यैः प्रसिद्धिमात्रेण विवृतमित्यस्माभिरुपेक्षितम् ।

इति श्रीप्रमाणप्रकरणम् ।

प्रमेयप्रकरणम् ।

द्वादशेऽध्याये प्रकरणार्थोक्तौ, गोपालानां निरोध इत्यादि । एतयोर्निरोधो मुख्यतयोच्यत इत्यर्थ । मध्यमोयमिति । वयस्यानां स्वामिनीनां चाग्रिमान्निरोधादधिकस्य

1. 'द्वय'मित्यत्र मूले टिप्पणमेवम्–' प्रकरणस्य प्रमाणत्व शुद्धब्रह्मत्व च तल्लक्षणायोगात् प्रमाणाभावात् ।' २. स्वयमेव मू. पा. ।

तस्य वक्ष्यमाणत्वादेतत्प्रकरणोक्तस्तमपेक्ष्य स तयोरपि मध्यम एवेत्यर्थ । **पञ्चधैवेति ।** धेनुककालीयदावाग्निद्वयप्रलम्बनिग्रहात्मक इत्यर्थ । साधारणाना व्रजस्थानामेतेनान्त करण निरोधप्रतिबन्धकापगम उक्तः, वयस्याना सखीना तु मुख्यत्वेन निरोध एकैकेनाध्यायेनोक्त इत्याहु **उभयेषामिति ।** तत्र निमित्तमाहुः **स्नेहाधिक्येति ।** साधारणापेक्षयाधिकस्नेह-ज्ञापनार्थमित्यर्थ । प्रथम द्वादशेऽध्याय इति श्लोकः । अत्र अयमाशय । अत्र ह्यादौ लीलासम्बन्धिवस्तुस्वरूपज्ञान निरूप्यते । तदनन्तर दशात्मकलीलानुभवश्च । तथा चैवं भावोक्त्यनन्तर देहादिसर्वविस्मृतिरेव वक्तु युक्ता, सापि न तात्कालिकी, किन्तु सार्वदिकीति स्थितौ सत्या यदेतदग्रे धेनुकवधनिरूपण तत्तादृग्रूपमित्येव ज्ञेयम् । धेनुकाति रिक्ततदध्यासाभावश्चेत्यपि । अध्यासनिवृत्तौ तत्स्मृत्यसंभवात् । किञ्च । अध्यासस्य अविद्या जन्यत्वनियम इति ग्रहिल्वादिन प्रति 'तुष्यतु दुर्जन' इति न्यायेनाहु **यथाग्रहस्त दैतमेव धेनुकं तथा मानयेति ।** आवश्यकदैहिककर्मप्रवृत्तिनिमित्तत्वेन भगवद्भजन-प्रतिबन्धकत्व हि देहाध्यासे । अयमपि स्वाभीष्टभजनप्रकारविशेषानुकूलतद्वनगमनप्रतिबन्धक इति तथा । अत एव मूले 'प्रेम्णेदमब्रुव'न्नित्युक्तम् । गोपेष्टप्रकारस्य भगवदभिमतत्वमपि ज्ञापयितु सस्मितमित्युक्तम् । अन्यथा सोतिवीर्य इत्यादे कृतनराहारत्वस्य चोक्तत्वात्सम्भावितानिष्टदेशे गमनविज्ञापनं प्रेमविरुद्धमिति तदुक्तिर्विरुद्धा स्यात् । यथा तत्त्वज्ञानस्वभावादेव तदध्यासनिवृत्तिरावश्यकी, तथात्रोक्तरसानुभवस्वभावजनिततत्प्रकारविशेषोत्कटरागत-स्वेष्टलीलाप्रतिबन्धकत्वातिरिक्तस्तद्धर्मो भासमानोपि न बाधकस्तेषा विज्ञतावभूत्, अतस्त-न्निवृत्तिरावश्यकत्वात् । अन्यथा सा न स्यादेव । अत एवाग्रेस्युक्ताधिकारवत्प्राप्य फल प्राप्तव तः । एतदेवाहु **फलावधीनि** क्रियाविशेषणेन । **कालीय इन्द्रियाण्याहुरिति ।** इत्याहुरिति सम्बन्धः । **इति मतमिति न ।** आध्यात्मिकीमविद्यामित्युक्तत्वात्तादृशस्यैव देहादेरध्यासनिवृत्तिरत्र कार्या । स च लिङ्गशरीरात्मक इति प्राकृततन्निवृत्तिरेव वाच्या । सैवाध्यायान्ते निरूपिता । अत एव 'दैवोपहतचेतस' इति वक्ष्यति । लीलास्थभक्तजीवनादिक-मपि नादृष्टज यम्, अलौकिकत्वादिति ज्ञापनाय । एतदेवोक्तमाचार्ये **ततश्चेज्जीविता** इत्यनेन । देहस्य प्रारब्धजन्यत्वनियमेन तस्य च नष्टत्वेन न तज्जन्योयमिमो देह इति पूर्वस्माद्भिन्न एवेत्याहुः **पुनर्देहान्तरेति ।** 'मृत्युरत्यन्तविस्मृति'रिति वाक्यात् हरिविस्मृतेरेव तथात्वम् । तथा च विषयोन्मुखेन्द्रियाणा तद्धेतुत्वात्तथात्वमित्याशयेनोक्तं **कालीय इन्द्रियाण्याहुरित्यादि ।** एतेनैतेषा भगवद्भावातिरिक्तभावाभाव सार्वदिक इति सूचितम् । यद्यपि पूर्वमप्येतेषा तथात्वमेवासीत्तथापि यथा वाचा लीलास्थतर्वादिस्वरूप

१ भावोक्त्यनन्तरमिति पाठ । २ स्मृत्यभावादिति पाठ ।

ज्ञापितम्, तथा स्वकृत्यैतेषां स्वरूपमाधुनिकान् ज्ञापयितुं लौकिकमपि भावं स्थापयित्वा तथाकृतवान्, अन्यथा 'दैवोपहतचेतसः' इति न वदेत्, अलौकिकत्वात्, लौकिकेष्वेव तथात्वसम्भवादिति भावः ।

ततश्च पौगण्डवय इत्यत्र, दोषाभाव प्रथममित्यादि । पुरुषे हि देहे
न्द्रियप्राणान्तःकरणजीवात्मक सङ्घः । तथात्वं भगवत्यपि भासत इति तदभा
१० १२ १ वनिरूपणेन दोषाभाव उक्तः । प्रमाणप्रकरणत्वात् । तेन भक्तानामपि
तथात्वं सिध्यति । अन्यथा सत्यदानं न स्यात् । स चोक्तलीलयैवोक्तः । तथा हि । नहि जीवस्य तादृशं सर्वदैतुच पूतना तस्य च मुक्तिदत्वं वा सम्भवति । न वा स्वापकार कर्त्र्यामपि ब्रह्मादिदुर्लभपुरुषार्थहेतुकृपायुक्तमन्तःकरणमन्यस्य भवति । यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनादिति न्यायः सर्वत्र द्रष्टव्यः । न वा पूतनास्तनसम्बन्धे प्राणरक्षा सम्भवति । अत एव दुर्जरवीर्यमित्युक्तम् । अतितोषस्य प्राणधर्मरूपस्तनार्थित्वदशायां प्रवाल-मृदुङ्घ्रिस्पर्शमात्रेण शकट तथात्वोक्त्या चाप्रस्थाविरुद्धकार्यकरणेन भौतिकप्राणराहित्यमेवोक्तं भवति । तृणावर्तगलग्रहणेपि तथा । बकमुखान्तःप्रवेशेपि । स्वमुखकमलेऽखिलप्रदर्शनेनैकदैव लघुत्वगुरुत्वाभ्यां रज्जुपूरतया चेन्द्रियदेहराहित्यं ज्ञाप्यते । न हि 'यः पृथिव्यां तिष्ठन्' इत्यादिश्रुत्युक्तधर्मवत्तेन्द्रियं देहो वा सम्भवति । न हि देहे लघुत्वगुरुत्वे एकदैव सम्भवतः, तावद्वा मानं वा । उक्तन्यायोनुसन्धातव्यः । एवं सति देहाद्यभावेन तदध्यासादेरप्यभावादुक्तगुणैश्च निर्दोषपूर्णगुणविग्रहरूपत्वं सिद्धम् । तेन दोषाभावज्ञापककालाभिमानि यस्ता इति पूर्वं ता एव निरूपिताः । अत्रैव श्लोके सखिभिः सममित्यत्र, गोरक्षा धर्म इत्यारभ्य नोपपद्येरन्नित्यन्तम् । ननु गोरक्षा हि वर्णधर्मः । तथा च भगवत्सत्यप्रामाना तदपेक्षाविशेषात्सम्भावितानाविर्भावनुपपन्नमिति चेन् । अत्रायं भावः । 'अधिकं तत्रानुप्रविष्टं न तु तद्धानि'रिति न्यायेन स्वाभाविकधर्मान् स्थापयित्वैव सत्यं दत्तवान् प्रभुरिति मन्तव्यम् । अन्यथाग्रे दैवोपहतचित्तत्वं विषपानेन चान्यथाभावो नोपपद्यते । अत एव स्वाभाविकपूर्वसर्वधर्मनिवृत्तिर्विषपानकार्यव्याजेन भगवता कृते युक्तम् । एवं सति सत्यस्य फलपर्यवसायित्वार्थं स्वकर्तव्यं गोरक्षणं तं कारयति प्रभुः । सान्ये प्रामाना प्रभुकर्तव्यकरणस्यैव स्वधर्मत्वात् । अन्यथा तदकरणेन स्वाभाविकधर्मस्थचित्तमितस्ततो भ्रमद्भगवन्माहात्म्यग्रहणाक्षमसद्भगवल्लोकदिदृक्षामपि न जनयेदिति तद्दर्शनमपि न स्यात् । समर्पणे कृतेपि प्रभुश्चेन्न मनुते, तदा न तत् सम्पद्यत इत्यात्मीयत्वनाङ्गीकारे सत्येव तत्सम्पत्तिः । इह तु तदर्थं स्वगृहप्रकटनेनात्मत्वमेव भगवाननेषु मनुत इति ज्ञायते । तेन अस्य आत्मसमर्पणरूपत्वम् । इदं तु साधनरूपम् । अतः साधनप्रकरणे निरूपितम् । फलरूपं तु फलप्रकरणे निरूपयिष्यते ।

साधनरूपनवविधभक्त्यनन्तरं हि फलरूपाणि तानि नवापि भवन्ति । अतः साधनप्रकरणान्ते निरूपितम् । पुण्यमर्तावित्यत्र, पूर्वमवोचामेति । 'या वै लसच्छ्रीतुलसी'ति श्लोक इत्यर्थः ।

तन्माधवो वेणुमित्यत्र, लक्ष्म्या सह क्रीडां कर्तुमिति । व्रजसीमन्तिन्य
एवात्र लक्ष्मीपदेनोच्यन्ते । एकवचनं तु दिवा कथञ्चित्तथैव सम्भवतीत्या-
१०-१२-२. शयेनोक्तम् । अत्रैव शब्दब्रह्म च संवादार्थमिति । अत्र हि स्वच्छन्दविहारार्थं वनप्रवेश उच्यते । स चामर्यादारूप इति मर्यादानिरूपकशब्दब्रह्मणा विसंवादादप्रामाण्यं स्यात्तन्निरासाय तल्लीलास्वरूपनिरूपकं शब्दब्रह्म प्रकटयति । एवं सति यत्र प्रवर्तकशब्दस्यैव मोक्षादिविस्मारकत्वम्, तत्र तद्विषयस्य कीदृशत्वं वाच्यमिति कैमुतिकन्यायप्रदर्शनार्थं वेणुपदव्युत्पत्तिकथनम् । वेदे चातथात्वं स्फुटम् । इदं च स्वतःपुरुषार्थरूपम् । फलाविसंवादि च । तेन प्रमाणोत्तमत्वं सूचितम् । तथा चायं मार्गः पुष्टिरूप इति मर्यादामार्गीयप्रमाणाविषयत्वं युक्तमिति भावः । कुसुमाकारं वनमित्यत्र, रजसैव विहार इति । रसोद्दीपिका सामग्री रजःशब्देनोच्यते । यथा रसशास्त्रसिद्धा लौकिकी रीतिः, तथात्रापीति ज्ञापनाय । अत्रैव सत्त्वप्रधानैवेति । 'सत्वात्संजायते ज्ञान'मिति वाक्याद्रसस्वरूपज्ञानपूर्विकैव लीलेत्यर्थः ।

१०-१२-४. स्पृशच्छिखान्वीक्ष्येत्यत्र, तान् उद्धृतान् दृष्ट्वेति । निरुद्धान् इवेत्यर्थः ।

अत्रैव तमोपहत्यै तरुजन्मेत्यत्र, तरुत्वदोषनिवृत्त्यर्थमिति । अत्रायं भावः ।
तमसोऽज्ञानहेतुत्वेन ज्ञानविरोधित्वाच्च कदाचित् स्वसमीपे भगवत्यागते
१०-१२-५. स्वसम्बन्धिपत्रपुष्पफलाद्यपेक्षायां च सत्यां पूर्वोक्तदोषेणेदमज्ञात्वा न प्रकटयेयुः स्वजातिस्वभावेन स्वस्वकाले एव च प्रकटयेयुस्तदापराधः स्यात् । अत्र तादृक्तरुजन्मवैयर्थ्यं च । अतस्तमोनिवृत्तावज्ञानस्यापि निवृत्तेर्यथोचिता सेवा भवतीति तन्निवृत्तिः प्रार्थनीया, न तु तरुत्वस्यापि, परमेष्टत्वादिति ।

एतेऽलिन इत्यत्र, वृक्षापेक्षया किञ्चित्समीचीना इति । देवापेक्षया
मुनीनां तथात्वं स्पष्टम् । वाचनिकं भजनमनुपथं च भजनं रसविशेषोद्दीपकत्वं
१०-१२-६. चाधिकमेतेषु तेन तथा ।

एवं वृन्दावन इत्यस्यावतारिकायां, तत्र प्रथमं धर्ममाविष्कुर्वन्निति । अत्र हि
भगवद्दास्यमेव मुख्यो धर्मः । स च वृक्षाणां भगवता निरूपितः । तथा
१०-१२-९. चैवं 'वृन्दावने पशून्संचारयन् रेमे' इति वाक्येन पूर्ववाक्यानां सम्बन्ध इति तादृशधर्मप्रकटनपूर्वकं रमणं महावाक्यार्थो भवति । स्वयं पशुचारणे क्रीडायां प्रति-

बन्धः स्यादिति तदभावाय भगवत्कार्यं स्वयं गोपाः कुर्वन्तीति पशुचारणमपि सर्वथेति स्वधर्म एव, वैश्यानां चायं धर्मो गवन्यैवेत्यर्थः सगाज इति भावः ।

वृक्षमूलाश्रय इत्यत्र, वृक्षस्य मूलमेवेत्यारभ्यातल्पेषु शेत इत्यन्तम् ।

१०-१२-१६. गोपोत्सङ्गोपबर्हणस्य तल्पेषु शयानस्य वृक्षमूलाश्रयत्वमनुपपन्नमित्येवं व्याख्या । न च तत्र तल्पस्थित्या तथात्वमुक्तमिति वाच्यम्, भगवद्विशेषणत्वानुपपत्तेः । एवं सति विवक्षितार्थस्यातिगोप्यत्वेन परोक्षवादेनोक्तिरियं श्रीशुकस्येत्याचार्यैरपि तथैवोच्यते । तथा हि इमानि वृक्षमूलानि स्वप्रियाभ्यः सङ्केतितानि, गोपाश्चान्तरङ्गाः प्राप्तसख्या इत्युभयानुगुणकार्यकर्तारोऽत उक्तमूलेष्वेव तद्रचनां कृतवन्तः । तथा च सङ्केतानन्तरं नायिकान्तःकरणानि तत्रैव सन्तीति तेषु तथात्वेनोक्तिः । गुप्ततया स्थितिरित्यतीन्द्रियत्वम्, सर्वपरित्यागेन मानसोत्कटभावप्राधान्येन च परमहंसत्वम् । रहःसन्देशवाक्यानामतिगोप्यानामुक्त्या चर्वितत्वम्, अत एव परमरसमुक्तम् । प्रियवियोगवत्त्वेन योगित्वम् । शयन उपबर्हणस्य प्राथमिकत्वेन तथैव वक्तुमुचितत्वेऽपि यदन्ते कथनं तेन रतिश्रान्त्या पश्चाच्छयनं तदत्रोच्यत इति ज्ञायते, अन्यथोपबर्हणस्य तल्पान्तर्गतत्वेन तेनैव तत्प्राप्तेर्गोपोत्सङ्गो नोच्येत । एवं सति तदुक्त्या तल्पान्तर्गततद्भावः सूचितो भवति । स च विविधबन्धैरेव भवतीति तदन्ते श्रमापनोदनार्थमन्तरङ्गगोपास्तथा कृतवन्तः, तदा तेषामेव प्राधान्यम्, न नायिकानाम् । इदमेवाभिसन्धाय तेषु भगवतः प्राधान्यस्थापनमित्याद्युक्तमाचार्यैः **परोक्षवाद** इति । स्मरयुद्धं नियुद्धपदेनोक्तवान्, अन्यथा पूर्वोक्तरीत्या शान्तरसो नोक्तः स्यात् ।

अन्ये तदनुरूपाणीत्यत्र, भगवति सर्वं सम्भवतीति । भक्तिमार्गे विरोधस्फूर्त्या अभावात्तत्कृतो मनोजत्वपरिहारोऽनुपपन्न इत्यत आहुः महात्मन इत्यस्य

१०-१२-१८. तात्पर्यं **भगवती**त्यादिना । यथा रोदने यथा वा मे सर्वज्ञत्वेन जानन्नपि भक्तपरीक्षार्थमसन्तमपि भक्तदुःखहेतुं कालीयह्रदे प्रदर्शितवान् । तथाविधा लीला न गीतेत्यर्थः ।

एवं निगूढात्मगतिरित्यत्र, स्वकार्याकरणमेवात्र निगूढत्वम्, तेन तद्विपरीत-

१० १२-१९. कार्यसम्भवोऽपि । अत एव पूर्णशृङ्गाररसात्मत्वं संगच्छत इति दिक् ।

विद्यन्तेऽभुक्तपूर्वाणीत्यत्र । केचिदिन्द्रियस्वरसोद्भावनम् । तद्बीजं तु गन्धविशेषेणेष्टरसानुमानात्कामः सम्भवति । अत एव गन्धलोभितचेतसामिति वक्ष्यन्ति ।

१०-१२-२५. उक्ततद्धर्मैश्चौर्यसम्भावनापि नेति ।

तं गोरज इत्यत्र, **गावोऽत्र धर्म** इत्यादि । धर्मस्य वृषरूपत्वेन गोजातीयत्वाद्गो-

शब्देन धर्मोत्रोक्तः । धर्महेतुत्वेन वा । अर्थस्य धर्मसाध्यत्वेन तत्सम्बन्धित्वा-
१०-१२-४२. द्विक्षेपहेतुत्वेन च रजोरूपत्वान्मदहेतुत्वाच्च रजःपदेनार्थ उक्तः । निष्काम-
स्यान्यसम्बन्धासम्भवात्कामे सत्येव तथात्वाद्व्याप्तिः कामः । 'स नैव रेमे, तस्मादेकाकी न रमते, स द्वितीयमैच्छत्स हैतावानासे'ति श्रुतेः । 'तत्सृष्ट्वा तदेवानुप्राविश'दिति श्रुतेश्च कामेनैव सर्वरूपेणाविर्भूय सर्वं व्याप्तवानिति च तथा । केशाः सदा' बद्धास्तिष्ठन्ति, अलकाः सदैव मुक्ता एवेति तथा । दूरमिव गतानां मानिनीमनसां स्वशोभातिशयेनाकार्येव स्वरूपानन्ददातार इति च मोक्षस्थानीया इति भावः । तत्तद्दर्शनेन सा सा लीला साक्षादनुभूतेव भवतीति निगर्वः । अत्रैव कुन्तलाश्च कामरूपा इत्यादि । उत्तमरसभोक्तृदर्शने स्वस्यापि तद्भोगेच्छा लोकसिद्धा । प्रकृते च भ्रमरतुल्या एते मुखाम्बुजरसं परितश्चकासत इति सद्रसस्फुर्भावोद्दीपका इति कामरूपाः । गवां सदा भगवत्संगतत्वेन प्रियस्मारकत्वात् कदाचित् तासामन्यादर्शनसम्पादकत्वेन रसानुभवहेतुत्वात्तानुभावकत्वम् ।

१०-१२-४५. मध्ये त्वधिकारिदेवैरिति तु परोक्षकथनं वेदितव्यम् ।

त्रयोदशेऽध्याये प्रकरणतात्पर्योक्तौ, **परीक्षेवेन्द्रियाणा**मित्यादि । ननु
कालीयस्य भक्तापराधित्वेन निग्रह उचितः । तं नागभोगेत्यादिनोक्तलीला
१०-१३-५० त्वयुक्ता, उत्पाताश्चानुपपन्नाः, वस्तुतो हेत्वभावादित्याशङ्क्य तत्तात्पर्यमाहुः **परीक्षे**त्यादिना । कृतो निरोधः सम्पन्नो न वेति परीक्षैवास्मिन्नध्याये निरूप्यत इत्यर्थः । अत्रोपपत्तिं वदन्त एव तं नागभोगेत्यादितात्पर्यमाहुः **इन्द्रियाणां हीति** । हि यस्माद्धेतोस्तन्निग्रहं परीक्षार्थं हरिः कुरुते इति सम्बन्धः । मृत्योरप्यधिकपीडाजनको दण्डो निग्रहशब्देनोच्यते । भगवतः स्वेन्द्रियकार्याप्रकटनमात्रमेव गोकुलवासिनां तादृशं पूर्णे निरोधे भवेन्नान्यथेति तज्ज्ञापनार्थं तथा मानं प्रदर्शितवानित्यर्थः । उत्पातोपपत्तिमाहुः **ततो देव** इति । देवपदेनाधिदैवरूपः काल उच्यते । स च भगवद्रूपः स्वयमाध्यात्मिकाधिभौतिकौ प्रेरितवानित्यर्थः । अत एव **त्रिविधा** इत्युक्तम् । **पुरुषाय महात्मन** इत्यस्याभासे, ततः **सर्वोत्तमोपी**त्यादि । यद्यपि सर्वोत्तमस्तथाप्ययं नन्दगेहे जातो, न तु नृसिंहवत्स्वयमेव प्रकटः । तथा च जननं गर्भादिसापेक्षमिति पुरुषोत्तमत्वमनुपपन्नं स्यादिति तदभावाय पुरुषोत्तमत्वं पदद्वयेनोपपादयतीत्यर्थः ।

अपराधः सकृद् भर्त्रेत्यत्र, यद्यपीत्यादि । पालकत्वेन साम्प्रतं सात्त्विकेष्वेव कृपा,
न राजसतामसयोरतस्तयोः स्वकार्यकरणेऽनवसर इति तत्करणमपराधस्तथापि
१०-१३-५१. तयोरपि भवानेव पतिरिति सोढव्य इत्यर्थः ।

चतुर्दशाध्याये प्रकरणतात्पर्योक्तौ, इन्द्रियप्राणयोर्दोष इत्यादि । क्षुद्बाधैः

प्राणधर्मत्वेनात्र चाग्नेः निवृत्युक्त्या प्राणदोषनिवृत्तिरेवोच्यते । कालीयकथया
१० १४ ०. सह कथने हेतुः सदैव हीति । अन्यतरदोषसत्त्वेप्युभयकार्यावश्यंभावेन तथा । महतो गरुडस्यापि प्राणदोषादेव शापप्राप्तिर्यतोतः सर्वथा निवर्तनीय इति ज्ञापनाय पूर्वं प्रासङ्गिकी कथेति भावः । कालस्याप्यगम्यस्थलकर्ता, तद्भयरहितस्यापि भयहेतुश्चेत्यद्भुतकर्ता, मत्स्यरक्षार्थं भक्तापराधे कृते भगवता स तत्रानीतो येन तत्सर्वनाशोऽभूदित्यप्यद्भुतं कर्म । किञ्च, गरुडस्य प्रभुविहारस्थानत्वेनैव तत्रत्यजीवमात्रापीडनेन शापप्रयुक्तखादनाद्यभावात्सौभरेरपि भक्तापराधदोषनिवृत्तिः । सर्पस्थितितद्विषकार्यादिषु शापस्यैव मूलत्वात् तदुद्वासनादिनापि तथा । यमुनाया अपि दोषनिवृत्तिरनयैव लीलयेति ज्ञापनाय प्रासङ्गिको कथेत्यर्थः ।

अत्र प्रविश्येत्यत्र, इदमनुवादकमिति । सर्पप्रवेशे तीरगानां विषेण तथात्वं
१० १४ ११. स्वत एव भविष्यतीति तदनुवादकत्वशङ्का[1] । अन्यथा विषप्रवेश एव न स्यादिति भाव ।

पञ्चदशेऽध्याये प्रकरणसन्दर्भे, अन्तःकरणदोषश्चेति । तिष्ठतु स्नेहवार्ता दूरे,
१०-१५ ०. लोके लौकिकानामपि क्रीडादिष्वप्यारोहणादेर्निमित्ते जातेपि प्रभुपुत्रादौ न तत् कर्तुमन्तःकरणप्रवृत्ति सम्भवति । इह तु स्नेहवतामप्यनेवंभाव उच्यत इत्यवश्यमन्तःकरणे तादृशो हेतुरस्तीति मन्तव्यम् । प्रलम्बे हते भगवत्यलौकिकत्वबुद्धि पूर्वस्मात् स्नेहातिशयश्च जातो येन आशीर्दानं विह्वलचेतस्त्वं चाभूदतः सुप्रसन्नमन्तःकरणेत्यादि ।

कूजत्कोकिलसारसमित्यत्र, कूजिते परपुष्ट इति । पूर्णे रसे हि कूजितोद्गमः ।
१०-१५ ७. स च न विवाहिते पुंसि भवति किन्तु परस्मिन्नेवेति कूजिते परपुष्टो भावोपेक्ष्यते । कोकिलश्च पूर्वं काकपोषित इत्येतत्साम्येन कोकिलोक्त्योक्तोर्थो व्यज्यत इत्यर्थः ।

षोडशेऽध्याये, अजा गावो महिष्यश्चेत्यत्र, ते हि वर्षद्धा इत्यादि ।
१० १६ २. 'ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री'त्यनुशासनादत्र स्त्रीप्रयोगादतरुणत्वं ज्ञाप्यत इति तथा ।

सप्तदशाध्यायार्थकथनं, लीला सप्तदशेऽध्याय इत्यादिना । ननु सर्वा लीला
१० १७ ०. निरुद्धभक्तसहितेत्यत्र को विशेष इति चेत् । उच्यते । प्रलम्बवधदवाग्निमोचनाभ्यां वयस्यानां तदुक्तच्छ्रवणेन व्रजस्थाना च पूर्वस्माद्विशिष्टा

1. तदनुवादत्वशङ्का मू. पा. ।

भगवदासक्तिरेव विशेष इति। अपरश्च। निरुद्धभक्तसाहित्यं प्रभोरनुक्त्वा लीलया यदुक्तं तेन दिवा स्वामिनीनामिव रात्रौ वयस्यानामाधुनिवयात्यासक्त्या मिथो भगवल्लीलागानेन तद्भावापत्तिरेव जाता। एवं सति प्रभुर्यां यां लीलां करोति, सा सा गोपानां हृदये तिष्ठतीति ज्ञाप्यते। सर्वतत्त्वमिति। लीलामध्यपातिनां सर्वेषामित्यर्थः। नन्वितः पूर्वमपि तयोर्भूतत्वादस्माद् ग्रीष्मात्पूर्वमेवैतयोः कथं न निरूपणं, तत्राहुः दोषापगमन इति। सत्क्रीडेति। मारणार्थमपि दैत्यासम्बन्धिनीत्वात्केवलानन्दरूपत्वमेव क्रीडायाः सत्वम्। प्राजापत्य इति। 'यो वै सप्तदशं प्रजापतिं यज्ञमन्वायत्तं वेदे'तिश्रुतौ यज्ञात्मकप्रजापतेः सप्तदशत्वमुक्तमिति तत्समानसंख्याकेध्याय इत्यर्थः।

तत्संगदोषो न भवेदिति। गोपालानां प्रभावत्यासक्त्या रात्रावपि निरन्तरं गुणगान

१० १८-१. एव क्रियमाणे मात्रादयः स्नेहाज्जागरणस्य दुःखत्वं ज्ञात्वा कदाचिन्निवारयेयुस्तासां प्रभावनासक्तिर्भ्रंश्येत्। एतल्लीलाद्वयश्रवणेन माहात्म्यज्ञानपूर्वकः सुदृढ स्नेहो जातस्तासामपीति तासामप्येतदेव रोचत इति न प्रतिबन्धकत्वं स्यादित्यर्थः।

सर्वसत्त्वगुणोद्बोधाद्वेति। अप्राकृते भगवद्धर्मात्मके सत्त्वे यथा भगवदाविर्भावेंऽशावतारे

१०-१७ ३ तथा सच्चिदानन्दात्मकतल्लीलाया अपि तत्रैवाविर्भावः। एवं सति सर्वेषां लीलापदार्थानां सम्बन्धी यः सत्त्वगुणस्तस्याविर्भावे तदधिष्ठेयानामपि तत्राविर्भावाल्लीला सम्यक् सम्पद्यत इति कार्यतो लीलोपयोगित्वं प्रावृषः। सत्त्वव्यवधानेन जीवानां साक्षात्प्रभुसम्बन्धाभावमाशङ्क्याहुः तदा भगवानिति। धर्मेण साक्षाद्धर्मिभिरपि क्रीडिष्यतीत्यर्थः। एतान्येवेति। अप्राकृतानि भगवद्धर्मरूपाणीति ज्ञेयम्।

दिव्यानिति। अस्याः पूर्वं संभृतिरूपत्वमुक्तम्। सा न लौकिकी, किन्तु लोकेप्यलौकिको यः स्वर्गो लोकस्ततोप्यलौकिकी सच्चिदानन्दरूपत्वादिति ज्ञापयितुं स्वर्लोकं ज्ञापयितुं

१०-१७-४. स्वर्लोकसमसंख्यैः श्लोकैरुच्यत इत्यर्थः। तेनेतरलीलातोपि वैलक्षण्यमायाति। सान्द्रेत्यादि श्लोकसंख्यातात्पर्योक्तौ, एकविंशो वा इत इत्यारभ्य एकविंश इति चेत्यन्तम्। यथास्माल्लोकाद्विलक्षणः सुखरूपो वेदैकसमधिगम्योऽत एव अलौकिकश्च स तथा अयमपीति ज्ञापनाय तत्संख्यासमानसंख्याकैः श्लोकैरुच्यत इति भावः।

अष्टौ मासान्, तडिस्वन्तो महामेघा इति श्लोकद्वयेपि वृष्टिनिरूपणेऽन्यतरवैयर्थ्यमिति

१०-१७-५-६ शङ्काभावाय तद्भेदकं रूपमाहुराभासाभ्याम्। तत्संबन्धिनं सूर्यं निरूपयतीति, सूर्योपरिश्लोकयोरित्यादि च।

तपःकृशेत्यत्र। ननु 'न यत्र चण्डांशुकरा विषोल्बणा भुवो रसं शाद्वलितं च गृह्णत'

१० १७ ७ इति वाक्यविरुद्धं भूमेस्तपःक्लेशादिकथनमिति चेत् । नैवम् । दृष्टान्तेनैवे तन्निरासात् । तथा हि । पूर्वमप्राप्ततापोऽपि कामितफलप्राप्त्यर्थं विहितं स्वयमुद्यम्य हि तपः करोति पुरुषस्तद्विना तदसम्भवात् । तथा तरणितापाभावेऽत्यार्द्रायां वृष्टिजलाप्लुतायां सुप्युप्तं बीजमपि नश्यत्यतो येषु क्षेत्रेषु तापापेक्षा तेषां क्षेत्राणां रसं रविकरा गृह्णन्त्येव । तदपि न स्वस्वभाववशात् किन्तूक्तदृष्टान्तन्यायेन गोपालानां विशेषतस्तदिच्छयेति मन्तव्यम् । अत एव ग्रीष्मवर्णने भुवो रसस्यैव ग्रहणमुक्तम्, न तु जलस्यापि। रसशब्देन चात्रोत्पत्तिहेतुभूतार्द्रतोच्यते । एतेन व्रजजनेच्छानुरूपमेव कार्यं भवति, नान्यदिति ज्ञापितं भवति । एतदेव हृदि कृत्वा **तपसा शापितदेह** इत्याद्युक्तमाचार्यैः ।

निशामुखेष्वित्यादिश्लोकपञ्चकाभासोक्तौ, **एवं लोकत्रयस्येत्यादि** । द्वादशमासा
१० १७ ८. इति श्रुत्युक्तैकविंशतिपदार्थपूरकचतुष्टयं निरूप्यत इत्यर्थः । अग्रे च पञ्चर्तव इति श्रुत्युक्तपञ्चर्तुरूपतोच्यते । द्वादशसु मासेषु प्रत्येकं मासद्वयात्मकत्वेनर्तूनां षोढात्वे सम्भवति पञ्चत्वनिरूपणं यत् तत्तात्पर्यमाहुः **ऋतवो धर्म इति** । अग्निहोत्रदर्शपौर्णमासचातुर्मास्यपशुसोमा वैदिका धर्माः पञ्च । ते च 'वसन्तेऽग्नीनादधीते'त्यादिश्रुतिभिर्ऋतूनेवाधिकृत्य विहिताः । तथा चोक्तधर्माधेयर्तुविभाग इति ज्ञापनाय तत्समानसंख्याका एव ते निरूप्यन्त इत्याशयेनाहुः **ऋतवो धर्म प्रतिष्ठिता इति** । प्रतिष्ठितत्वं तत्रोपयुक्तत्वं तन्निमित्तत्वमिति यावत् । वसन्तादिपूपनयनाग्न्याधानज्योतिष्टोमादीनां वर्णभेदेन यागभेदेनापि विधानात्तथा । मासानां द्वादशत्वे हेतुमाहुः **मासा धर्मिष्विति** । धर्मिणो वैदिकधर्मकर्तारः पुरुषास्ते चोक्तधर्मसमुच्चिताः षट् भवन्ति । सकामनिष्कामभेदेन तेऽपि द्विविधा इति द्वादशविधत्वम्, द्वादशाङ्गत्वेनापि तथा । तेषां चायुः कर्मानुष्ठाने साधनम् । तच्च संवत्सरैर्मितमिति तेषामपि द्वादशमासात्मकत्वमित्याशयेनोक्तं **मासा धर्मिष्विति** । अग्रे जलस्थलौकस इत्यादिद्वादशसु श्लोकेषु जीवादयो द्वादश धर्मिणो ये वाच्यास्तेऽपि धर्मिपदेन सगृह्यन्ते । निशामुखेष्वित्यादिश्लोकप्रतिपाद्यानर्थान् क्रमेणाहुः **अर्थः शब्द** इत्यादिना । वेदो हि धर्ममूलम् । तत्र वर्णाश्रमधर्मा अर्थः, तत्प्रतिपाद्यत्वात् । अध्ययनं शब्दः, शब्दग्रहणात्मके तस्मिंस्तस्यैव मुख्यत्वात् । निषिद्धं कर्मफलम् । निषिद्धफलप्राप्तौ बाधा सम्पत्तिस्तन्नो मदत्यागे । अत्र पञ्चस्वपि श्लोकेषु हीनदृष्टान्तोक्तितात्पर्यमाहु **पुष्टिमार्ग इति** । पुष्टिमार्गे मर्यादामार्गादिलक्षणं ज्ञापयितुं तथोक्तिरित्यर्थः । तर्हि धर्मप्रतिष्ठामाहात्म्याभासः कथं संगच्छते । इत्थम् । लौकिक्यां सृष्टौ पापेन यथा पाषण्डधर्माणां प्रकाशो, न वैदिकधर्माणाम्, तथात्र प्रावृट्गद्यजधर्मरूपं यत्तमस्तदन्यत्पापम् । खद्योतप्रकाशातिरिक्तः पाषण्डधर्मप्रकाशश्च, चन्द्राद्यप्रकाशातिरिक्तो वैदिकधर्मा-

प्रकाशश्च नास्तीत्यर्थः । इदं च प्रावृषः शोभाकरं, तेन पूर्णो वैदिको धर्मोऽत्रास्तीति ज्ञापितं भवति । एतेन लीलासृष्टिस्वरूपज्ञापिकेयं प्रावृडित्युक्तं भवति । अत्रत्यानां क्षुद्राणामपि प्रकाशोऽधुना लीलानुपयोगिनां महतामप्यप्रकाश आवरकस्य प्रकाशनत्वं चेति वैलक्षण्यं च । किञ्च । परोक्षवादेन मर्यादामार्गादन्यदपि वैलक्षण्यमत्र ज्ञाप्यते । तथा हि । खे आकाशे द्योतः प्रकाशो येषां ते तथा । गतिमतामेव च तेषां द्योतः । सोपि न दिवा, किन्तु तमस्येव । एवं सत्येतत्समानधर्माण्यो भगवदर्थमभिसारवत्यः स्वामिन्यो लक्ष्यन्ते । तासां भानं शोभा निष्प्रत्यूहं भगवत्प्राप्तिरेव । अत एव निशामुखेष्वित्युक्तम् । प्रियप्राप्त्यनन्तरमलौकिकचन्द्रस्यैव प्रकाशनात् । अन्यथा तमसां भान्तीत्येतावदेव वदेत् । ग्रहो ग्रहणं पाणिग्रहणं यासां तास्तथा । परोक्षवादत्वान्न पाणिपदोक्तिः । नहि तादृशं प्रत्यभिसारः सम्भवति । अत एव न भान्ति । गृह्णन्तीति ग्रहास्तद्वेषणेन तन्निवारकास्तत्पुरुषा इति वा । एवं सति यथा मर्यादामार्गे निषिद्धेनाभिसारेण तानि पापस्य खण्डानि, 'लिङ्गं खण्डमिहोच्यत' इति वाक्यात् । तज्ज्ञापकमत्युग्रं दुःखं प्राप्नुवन्ति, न तु सुखम् । तथात्र । तेन मुक्तानामपि दुर्लभं सर्वश्रुतिमृग्यं भगवत्संगं प्राप्नुवन्तीति महदेव वैलक्षण्यमिति भावः । इदमत्राकूतम् । 'स वै पतिः स्यादकुतोभयः स्वयमि'ति 'त्वक्श्मश्रुरोमनखकेशपिनद्ध'मित्यादिवाक्यैः स्त्रीणां भगवानेव पतिर्न तु जीवः । एवं सति यथा वैदिकेषु कर्मसु विष्णुयागं आसुरा यथा न जानन्ति, तथोपांशुत्वं क्रियते, उपसदोपि तथा । यद्वा, 'इदमुच्चैर्यैद्वेन चरामः तन्नोसुराः पाप्मानुविन्दन्ति । उपांशूपसदा चराम तथा नोऽसुराः पाप्मानानुवेत्स्यन्ती'ति श्रुतेः । तेषां ज्ञानमेव तद्धर्मस्वरूपपाप्मयोजकत्वेन फलप्रतिबन्धकम् । तथा प्रकृते प्रभुसमीपगमनं एतन्मार्गानधिकृताः स्वधर्मेण फलप्रतिबन्धकरणेन योजयिष्यन्तीति तथा गमनमेव तासां स्वधर्म इति मुख्यो धर्मो ज्ञापितो भवत्यत्रेति । यद्वा, सर्वत्र धर्मविरोधदृष्टान्तोक्तितात्पर्यमाहुः पुष्टिमार्गे हीति । इदमत्राकूतम् । सर्वसामर्थ्यानि प्रकटीकृत्य स्वयं प्रकटे फलरूपे प्रभावितरसाधनानुष्ठानस्याप्रयोजकत्वेपि व्रजे यद्वेदाध्ययनादिकं तन्न मर्यादामार्गीयम्, किन्तु 'मन्नाथ मत्परिग्रह'मिति प्रभुवाक्यात् तेषां मर्यादामार्गीयत्वासम्भवात् पुष्टिमार्गीयम् । स्वस्त्ययनाशीर्दानादिभिस्तज्जनितसामर्थ्यस्य भगवति विनियोगात् लीलोपयोगित्वाच्च तथा । 'विप्रा मन्त्रविदः' इति वाक्यात् तादृशानामेवाशिषामनिष्फलत्वात् तेषां स्वस्मिन् विनियोगस्य चिकीर्षितत्वात् तदिच्छात एव तत्करणात् पुष्टिमार्गीयत्वम् । तेन मर्यादामार्गीयो धर्मोत्र नास्तीति ज्ञापनाय तादृग्दृष्टान्तोक्तिरिति । अथवा, ऋतवो धर्म इति । यस्यर्तोर्यो धर्मः पुष्पधर्ममेघादिस्तस्मिन् प्रवृत्ते सम्यगयमृतुः प्रवृत्त इति सर्वैः स्तुतो भवतीतीयमेवर्तुप्रतिष्ठा । तथा च तमोविशेषः खद्योतप्रकाशो ग्रहाभानं च वर्षर्तुधर्म

शोभाहेतुश्चेति स उच्यते । प्रकाशस्य प्रहाणा च मर्यादामार्गीयत्वात्तदशोभोच्यते । मर्यादामार्गविरोधाशे च दृष्टान्तः । मण्डूकशब्दोपि वर्षर्तुशोभाकरः । ब्राह्मणास्तु मेघगर्जितं श्रुत्वानध्यायज्ञानेन वेदाध्ययनलक्षणनियमभंगे तदन्या वाचः सृजन्ति, कर्मानुपयोगित्व-मुभयोस्तुल्यम् । तेन वेदाध्ययनात्मकमर्यादाशोभाभाव उक्तो भवति । क्षुद्रनदीना तथा-त्वमपि (तदा) तथा अविहितप्रकारेण दानभोगाभ्या मर्यादाभाव उक्तः । अग्रिमश्लोकोक्तधर्मा अपि तदा शोभायै । नृणामिति साधारणवचनात् क्षुद्रार्थजनिता लौकिकी शोभोकेति न मर्यादामार्गीयत्वम् । क्षेत्राण्यपि पूर्ववत् । उत्तरार्धे स्पष्ट पूर्ववत् ।

यथा पापेनेत्यस्याभासे, **एव भावे यो हेतु**रित्यादि । मर्यादामार्गतिरोधानमेव हेतुरिति भाव । **श्रुत्वा पर्जन्यनिनद**मित्यनेनापि कलिस्थब्राह्मणतुल्या अत्र मण्डूका एव, न तेपीति[1] ज्ञाप्यते । तेनात्र ब्राह्मणाना स्वधर्मनिष्ठत्व ज्ञापित भवति । **आसन्नुत्पथवाहिन्य** इत्यनेनापि क्षुद्रनद्यतिरिक्त उत्तराग्रोक्तधर्मविशिष्टः पुरुषोत्र नास्तीति ज्ञाप्यते । एतेनेन्द्रियपरवशत्वाभावेनान्तरगङ्गमुक्त भवति । **हरिता हरिभि**रित्यनेनापि नृणा क्षुद्राशयाना क्षुद्रार्थसम्पदो मदजनिका यथा, तथाग्रोक्तधर्मत्रयातिरिक्ता क्षुद्रार्था न सन्तीति ज्ञाप्यते । न ह्येते मदजनकाः । तथा च 'तत आरभ्य नन्दस्ये'ति वाक्याल्लौकिकी सर्वार्थसम्पदस्ति, न तु मदजनिकेति ज्ञाप्यते । अपरञ्च । लौकिकमहाराजश्रीतुल्यात्र भुवो वर्णादिशोभैव । सापि बाह्यैव । प्रभुपदाम्बुजचिह्नलीलानन्दादिरूपबाह्याभ्यन्तरशोभायास्तु दृष्टान्त एव नास्तीति भाव । क्षेत्राणीत्यनेनापि सर्वजीवनहेतुभूतान्नोत्पत्त्यनुकूलप्रयत्नवता मुदं स्वदोषेण वस्तुतत्त्वाज्ञानेन च परद्रोहकर्तृणा तत्प्रतिबन्धकरणेन दुःखं च क्षेत्राणि जडानि यत्र ददुस्तत्र किमु वक्तव्य गोकुले चेतनाना सर्वहितकर्तृत्वमन्येनापि परद्रोहचिन्तने तत्प्रतिबन्धकत्वमिति ज्ञाप्यते । तेनात्र पूर्णो धर्मो निरूपितो भवति । **अतः सुष्ठूक्त धर्मप्रतिष्ठामाह पञ्चभिरि**ति ।

जलस्थलौकस इत्यत्र, **मासा हि निमित्त**मित्यादि । 'द्वादश मासा' इत्यादिश्रु-
१० १७ १३ त्युक्तैकविंशतिप्रकारेण प्रावृडुच्यत इत्यादित्यत्रिलोकन्यायेनोक्त्वा ऋतुन्यायेन पञ्चभिः श्लोकैर्धर्मप्राधान्येन निरूपण कृतम् । अधुना तु धर्मिप्राधान्येन मासससंख्याकै श्लोकैस्तत्कथ्यते । मासा हि गर्भन्यायेन धर्मिस्वरूपविशेषसम्पत्तौ निमित्तभूता', अतो वक्ष्यमाणजीवादयो धर्मिण एवात्र प्रधानभूता इत्यर्थ । साक्षाद्भगवत्सेवोपयिकदेहसाधनत्व वारिमात्रस्य यत्र, तत्र किं वाच्यमन्यस्य वस्तुन इति भाव. । एकेनालौकिकगुणाधायकत्वमुक्त्वात्र सदोषवस्तु निकटेपि न स्तीति ज्ञापयितुं दूरस्थ सिन्धु निरू-

---

१ न तु तेपीति मू. पा ।

पितवान्। सिन्धुर्दोषमर्यादाहेतुत्वेन मर्यादामार्गीय इति तस्य क्षोभ उच्यते। एतल्लीलानुपयोगिनो महतोऽप्यनर्थपर्यवसानमेवेति च ज्ञाप्यते। अन्यथा सिन्धोरव्रजस्थस्य निरूपणमनर्थकं स्यात्। निरूप्यते चात्र भगवदीयप्रावृष एव कार्यम्। तस्याश्चेतोऽन्यत्र प्राकट्ये प्रयोजनाभावः। एवं सति स्वाधिष्ठानत्वादाधिभौतिकप्रावृषस्तद्द्वारैव तथा[2] कारितवतीयमित्यस्मिन्प्रकरणे व्रजस्थेतरस्यापि सिन्धोर्निरूपणम्। लीलारसामृतसमुद्रे जागरूकेऽन्यस्मिन् समुद्रत्वमसहमानया तया स्वप्रोढयेद कृतमिति ज्ञायते। तथा चास्थैर्यस्वभावा स्त्री, तादृश्या पतिश्च गोकुले नास्तीति दोषाभावो व्यज्यते। दृष्टान्तेन चात्र भगवदेकनिष्ठत्वेनोभयेषां सिद्धचित्तवृत्तिनिरोधत्वादेकप्रस्थित्या स्वस्त्रीदर्शनादावपि न क्षोभ इति व्यज्यते, तेन 'मन्यमाना स्वपार्श्वस्था'निति न्यायः सार्वदिक इति सिद्धम्। अत्र पूर्वं वारिमात्रस्यापि मुख्यभक्तिकार्यकर्तृत्वेन भक्तिरूपत्वमुक्त्वा तदात्मिकानामेव सरितां यत् क्षोभकत्वमुक्तम्, तेन प्रावाहिकभक्तिमन्तो न लीलानिष्ठा भवन्ति, प्रभुस्वरूपनिष्ठाभावावत्सगता भवन्ति तमपि क्षोभयन्तीति ज्ञापयति। ये तु प्रभुलीलौपयिकत्वेन स्वरूपैकनिष्ठया निश्चलत्वेना मुख्याधिकारं प्राप्तास्ते त्वभिभावकसम्बन्धेऽपि नाभिभूता भवन्तीति ज्ञापयितुं गिरीनग्रे निरूपितवान्। यथा यथा वर्षधारासम्बन्धस्तथा तथा स्वगुहायां तु स्थितप्रभौ तत्सम्बन्धा भावाः स्वेन भवन्तीति ज्ञानेनानन्दातिशय एव भवति, न तु तत्सम्बन्धजं दुःखमपीति दृष्टान्तेन ज्ञाप्यते। इदमेवोक्तं यतस्तेन्तःसारा इत्यनेनाचार्यैः।

अग्रिमश्लोकाभासे तेषां वर्षकृतोपद्रवमाहेति। ननु भगवदीयप्रावृषो भक्तो-
१० १७ १५ पद्रवकर्तृत्वकथनमनुचितमिति चेत्। अत्रैव ज्ञेयम्। उपद्रवो हि दुःखदः।
वर्षधाराणामतादृशत्वे वक्ष्यमाणरीत्या सुखदत्वाभिमानहेतुत्वं न स्यादतः प्रभौ तन्निवारकत्वेनैव स्वस्मिन् कृतार्थताभिमानः। अत एव मूले हननमुक्तमतः सुष्ठूक्तमुपद्रवमाहेति।

'मार्गा बभूवु'रित्यनेनापि व्रजे लीलोपयोगिवर्षतो मार्गाणामेव तथात्वम्, न तु
१० १७ १६ कदाचिद्वेदानामिति ज्ञाप्यते। अत एव कालहता इति विशेषणं मूले। यथा
भगवत्प्रापका वेदा अलौकिकरीत्या तथैवैकान्ते भक्तानां भगवत्प्रापका मार्गा इति द्वयोः साम्यम्, तेन सदा व्रजलोकयातायातयत्र स मार्गो नात्र विवक्षित इति ज्ञायते। अत एव तादृशानामेव भक्तानां तमिस्रायां क्वचिद्दिवापि न सन्देहः। अन्येषां तु तदज्ञानमेव। इदमेवोक्तमाचार्यैः पूर्वं ये तेनेत्यादिना। अत एव यावत्पर्यन्तं तद्विपश्चकृसंस्कारानुत्पत्तिस्तावत्पर्यं तमेव सन्देहस्तदुत्पत्तौ तु तमिस्रायामपि न सन्देह इत्याशयेनोक्तं मूले असं

---

२ तत्र तथा मू. पा.।

स्वता इति । मार्गलोप एवेति । स्यादिति शेषः । तेन संस्कारस्यावश्यकत्वमायाति । लोकबन्धुष्वित्यनेनापि व्रजे चलसौहृदा विद्युत एव दृष्टाः, न त्वन्याः स्त्रिय इति ज्ञायते[1] । कदाचित्सत्त्वे हि चलत्वं सौहार्दस्य । अत्र तु प्रभ्व्यतिरिक्ते तदभावा प्रभौ च तस्य सार्वदिक-त्वात्सौहार्दस्य चलत्वाभाव एव यतः ।

धनुर्वियतीत्यत्र, चक्रं निर्गुणमपीति । वृत्रवधाय भगवदावेशो जात एवेन्द्रे वज्रसम्बन्धो जातः । वज्रेपीन्द्राविष्टभगवदायुधस्य चक्रस्यावेशः । अत
१०-१७-१८. एवायुधानामहं वज्रमित्युक्तम् । तच्च गुणातीतं सगुण इन्द्रे शोभत इत्यर्थः । "वज्रं निर्गुणमपी"ति पाठे स्पष्टम् ।

न रराजेत्यस्याभावे, गुणेष्वत्राशिष्टमिति । तामसमित्यर्थः । अभगवदीय-साहंकारस्य दृष्टान्तत्वादस्य तामसत्वम् । अत एवात्रास्य न शोभेति
१०-१७-१९. भावः । न रराजोडुप इत्यनेनाप्युक्तरीत्या यथा प्राकृतः पुरुषो न राजते, तथात्र घनाच्छन्नो लौकिक इन्दुरेव तथा । न तु तदन्यः कोपि पुरुषोपीत्युच्यते । अत एव भगवदीयव्यतिरिक्तमित्याचार्यैरुक्तम् ।

मेघागमोत्सवानित्यत्र, पूर्वतापं दूरीकृत्य भगवदानन्ददायिभक्तजनागमदृष्टा-न्तोक्त्या यदा दिवा परिजननिरोधतश्चिरविरहतापे सति कथश्चिद्व्याजेन
१०-१७-२०. श्रीनन्दगेहे गमने सम्पन्ने सति वनगमने वा प्रियसङ्गे सति मेघास्तादृशीं वृष्टिं चिरं कुर्वन्ति । यतोत्रातिविलम्बेपि स्वगृहीया नोपालभन्ते तदा तन्मेघागमस्य प्रति-नन्दनं भवत्यन्यदा तु न तथा वृष्टिं कुर्वन्तीति ज्ञाप्यते । अयमेवार्थ उक्त एतन्निरूपणं यदर्थं तदाहेत्याभासेन । ग्रीष्मे घर्मादिना गिरिशिखरादिष्वनावृतदेशेषु लीलाया असम्भ-वात् सर्वत्र भगवदानन्ददातृत्वेनैवैतदभिनन्दनम्, न तु वैषयिकसुखदत्वेनेति ज्ञापनाय निर्विण्णत्वमुक्तं दृष्टान्ते ।

पीत्वापः पादपा इत्यत्र, तेषां निरस्यैवेत्यारभ्य तथेत्यन्तम् । अत्रायं भावः । नीरस्य जीवनत्वेपि तत्सम्पादने स्वयमशक्तास्तत्सम्बन्धघटकं ये पान्ति ते क्षि-
१०-१७-२१. तिदीनास्तापतप्तास्तेभ्यो जीवनसम्पादकोयमृतुस्तेन यदेकोपजीविनो ये तेषां तद्दातेति ये तादृशा भक्तास्तेषां भगवत्सम्बन्धजनकः, सर्वत्रैव निकुञ्जगह्वरप्रदेशजननादिति । अत एव नानामूर्तित्वं कार्यमुक्तम् । अयमेवार्थ एतदपि निरूपणमित्याभासेनोक्तः ।

सरःस्वित्यादिनापि दृष्टान्तीयधर्मसमानधर्मवन्तोत्र सारसा न त्वन्यः कोपीति ज्ञाप्यते ।

---

1. ज्ञप्यते मू. पा. ।

१०-१७-२२. तत्रापि सारसानामेव निरूपणेन सरसा ये भक्तास्तैः सह जलविहारदेशे तद्रसावेशाद्दोषमप्यगणयन्तो भवन्तीति तथा । दोषागणनपूर्वेयमत्यासक्ति-र्ग्राम्याणां गृहादिषु भवतीति ते दृष्टान्तीकृताः, तेनात्र [1]गृहवन्तोपि भक्ता एव, न तु प्राकृतः कोप्यस्तीति ज्ञाप्यते । एतज्ज्ञापकोयमृतुरित्येतत्प्रस्ताव इदं निरूपितम् । अयमेवार्थ एतदित्याभासेनोक्तः ।

जलौघैरित्यनेनापि जलसेत्वतिरिक्तस्य सेतोर्न नाशो व्रजेस्तीति ज्ञाप्यते । तेन वेदसेतोः
१०-१७-२३. सातत्यं सूचितं भवति । इदमेवोक्तं तदपीत्याभासेन ।

व्यमुञ्चन्नित्यत्र जलमोक्षोक्तेः पुनरुक्तिशङ्कानिरासायामृतपदं मूले । तदर्थमाहुर्हस्ता-
१०-१७-२४. दीत्यादिना । अन्यथा पूर्ववृष्टेरपि वैयर्थ्यं स्यादन्नासम्पत्तेरित्यस्यामृतत्वम् । तद्धि क्षुत्कृतमृतिनिवर्तकमिति भावः । दृष्टान्तेनात्रत्यसाधारणजनानामपि सर्वसम्पत्तिरितरापेक्षाभावश्च ज्ञाप्यते । प्रभुणैव ह्यत्र सर्वेषां सर्वसम्पत्तिः । एवं सत्युक्तरीत्या भगवत्संभूतिरूपत्वं प्रावृषः सूचितं भवति । एतदेवोक्तमेतदपीत्याभासेन । अपरञ्च, यथान्यप्रेरणयैव विरपतयो ददति, न स्वतोपि, तथात्र मेघा एव, न त्वन्येपि, यतः स्वत एव श्रीनन्दप्रभृतयः सर्वेभ्यः सर्वं ददतीत्यपि ज्ञाप्यते ।

धेनवो मन्दगामिन्य इत्यस्याभासात्पूर्वं वैराग्यशक्तिर्वेति । विरक्तो हि गृहं
१०-१७-२६. हित्वा वनं प्रविशतीति वनप्रवेशमात्रसाम्येनैवमुक्तम् ।

कश्चिद्वनस्पतिक्रोड इत्यस्य रामविषयत्वोक्तौ स्वाशय उद्घाटितः क्रोडे
१०-१७-२८. पुनरित्यादिना । यद्यप्येवमप्येका बाललीला सम्भवति, तथापि प्रभुलीलायां सङ्कोचमसहमानैरेवमुक्तम् । उपपत्तिश्चोक्ता, विशेषं च वक्ष्यति भगवतीति ।

शरद्वर्णने सा हि प्रवृत्तिरूपेत्यादि । प्रवृत्तौ मालिन्यं निवृत्तौ नैर्मल्यं भवतीत्येत-
१०-१७-३२. द्धर्मसाम्यादेवमुक्तम् । व्रजेपि लीलान्तःपात्येव गोचारणकृष्यादिषु सक्ताः केचन भक्ताः, सर्वनिवृत्तिपूर्वकं स्वरूपमात्रपराः केचन । तथा च विशेषणस्तत्तदुप-योगित्वेनापि तथात्वमभिप्रेतम् । तेनात्र प्रवृत्तिनिवृत्ती लीलारूपे ज्ञेये । कारिकाप्रतिश्लोका-र्थोक्तौ जलानामित्यारभ्य गोपिकानामित्यन्तेन [2]दशवाक्यानामर्थमुक्त्वा यचित्तस्यापी य-नेनैकस्यार्थमुक्त्वाग्रिमवाक्यानामर्था भगशब्दार्था इति सर्वानशोभयदित्यनेनोक्त्वा गुणरूपत्वेनैव चन्द्रादयो निरूपिता इत्याहुश्चन्द्रमानवा इत्यादिना ।

---

१. अगृहवन्त इति पाठः । तेनाग्रामवन्तोपि मू. पं. । २. दशवाक्यानामर्थमुक्त्वार्थं मू. पा. ।

टि० ९

महाभूतशुद्धयुक्तिप्रस्तावे तन्मध्यपातित्वेन द्वितीयेऽपि श्लोके अपां मलमित्युक्तमन्यथा
१० १७ २४. पौनरुक्त्यं स्यादित्याशयेनाहुः एवं पञ्चमहाभूतानामिति ।

अखण्डमण्डलो व्योम्नीयत्र, सोऽपि चन्द्रो गोपिकाभिरिति । भगवदीय-
चन्द्रस्योडुरूपाणि स्वामिनीमनांसीति ताभिर्दृश्यमानस्तन्मन सहकृतो भवतीति
१०-१९-४४ शोभितो भवतीत्यर्थः । एवं सति मूले अखण्डमण्डलपदेन भगवदीयः स
उच्यते । शशिपदेन लौकिक इति भावः ।

अष्टादशेऽध्याये गोपानामपि सोऽच्युत इत्यत्र । बालका हि यत्किञ्चिदद्भुतमनुभूय
स्वस्वाभ्यस्वाभाव्यादेवोन्मादवशात् सर्वेषामग्रे तद्वदन्ति, तथा नैतत्कं, किन्तु
१० १८ ०. प्रच्छन्नतया । तस्यायं स्वभावो यत् स्वगमानशील्स्वेव स्वसर्वस्वतया ज्ञातं
प्रभुचरित्रं व्यक्ततया वादयति । तावत् मेताववेति गोपाः स्वस्वगृहे तान्य एवाचख्युः[1] । इदमेव सम्यक् न चक्षणे । एतेन यथा दिवैतासां गुणगानं तथैतेषां निशीति ज्ञापितं भवति । एतच्च प्रकरणादौ ज्ञापितमिति तदन्ते च [2]ज्ञापितम् अत एवाक्रीडार्थं वनप्रवेशे गोपालमाहात्म्यकथनेन । अन्यथा वनचरदानार्थं गच्छद्यथैतान् सङ्गे न नीतवान् तत्कार्यं पूर्वैभिः सहितो जातस्तद्रस्य- 'स्वयं गोपैः परिवृत' इत्यनेन तथाऽपि पुष्टीतदेतद्धृदि कृ चोक्तं **गोपानामपि सोऽच्युत** इत्याचार्यैः । यथा स्वामिन्यो गृहेषु स्थिता अपि वने दिवाकृतां लीलां भगवद्भावानुभावेन [3]स्वहृदयेष्वनुभूय गायन्ति, तथैतेऽपि निशिकृतां लीलामासक्तिभरानुभावेन स्वस्वहृदयेष्वनुभूय गायन्ति, सा नातिगोप्येति स्फुटं स्पष्टतया नोक्ता, एतद्गानकथनेनैवोक्ता भवति, गानहेतुभूतासक्तेस्तुल्यत्वात् च ज्ञापितेऽपि तत्कार्यमपि पुनरुक्तं ज्ञापितं भवति । तदेतदुक्तं **वर्ण्यवर्णकभेदेने**त्यनेन । वर्ण्यं वर्णनीयं रात्रिचरित्रं, वर्णका वर्णनकर्तारो गोपाः । तत्र दिवा चरित्रे स्वामिन्य इति भेदः । आसक्तिनिरूपणमुपपादयन्ति तद्गुणेष्विति यावदन्तम् । अनेनेदम् । गुणासक्तिरूपकार्येण भगवदासक्तिर्ज्ञाप्यते । आसक्तिः प्रेमोत्तरभाविनीति तन्निरूपणेन प्रेमापि निरूपितो भवति, स चाग्रश्लोकेन निरूप्यते । स तद्बुद्ध एवासक्तिं जनयति न तु लौकिकवत् कोकिलादिकूजनेन नोद्बुद्धो भवत्यलौकिकत्वादतः प्रभुहृदयमेव तदुच्यते[4] । कलिलमादुरागतया वर्णनमिति । आसक्तौ सत्यामपि यावद्भगवान् स्वयं न ज्ञापयति तावत्स्वरूपगुणलीला न ज्ञातुं शक्यन्ते यतस्तस्माद्धेतोरग्रिमेण श्लोकेन **यदोपीडम्**इत्यनेन गानोपक्रमात्ते विद्यारूपं सपरिकरं स्वस्वरूपज्ञानं स्फुटं यथा भवति तथा दर्शयन् इत्यर्थः । पूर्वं गान्धर्वमात्रमक्कामृतं विद्यामन्तरे प्रानुभावयित्वान्तरेव तत्स्वभूतं गानेन स्वरूपानुभवं कारितवान् । अग्रे तु स्वलोकाभयत्वाविवैकुण्ठस्य

१. एवाचख्युः मू. पा. । २ स्वगृहेष्विति पाठ । ३. ज्ञापित–मू. पा । ४. प्रतदुच्यते मू. पा ।

बहिरनुभवात्मकविद्यया तत्फलभूतं बहिरङ्गसङ्गेन स्वरूपानन्दानुभवं कारयिष्यतीति ज्ञापनायात्र विद्यावनिरूपणमिति ज्ञेयम् । यद्वा । श्लोकपञ्चकानन्तरं गानारम्भोक्तिव्यञ्जितमर्थमाहुर्विद्यान्त इति । विद्याया अन्त इत्यर्थः । सा हि पञ्चपर्वात्मिका । तथा च गानोक्तेः पूर्वश्लोकेषु तत्समानसङ्ख्याकत्या तेषु तत्त्वं लक्ष्यते । तथा च महाविद्यातोप्याधिक्यं, तस्या अपीदं फलमिति ज्ञाप्यत इत्याशयः । श्लोकसंख्यातात्पर्यमाहुः कालाधिक इत्यादिना । द्वादशमासात्मकः कालो, द्वादशाङ्गः पुरुषश्च । इह तदधिकसंख्यया गेये तदधिकत्वं ज्ञाप्यत इत्यर्थः ।

इत्थं शरत्स्वच्छजलमित्यत्र, भक्तीनां निर्भयत्वायेत्यादि । अलौकिक-
१० १८ १ त्वनित्यत्वस्वाभाविकधर्मज्ञापनायैतदनभिज्ञेषु गोपनाय भगवद्भोग्यसीमन्तिनीषु शक्तिपदप्रयोगः स्वार्थे तद्रूपतारहितः फलभोगसमर्पको यथाधिकारं तत्र प्रवर्तकश्च साक्षी भवति यथा परमात्मा । तादृशात्मान्तरङ्गत्वाद् गोपयतीति साक्षित्वमुक्तम् ।

कुसुमितेत्यत्र, धर्मं कुर्वन्नित्यादि । धर्मो हि साक्षात्परम्पराभेदेन चतुर्वर्गस्यापि
१० १८ २ साधकः । अवगाहनं च तत्र तत्र तथा तथा लीलास्फुरणार्थम् । एवं सति लोकसिद्धं कार्यान्तरं विना तत्र गमनं [1]चिरस्थित्यादिकं च लोकविरुद्धम् । लोके चिकीर्षितलीलाज्ञानं च रसविरुद्धमिति सर्वसमाधानपूर्वकं सम्पादकं गोचारणमिति भावेन धर्मोक्तिः ।

तद्व्रजस्त्रिय आश्रुत्येत्यत्र, गोपिकाभिरेव श्रूयेतेति । एतदितरश्रवणाभावे
१० १८ ३ प्रमाणापेक्षायामुच्यते । भगवान् हि सप्रयोजनमेव कार्यं करोति, न त्वन्यथापि, जीववत् । अत्र च रमणार्थं भावोद्दीपनमेव प्रयोजनम् । एवं सति यासु तदभावस्तासु तच्छ्रवणं निष्प्रयोजनकमिति प्रभुर्न करोत्येवेति मन्तव्यम् । एतेन श्रुतं सर्वैः, परन्तु स्थायिभावैर्व्रजस्त्रीभिरेव तदुद्दीपनं नान्यत्रेति निरस्तम् । सर्वज्ञस्य तादृक्-कृत्यासम्भव इत्युक्तत्वात् । नादनिष्ठप्रभुस्वरूपवेशमात्रेणैव भगवदीयप्रकरणलक्षणस्वभावहानिप्रसङ्गश्च । स्वस्वरूपातिरिक्तस्य वपुषोऽभावात्तद्धरणशक्तिरसङ्गतेत्याशङ्क्य तत्तात्पर्यमाहुर्भगवांस्त्वित्यादिना । उक्तं यद्वपुः तद्विविधस्वात्मकं हि वपुः, रसश्च भावात्मकं गात्रं स्वप्रियात्यतिरिक्तेषु भक्तेषु[2] तादृशरस्याप्रकटनान्नामूर्तत्वेन लोके प्रसिद्धः । वपुर्विशिष्टस्तु बहिः स्वस्वरूपं प्रकटयन् भवति । तथा धर्मान् कुर्वन् वृन्दारण्यं प्राविशदिति । अत्रैव ज्ञेयम् । शब्दात्मकत्वेनामूर्तत्वेन लोके प्रसिद्धा अपि[3] 'वेदा यथा मूर्तिधराः' इति वाक्यात्

---

१. चिर मू प । २. 'भक्तेषु' इति मूलपाठे नास्ति । ३ 'अपि' नेदं 'वेदा' मू प ।

[1]सर्वेन्द्रियाणामधराद्यवयवमूर्तिप्राकट्यवन्तो यथा, तथा भगवतः साक्षात् सर्वाङ्गेषु तद्धर्मैरेव समास्पर्शं वपुर्वृन्दारण्ये एव प्रकटितवान्। तथैव प्राकट्ये न मनोमात्रगोचरत्वम्, किन्तु प्राकट्येन सर्वेन्द्रियगोचरत्वम्। एवं सति चक्षुर्मात्रविषयत्वे स्थितेऽपि मनोमात्रविषयत्वे दुःस्वरूपानुभवसिद्धमतो भगवद्धर्मं नर्तनं। न स्थितिः। स एव भगवानिति तथा। आगमिष्यत्पुरो गतं यथा ।

वैजयन्तीं च मालामित्यत्रापि, तत्तत्पुष्पाद्याकृतिः इति। विशेषस्यापि
वस्तुगाथायामज्ञानाच्चादृष्टावलम्बनं तात्पर्येणानुक्तम्, अन्यथापि विशेषकं च
१०-१८-५. रूपं निरूपितमिति न वदेयु । तदङ्गाश्रेणीति यत्र मुरलीमारोपिता इत्यन्तमध्याहुर्यत्रेति । नादो हि रसात्मको [2]ध्यानसंयोगेन हृदि प्रविष्ट स एव भगवदीय सर्वेन्द्रियविषयकविविधरसभावैर्निर्गतः प्राणप्रवाह इव पुरो रसपूर्णरूपो जातो, येन समानशीलव्यसनानां परस्परं तद्वर्णनरूपो बहिः प्रकटोऽभूत। स च सार्वत्रिक इति तत्र[3] हृदयस्थितोऽधररसो मुख्याधररसस्थाने एवेति। स सर्वासां हृदि स्थितः पर्यायेण सर्वासां हृदि प्रविष्टः। तदानिर्वचनीयोत्कटभावोदयेन साक्षादनुभवयोग्यता भवतीत्यर्थः। एवं सति यावदुक्तरीत्या सोऽशो नान्तःप्रविशति तावदपि साक्षाद्भोगयोग्यता न भवतीति शेषान्वयो ज्ञेयः। एतदर्थमेवेति। रसपूरेण तद्द्वाराप्रवेशार्थमेव यथा। अथेदानीं अत एवेति। यतो विहितभक्तिमतामप्ययं रस फलत्वेन प्रार्थनीय एव तिष्ठति, न तु नारदवायं प्राप्तो भवति यतो वशद्वयसम्बन्धिभक्तनिरूपणानन्तरं निरोधो निरूपित इत्यर्थः। एतस्यैव तात्पर्यान्तरमाहुः सृष्ट्युत्पन्नानामिति। भक्तानामिति शेषः। भोगो भक्तिसम्भोग इत्यर्थः। एतत्पर्यवसायीति। एतदप्राप्तौ तेषामपि मृषावुपत्तिर्व्यर्थेत्यर्थः। एतेनान्येषां च मुक्तिन्यायेनैव जन्मवैयर्थ्यं ज्ञापितं भवति। 'नैष्कर्म्यमप्यच्युतभाव'इत्यादिवाक्यं। तदीदं फलस्य सिद्धत्वादग्रिमश्लोकद्वयं व्यर्थमित्याशङ्क्य तत्तात्पर्यमाहुः तत इत्यादि। ये मुक्ताः स्वान्ते स्थिता एव जीवा लीलार्थं सृष्टास्तेषां परमानुग्रहतो निजलीलामध्यपातिभक्तैः सहैतद्रसानुभवं कारयित्वा पुनः पूर्वभावं सम्पादयतीति श्लोकद्वयेन निरूपयन् इत्यर्थः। पुनः पूर्वभावसम्पत्तेरेव प्रत्यापत्तिपदार्थत्वात्। लोके एतद्रसप्रकटनस्य तात्पर्यं वदन्त आवश्यकतां चाहुः अन्यथेति। अस्यैव परमपुरुषार्थत्वेन सृष्टिमध्ये यत्र कुत्रापि प्रकटनेनैव सृष्टेः सार्थकत्वम्। अन्यथा प्राणसम्बन्धरहितदेहसृष्टिवत् सा व्यर्था स्यादित्यर्थः। तद्दृशानामिति। महिष्यादीनामित्यर्थः। मुख्यमापणार्थं चेति, मुख्यः पुरुषोत्तमः। एतासां च स एवापेक्षित इति तस्यानुभवेन कथने स एव प्रापितो भवतीति तथा।

---

१. त्रिपृष्ठे पार्श्वे-मू. पा.। २. पादस्पर्शेनेति अन्यपाठ। ३. तत्तद्-मू. पा.।

अक्षण्वतामित्यत्र, प्रकरणार्थविभागे द्वाभ्यां भक्तेरिति । लोके हीनानामपि

१० १८ ७ चरणारविन्दसम्बन्धिकुङ्कुमसम्बन्धमात्रेण लक्ष्मीसमानभाग्यवत्त्वं चरणमाहात्म्यमेव । स्पर्शमात्रेण प्रकृष्टमोदजनकत्वं च । चरणश्च भक्तिमार्गरूप इति तद्धर्मप्रकटनं भक्तिस्थापनरूपमित्यर्थः । एवं तत्तात्पर्यानुक्तौ बाधकमाहुः अन्यथेति । प्रकारान्तरेण तात्पर्योक्तावित्यर्थः । पुरुषोत्तमस्य लोकेऽपि हीनाया स्त्रियाः सम्बन्धोक्त्या हीननायकत्वमापद्येत । श्रीपतेः कन्दाद्युपयोगश्च तथा । अतस्तत्रैव तात्पर्यमिति भावः । तथापि लोकरीत्या दूषणत्वं तस्य भवत्येवेत्यत आहुः वैपरीत्यात्समाधानमिति । प्रमेयमार्गः प्रमाणमार्गाद्विपरीतो गलितपृष्ठश्च । अधुना च स एव प्रकटीकृत इति वस्तुस्वाभाव्यादेव तथात्वमिति न दूषणमिति भावः । अत्र मर्यादावैपरीत्यं भूषणमिति सारम् । मर्यादामार्गीयपरमोत्कर्षवद्भ्योऽप्युत्कर्षसिद्धेः सर्वमवदातम् । अन्यथा वैपरीत्यमात्रेण मार्गोत्कर्षो न सिध्येत् । मेन्द्रियाणामपि तदफलत्वे हेतुमाहुः बाधकानामिति । भगवदतिरिक्तस्य सर्वस्य बाधकत्वात्तत्त्यागे सति प्रतिबन्धकाभावेन मोक्षलक्षणं फलं न भवेदित्यर्थः । मुमुक्षूणां तथात्वेऽपि न तथात्वमित्याशङ्क्य तत्साधनमाहुः साधकानामिति । सर्वात्मभावेन भजनं साधकत्वम् । यद्यपि सर्वात्मभावेन[1] सर्वत्यागोऽप्यन्तर्भवति, तथाप्याधुनिकानां स्वतस्तद्भावरहितानां पूर्वं बुद्धिपूर्वकस्तत्त्याग एतद्भावनं चोपदिश्यत इति पृथगुक्तिः । अत्रैव वपस्यैरित्यत्र, तदाधारत्वे निमित्तमितीति । गोपलीर्योरेककालाधारत्वे प्रभुप्राकट्यं निमित्तमिति तथेऽर्थः ।

चूतप्रवालेत्यत्र, प्रयाणामन्योन्यगुणप्रधानभाव इति । स्थायिभावव्यभि-

१० १८ ८ चारिभावविगाढभावानामित्यर्थः ।

गोप्य किमाचरदित्यस्याभासे, तस्याधिदैविकरूपतासम्पादकमिति ।

१० १८ ९ कामरसो हि सहजः, वेणुनादेन सह सुधान्तःप्रविष्टा सहजं पूर्वकामं दूरीकृत्य भगवदीयं तं प्रकटितं करोतीति तथा । दामोदरेत्यस्याभासे, मर्यादायां हीनतामिति । हीनता साधनहीनता, न्यूनतामिति यावत् । नाद भुङ्क्त इत्यत्र प्रमाणमाहुः सा वनस्पतीनित्यादि । 'वाग्वै देवेभ्योपाक्रामद्यज्ञायातिष्ठमाना सा वनस्पतीन्प्राविश'दिति श्रुतिः । सुधाभोगविवादे हेतुः सुधानधिकार इति ।

वृन्दावनं सखीत्यस्याभासः । चरणानां स्वरूपमाहेति । अत्रेदमाकूत-

१० १८ १० मिति मे भाति । भगवच्चरणमाहात्म्यं सर्वश्रुतिप्रतिपादितम् । 'तदेव देवानां पादा' इत्युपक्रम्य 'तस्या भाग्यमिनन्दन'मित्यन्तेनोक्तम् । तथा

---

1. सर्वात्मभावे ग. पा ।

चैतादृक्पदसम्बन्धात् वृन्दावनस्वरूपमुत्तमत्वेन निरूपितं भवति । तत् कथमुक्तमत्र विहारनिरूपणेन चरणानां तथेति । अत्रेदमाकूतम् । [1]लोकवेदातीतशुद्धपुष्टिमार्गीयलीला सामग्री हि नान्यत्र प्रसिद्धा । एवं सति तत्कर्तापि तथेति सिध्यति । अत एव "वृन्दावनाद् गतो दूर"मित्यत्रे वक्ष्यति । यतस्तत्र पुष्टिलीलानङ्गीकारो वक्ष्यते । एवं सत्यन्वयव्यतिरेका भ्यामियं लीलात्रैवेति फलिष्यति । एवं सति यत्रैव शुद्धपुष्ट्यङ्गीकारस्तत्रैतच्चरणलीलेति ज्ञेयम् । अत एव वृन्दावनेऽपि 'प्रेक्ष्य त्यजुर्वै गतगृहा जगृहु' 'सहरामो व्रजस्त्रीणां चिक्रीडे जनयन् मुदम्' 'कृष्णस्य गोप्य' इत्यादिनयमेनोक्ता । कालीयशिरोनृत्ये नैतच्चरणप्राकट्यम् । तत्र पुष्टिलीलायामनङ्गीकारात् । अत एव तत्स्तुतिरपि तादृशी । अतो यत्र पुष्टि मार्गीयभक्तिमार्गप्रकटन लीलया तत्रैतच्चरणारविन्दाविर्भाव इति ज्ञेयम् । अत सुष्ठूक्तं [2](त्वच्) चरणानां स्वरूपमाहेति । असाधारणधर्मनिरूपणे धर्मिनिरूपणसम्पत्तिवत् । यतो लीलैव तत्परिचायिका । एवं सति 'देवानां पादा' इत्यारभ्य 'आधिदैविकानानन्दरूपा'-मित्यन्तेन यानि चरणरूपाण्युक्तानि तदतीतत्वमेतच्चरणयोर्ज्ञापितं भवति । उक्तेषु पुरुषोत्तमो लोकवेदप्रथितो ज्ञेय, अयं तदतीत इति ज्ञेयः ।

धन्या इत्यत्र, स दोषो न ज्ञायत इति । दोषस्वरूपमाहुः न ज्ञायत इति ।
१० १८ ११ मृगीभिर्भगवत्स्वरूपं श्रुत्यादिप्रतिपाद्यत्वेन न ज्ञायत इतिलक्षणो दोष इत्यर्थः ।
पूजां दधुरित्यत्र, तस्याश्च धारणं ततोपीति । सर्वोत्तममिति शेषः ।

कृष्णमुखनिर्गतेत्यत्र, मुखं वागधिपतिरित्यादि । अत्रायं भावः । पूर्वश्लोके
१० १८ १२ देवस्त्रीणां मोह एवोक्तो, वस्तुसामर्थ्यात्, न तु रसपानमपि । गवां भगवदी
यत्वात् भगवत्सङ्गत्वात् प्रियत्वाच्च रसपानमुच्यते । तत्र सुरस्त्रीणां यत्र तथात्वं, तत्रैतासां पशुत्वानौचित्येन तदसम्भावितमित्याशङ्कानिरासाय नद साधारण्येन गानं, किं तु [3]यथैव तासामपि रसानुभवो भवति तथा सर्वसामर्थ्यप्रकटनपूर्वकमिति ज्ञापनायेति । अत एवाग्रे हृदि प्राकट्यं स्पर्शश्चोक्त । आधिदैविकसम्बन्धमात्रेण यत्राध्यात्मिकाधिभौतिकयोरपि कार्यकरणसामर्थ्यं, तत्र साक्षादाधिदैविकस्यैव करणत्वे किं वाच्यं कार्यसम्पत्ताविति वागधिपतित्वानुक्तेस्तात्पर्यम् । एतेन शब्दनिष्ठरसपानो साधनसम्पत्तिरुक्ता भवति । किञ्च । वाच्यार्थाज्ञाने रसस्वरूपाज्ञानात् कार्यासम्भव इति शङ्का कृष्णपदार्थोक्त्या निरस्ता । स्वरूपात्मकत्वादर्थस्य स्वत एव [4]प्रकटत्वाज्ज्ञानसाधनानामनपेक्षणाद् बलवत्त्वाच्च न पशुत्वादिकं प्रतिबन्धकमतः सर्वस्वदानम् । अपरञ्च । कृष्णमुखान्निर्गतस्य तत्रापि परम्परासम्ब

---

१ लोकवेदातीत—मू पा । २ 'त्वच्' इति मूलपाठे नास्ति । ३ यथैतासामपि मू पा । ४ प्रकटत्वात्सद्ज्ञान—मू पा ।

द्रस्य पीयूषस्य यत्रैतादृशत्वं, तत्रापि पशुषु, तत्र साक्षान्मुखपानकर्त्रीषु किं वाच्यमित्युत्कण्ठाज्ञापनायापि निर्गमनायुक्तिरिति ज्ञेयम्। अन्यच्च, मुखस्याग्नित्वेन साक्षात् तत्पानकर्त्रीणां कदाचित्तत्पीयूषं तापमप्युत्कटं जनयति। इदं तु तस्मान्निर्गतत्वेन सदैवानन्दजनकमेव, न तु तथा। तस्माद्भिन्नत्वेन परम्परासम्बन्धाच्च तद्धर्मासम्भवात्। अत एव साक्षात्सम्बन्धानन्तरं यादृशस्तापस्तादृशो न पूर्वम्, किन्तु सहजसम्बन्धात्तद्धर्मवत्त्वस्यापि सहजत्वात्कश्चन तापं जनयतीति ज्ञापनाय तावदुक्तमिति। प्रतिक्षणं नूतनकर्णत्वादिति। पुटत्वोक्तया तत्र यथैकेन रसेन पूर्णे द्वितीयरसावकाशो न सम्भवति तथैकैकक्षणसम्बन्धिनाद्रसस्यापि[1] तत्त्वात् तेन पूर्णे पुटे द्वितीयादिक्षणसम्बन्धिनां तेषां प्रवेशासम्भवात्तत्पानार्थं द्वितीयादिपुटापेक्षावश्यकीति तथात्वम्। अन्यथा करणाभावेन नादग्रहणासम्भवाद् द्वितीयादिपानमेव न भवेत्। अत्रैव ज्ञेयम्। भगवत्सम्बन्ध्यर्थो न लौकिकेन्द्रियग्राह्यः, किन्त्वलौकिकैरेव तैः। प्रभुदित्सा च तत्र हेतुः। तथा च तयैव तावत्साधनसम्पत्तिर्भवतीति नानुपपत्तिः काचित्।

प्रायो बताम्बेत्यत्र, सम्बोधनं दयार्थमिति। दयया भगवान्निकट[2] एव स्थापयेदिति

१०-१८-१४. भावः। तेषां शरेति। पल्लवैराच्छादितत्वेनान्यदर्शनाभावाच्छरादिभयाभाव इति केचित्।

नद्यस्तदेत्यत्र, [3]सर्वतत्त्वं ज्ञातवन्त इति। भगवत्स्वरूपात्मकरसतत्त्वं ज्ञातवन्त

१०-१८-१५. इत्यर्थः।

मा गोपकैरित्यत्र, सर्वेषामेव वनानामित्यारभ्य तत्र गच्छत इत्यन्तम्।

१०-१८-१६ शुद्धिपदेनाशुद्धिनिवृत्तिरुच्यते। वस्तुतत्त्वाज्ञानहेतुभूततरुत्वस्वभावोऽशुद्धिपदार्थोऽत्र विवक्षितः। पूर्वं 'कृष्णमुखनिर्गते' त्यादिना पशुत्वेपि सति तदुल्लङ्घ्यैतद्रसानुभाविका सामग्र्युक्तेति तत्फलरूपो भाव इति तत्सम्बन्धे सति वनस्यापि तरुत्वादिस्वभावोल्लङ्घनपूर्विका रसप्राप्तिर्भवति। गोषु रमित्वं स्पष्टम्। तदेव धर्मपदेनोच्यते। तदेतदुक्तमेतदीया शुद्धिर्धर्मश्च तत्र गच्छत इत्यनेन। गोपु तत्पुरितिपदेन क्रियानिवृत्तेरप्युक्तत्वात्तत्सम्बन्धादत्रापि तथा। वेणुस्वनयोरौदार्योक्त्या प्रासङ्गिकमिदं नादकार्यं वस्तुस्वभावजम्, न त्वेतदुद्दिश्य भगवतायं नादः कृत इति ज्ञाप्यते। प्रासङ्गिककार्यकथनेन यत्रैतेष्वेवैतादृश्यं[4] तत्रैतदादयिपयेषु किं वाच्यमिति ज्ञाप्यते। अतो भीता इत्यादि। गोनिष्ठरसग्रहणार्थं बन्धनादिप्रयासं करोति तथास्मासु प्रयासं मा करोत्वित्याशयेन प्रभुप्रयासाद्भीताः स्वत एव समर्पयन्तीत्यर्थः। निदाने इति पाशनामोक्तिः।

इति प्रमेयप्रकरणम्।

---

१. रसस्यानित्यत्वात् तेन मू. पा.। २ भगवन्निकट मू. पा.। ३. सर्वं तत्त्व मू. पा.।
४ —वैतादृश मू. पा.।

अथ साधनप्रकरणम् ।

एकोनविंशाध्याये प्रकरणार्थनिरूपणे विद्यापञ्चकमत्रापीत्यादि । साक्षा-
१० १९.०. दसम्भवे परम्परयापि भगवानेव सेव्यः । देहेन्द्रियादिकं च तदर्थमेव विनियोक्तव्यं, न स्वार्थमपीति निर्णयरूपैका । देहनिर्वाहार्थं प्राणादिधर्म-निवृत्त्यर्थमपि स्वतः सम्भवेऽपि प्रभुरेव प्रार्थनीयः, न त्वन्योऽपि । प्रभुश्च लोके नालौकिकं करोति, भगवद्भावे चानुग्रह एव नियामकः, न तु साधनमपि शास्त्रीयमिति निर्णयरूपा द्वितीया । इतरभजनं न कार्यं पारम्पर्यागतमपि[१], धर्मे भगवदिच्छायां सत्यां विसृजेतेतिरूपा तृतीया । सर्वावस्थासु हरिरेव सेव्यः, भगवांश्चाक्लिष्टकर्मा रक्षत्येव स्वानिति च तुरीया । माहात्म्यज्ञानपूर्वकः परमस्नेहो[२] भक्तेर्बाधितत्वज्ञानं चेति पञ्चमी । एतत्पञ्चकसम्पत्तौ पूर्णो निरोधः सिद्ध इति स्वकार्ये सम्पन्ने जाते पश्चादिन्द्रादिविषयिणीं दृष्टिं कृतवान् । अत एव पश्चान्निरूपितम् । व्रजेन्द्रस्य च भगवदुत्कर्षज्ञानहेतुभूतवरुणदर्शनं कारितवान् । इदमेवोक्तं **तस्मिन् जाते सुरक्षणमित्यनेन** ।

एतन्निरूपणतात्पर्यमाहुः **अविद्याकार्येति** । अविद्या तत्कार्यं चेति ज्ञेयम् । [३]स्त्रीपुंसेति । तयोस्तथानिरूपणे हेतुस्तुल्यत्वादिति । अविद्यासम्बन्धाभावस्य तुल्यत्वादित्यर्थः । निरोधस्य वा ।

एकोनविंशाध्यायार्थनिरूपणसन्दर्भे, अन्यपूर्वास्त्वन्यथैव कृतसंस्कारा
१०.१९.१. इति । अत्रेदं ज्ञेयम् । स्त्रीणां विवाह एव मुख्यः संस्कारः, समन्त्रकत्वात् । स च स्वर्गादिफलकामिहोमादावधिकारित्वसम्पादको लोके । प्रकृते चातथात्वाद्भगवत्सम्बन्धस्य च फलत्वेन वक्ष्यमाणत्वात् तत्र चास्याप्रयोजकत्वादेतत्कथनमना-[४]प्रयोजकं स्यादिति विवक्षितफलप्रयोजक एव कश्चन धर्मः संस्कारशब्दवाच्योऽत्र वाच्यः । स च विवाहजनितः तृतीयपुरुषार्थरसविशेषानुभवहेतुरेव । स दम्पत्योर्न सम्भवतीति यतस्तद्रसमर्यादा । अत एवान्यथैवेत्युक्तम् । भगवदीयानामन्यत्र विवाहस्यानुचितत्वात् । परन्तु तैः सह सम्बन्धाभावाद् भगवद्रसपोषकत्वाच्चास्य संस्कारत्वम् । एतेनायुक्तत्वमपि परिहृतम् । न ह्यनुचितः संस्कारो भवतीत्यनवद्यमखिलम् । किञ्च, 'लोकानुसारिणी विद्या कर्मज्ञानात्मिका पुरा निरूप्यते' इति वाक्याल्लोकानुसारेणात्र कर्म निरूप्यते, न तु भगवदिच्छानुसारेण । भगवदर्थं भगवानेव सेव्य इति यतस्तत्र मर्यादा । लोके हि प्रियप्राप्त्यर्थं तदीया दूतिका प्रार्थ्यते, तथात्रापि कात्यायनी प्रार्थ्यते । लौकिकी सा यथा

१.—गतमपि धर्मे मू. पा. । २. परम स्नेहो मू. पा. । ३. स्त्रीपुंसोरिति मू. पा. । ४.—प्रयोजक मू. पा. ।

द्रव्यादिदानेन तोष्यते, तथेयमलौकिकी यलौकिकप्रकारेणेति। अ यभजनदोषोपि नैव सम्भवति। भगवत्तोषहेतुस्वतनुर्मण्डनतुल्यकृत्त्वेन रसपोषकत्वात्। विवाहितानां तु प्रौढात्वेन जातभावाङ्कुराणामनुदिनमेधमानप्रेमार्द्रद्रवियेक्षणेक्षणप्ररूढतद्रसपूरमत्तत्वेनान्यस्फूर्तिरहितानां समयविशेषे समागम एवापेक्षित। स च 'निशम्य गीत'मित्यारभ्य 'न न्यवर्तन्ते'त्य तेन निरूपयिष्यते। एतदेवाभिसन्धायोक्तं तासां त्यागोद्गमिति। ननु कुमारीणां वनप्रसङ्गे प्रौढानां कथं प्रसङ्गः। इत्थम्। मूले 'कुमारिका व्रतं चेरु'रिति कथनेन तद्वितरासां व्यावृत्तिः सूच्यते। तत्र व्यावर्त्यानां स्वरूपं वाच्यम्। व्यावर्तने हेतुश्चेति युक्तं तदुभयकथनमिति दिक्। एतदग्रे अन्यासामसंस्कृतानामित्यादि। आदौ भगवदर्थवनजक्लेशानभावविशेषलक्षणः संस्कारः। अनायासेन प्राप्तात् क्लेशेन प्राप्ते स्नेहातिशयस्यानुभवसाक्षिकत्वात्। ततः 'कृष्णचेतस' इति पदोक्तानवरतानेकविधसङ्गममनोरथरूपस्तज्जनितो भावविशेषश्च सः। येनाग्रे भगवान् एव प्रार्थना। ततः 'उपसी'त्यादिना वक्ष्यमाणप्रकारकः सः। ततः प्रियागमने सति विविधरसभावगर्भपरस्पराव्याजहारजप्रमोदविशेषजभावः सः। ततो 'यूयं विवस्त्रा' इति वाक्ये श्रुतेऽप्रिमवाक्यनिरूपितो भावविशेषः सः। ततो वसनदानतत्सामयिकभावोत्थादिदृष्टिविविधस्पर्शजनितो भावविशेषः सः। स एव 'दृढं प्रलब्धा' इति श्लोकेन शुकेनोक्तः। अत एवामूढ्यादिहेतुषु सत्स्वपि न तदुत्पत्तिः, संस्कारस्य दोषजनकत्वात्। ततोऽग्रिमवाक्यनिरूपितस्तद्विशेषः सः। ततोऽतितुष्टप्रियावलोकनवरदानवाक्यश्रवणजसङ्गमविशेषनिश्चयजः सः। ततो गृहगमनाज्ञाजनितदुःखसम्भोगेष्टप्राप्तिसुखभरेण च शबलो भावविशेषश्च सः। तत एकैकस्य क्षणस्यानेककल्पतुल्यत्वमननं सर्वतः सङ्गोपनेन च स्वस्थैर प्रवर्तनाभावरसपूरतया कथञ्चिद्व्यतीय तत्कथामृतोद्गिरणनिर्वृत्या सततमनोरथैश्चानुभवं साक्षादुपभोगमिव मन्यमाना भवतीत्यनेकविधसंस्कारः[1]। अन्तःसाक्षात्सम्बन्धो बहिर्न तथेति च। एवं हि सत्यग्रिमभगवत्सङ्गे मुख्यरसास्वादयोग्यतैतेषां संस्कारत्वम्। एतदेवाभिसन्धायोक्तं संस्कार एव निरूप्यत इति। यद्यपि भगवति सर्वं सामर्थ्यं तथापि तद्रसस्वरूपमेव तथेति तथोच्यत इति भावः। विरुद्धायामयमेव त्यागात्यागनिर्णय इति। अयं त्यागपदार्थः, अयमत्यागपदार्थः, स चैवं कार्यः, अन्यथा न कार्य इति निर्णयरूपः अयमेव। उक्तरूपसंस्कारनिरूपणलक्षण इत्यर्थः। तथाहि। 'यदहरेव विरजेत्तदहरेव प्रव्रजे'दिति श्रुत्या प्रावाहिकाश्रममर्यादाया रागाभावमात्र एव त्याग उपदिश्यते, भक्तिमार्गे न तथेति ज्ञापनाय विरुद्धायामिति। सात्र भक्तिमार्गीयोच्यते। अन्यत्र विधाय्यमेव नाभिमतमिति सामान्यपदम्। एतासां विषयरागाभावेपि

१ विध संस्कार गृ पा।

फलरूपो भगवान् गृह एवास्तीति बहिर्गमने प्रयोजनाभावात् बाह्यो न त्यागः, किन्तु गृह एव स्थित्वा तत्प्राप्त्यनुकूलो यत्नः । यथा यथा भगवद्भावप्राचुर्यं तथा तथा बहिरङ्गसाधनत्यागोऽन्तरङ्गत इतिश्च । भगवत्सम्बन्धभावस्वभाव्येन यत्त्यक्तं भवति वैदिकमपि, तद् भवतु नाम, न तु स्वबुद्धिपूर्वकः कस्यचित्त्यागः । प्रियतोषार्थमशक्यत्यागा अपि दैहिकान्तःकरणधर्मा त्याज्याः । फलप्राप्तावपि यदा भगवदिच्छा तदैव त्यागः कार्यः, नत्वन्यदापीति वनगमन प्रार्थनरसन त्यागाञ्जलिबन्धगृहगमनैर्निर्णीयत इति तथा । अत एवाग्रे त्याग उक्तः । उक्तरूपादन्यथा कृतस्त्यागस्त्याग एव न भवति, फलरसाननुभावकत्वादिति त्यागपदस्य तात्पर्यं ज्ञेयम् । साधनदशायां तु[1] त्यागो न युक्त इति निर्गलितोऽर्थः । एतासां फलप्राप्तावपि पूर्वोक्तसंस्काररीत्या साधनदशैव । वस्तुतस्तु फलप्राप्तिनिश्चय एवाधुना, प्राप्तिस्त्वग्रे । अतो युक्तं गृहगमनम् । ननु 'नीवीं प्रति प्रणिहिते च करे' इति न्यायेन तदा स्वस्वस्मोक्षार्थमपि तदनुसन्धानं कथं घटते । इत्थम् । सङ्गमभाव एव रसिकभगवतोऽतिप्रीत्या स्वान्तरायासहिष्णुत्वभावनयेति बुध्यस्व । अत एव प्रियेण 'बद्ध्वाञ्जलिं मूर्ध्नी'ति तद्भावपरीक्षैव कृता । उक्तभावेनैव चेदेवं कृतं भविष्यति, तदा दृढयत्नसाध्यमपि दूरीकरिष्यन्तीति, देवहेलनहेतुकथनेन वसनत्यागे स्वारुचिः सूचिता । [2]साक्षात्तथात्व एव [3]तथाकरणं दुष्कम् । न तु तथा भावनायामपीति यतो भगवदाशयः । एतदेवाभिसन्धायोक्त—अत्यागस्त्यागादुत्तम इति ज्ञापयितुं परीक्षेति । अत एव मूले 'तत्पूर्तिकामाः' इत्युक्तम् । पूर्णाङ्गदृष्ट्या पूर्ते मन्यानस्यातथात्वे सति गमयपूर्तिरिति पूर्वोक्तरीत्या तत्पूर्तिकामा एव तथा कृतवत्य इत्यर्थः । वसनात्यागे शीघ्रमेव प्रियान्तिकागमनं स्यात्त्यागेन च विलम्बोऽभवदित्ययुक्तत्वे हेतुरिति ज्ञेयम् ।

एतदग्रे 'ब्राह्मणा मान्त्रिका' इत्यारभ्य सेव्यत इत्यन्तम् । पद्मपुराणे गीयते । दण्डकारण्यवासिनः षोडशसहस्रमृषयः स्वाश्रमान्तिकागतकोटिकन्दर्पाधिकलावण्यश्रीकोसलेन्द्र-[3]दर्शनजनितरमाभावभरेण तं प्रार्थितवन्तस्तद्रमणीयत्वम् । तदा भगवानेकपत्नीव्रतधरोऽहमधुना, व्रजे वो मनोरथः सम्पत्स्यत इति प्रसादं कृतवान् । त एवैता इति हृदि कृत्वोक्तं ब्राह्मणा इत्यादि । [4]आदिवाराहे 'कृष्णस्य रमणार्थं हि सहस्राणि च षोडश । गोप्यो रूपाणि चक्रुश्च तत्राक्रीडन्त केशवम् ॥' महाकूर्मे 'अग्निपुत्रा महात्मानस्तपसा स्त्रीत्वमापिरे । भर्तारं च जगद्योनिं वासुदेवमजं विभुम् ॥' अत एवैकजातीया ऋषयः षोडशसहस्राणीति पुराणान्तरादवसीयत इत्याचार्यैरुक्तम्[4] । अत्रेदं ज्ञेयम् । पुरुषशरीरे सति स्त्रीभावोत्पत्तिरसंभाविता,

---

१ 'तु' इति मूलपाठे नास्ति । २. दशमाङ्के ३. बक्षणगवरग । ३. कोशलेन्द्र-मू. पा. । ४...४. अङ्कान्तर्गत मूलपाठे टीकायां दर्शितं ।

विरोधात् । एवं सत्येतानतिशुद्धान् कृतपुण्यपुञ्जान् दृष्ट्वा हरिस्तथा प्रसन्नोऽभवद्येनादेयतम-साक्षात्स्वरूपानन्ददित्साविरभूत् । तदनुभवस्तु[1] न पुंस्त्वे केवलस्त्रीत्वे वा, मानाभावात्, द्विजस्त्रीषु तथा प्रपञ्चास्यापदानात्, अक्रूरादिष्वपि पुंस्त्वे दासु दानात् । किन्त्वचिन्त्यानन्त-शक्तेर्भगवतः प्रसादरूपा अपि शक्तयो बह्व्यः सन्ति । तत्राप्यन्तरङ्गतमा सैकाऽस्ति यत्सम्बन्धिजीवे भगवत्स्वरूपानन्दानुभवोऽवश्यंभावी । सा चोक्तरूपस्त्रीत्वलक्षणधर्मरूपैव । अतस्तामेतेषु स्थापितवानिति युक्तस्तदा तेषां स भावः, तदनुरूपो देहः परमधुना सम्पन्नस्तथा भगवदिच्छा यतः । एतदेवाहुः तेषां प्रसादरूपा शक्तिः स्त्री भवतीति । स्त्रीत्वलक्षण-धर्मरूपापि स्त्रीरूपा कात्यायनीरूपेत्यर्थः । सैव तदर्थं फलपर्यवसानार्थं सेव्यत इत्यनेन सम्बध्यते । अथ तेषां स भावो भगवद्भाव इति निश्चितम् । तद्द्वारा हृद्यागत एव भगवति तदुत्पत्तेः । 'रसो वै सः' इत्यादिश्रुत्या च भावरूपत्वेनैव निरूपणान्न धर्मरूपत्वम्, किन्तु धर्मिरूपत्वमत्र याशयेन पक्षान्तरमाहुः भगवानेवेति[2] । सेव्यो हि सेवके स्वं रूपं सम्पादयति । हृद्यागतेन भावरूपेणास्माकं देहादिरमेव सम्पादितमिति तद्रूप एव भगवान्सेव्यते । बहिरस्मद्रमणार्थं प्रकटो भवत्वित्येतदर्थं नायिकाभावत्वेन स्त्रीत्वमुच्यते । नैतावता काचिन्न्यूनता सगुणत्वं वेत्येतदाशङ्कानिरासायैव गुणातीत इत्युक्तम् । यथाब्धिजा-मृतदायकं तद्रूपम्, तथा स्वीयलोभामृतदायकमिदमिति ज्ञेयम् । एतेन 'दिव्यं ददामि ते चक्षु'रिति वाक्याद् भगवदीयचक्षुषैव यथा भगवान् दृश्यः, तथा स्त्रीत्वेनापि तादृशेनैव भगवान् भोग्य इति ज्ञापितम् । अत्रैवाग्रे चित्तदोषस्य गतत्वादिति । भ्रमजनको हि दोष इत्युच्यते । एतासां तु पूर्वमपि केवलं भगवदीयत्वाद् व्रताचरणहेतुभूतसंशयहेतुद्वितीयकोटिस्फूर्ति-स्तद्रूपैवेति ज्ञायते । कृष्णचेतस्त्वे भगवत्पतित्वनिश्चयेनेतरकोटिस्फूर्तिरपि गतेत्येतदभिसन्धायेद-मुक्तम् । दोषत्वमन्यानिश्चयस्यैव । तत्र च तादृक्स्नेहो हेतुः । तादृक्स्वभावत्वात्स्नेहस्य । अग्रे स्नेहसत्त्वेपि कृष्णचेतस्त्वहेतुकतत्प्रतियोग्युत्पत्त्या तन्नाश एवेति सर्वं सुस्थम् । सार्वदिकत्वेपि पुनः कृष्णचेतस्त्वोक्त्या कश्चन विशेषो वाच्यः । व्रतानन्तरमेवोक्तत्वेन तत्फलत्वमेव विशेष इत्याशयेन फलत्वमुक्तम् । अग्रे पुनः साधनोक्त्या चावान्तरफलत्वमिति विवेकः । तेन पूर्वस्माद्वैलक्षण्यं प्राप्यते ।

भूपानन्दसुत इत्यत्र, फलत्वाचकत्वादित्यारभ्य कृतमित्यन्तम् । अत्रायं भावः ।
पूर्वं माससमाप्यव्रतोपसंहारस्य कृतत्वात्पुनः पूजापूजनामभेदभिन्नमन्त्रकालभेदाना
१०-१९-५ कथनादृतव्रता इति प्रभुवाक्याच्चेदं व्रतान्तरमिति गम्यते । अपि च भगवत्पतित्व-
मात्रार्थत्वाद् व्रतस्य कृष्णचेतस्त्वेन चावस्तन्निश्चयेन भगवदेकमात्रव्रतानां तदर्थं तत्करणा-

---

[1] तदनुभवश्च मू. पा. । [2] भगवानेवेति मू. पा. ।

संभवः । किन्त्वतःपरं बहिरपि तथात्वमेवापेक्षितम् । तत्र च तादृक्कालस्यैव निमित्तत्वमिति तदभिमानिदेवता चेयमेवेति तथात्वेनैतस्या एवात्र पूजोच्यते । अत एव भगवतैव तस्याश्चतुर्दशनामस्विदं नामोक्तम् । मन्त्रेपि बहिः प्रकटतया पतित्वभवनमेव प्रार्थ्यते, अन्यथान्तस्तन्निश्चयसत्त्वेन तत्प्रार्थनानुपपन्ना स्यात् । अत एव न पूजाङ्गत्वमस्य, भिन्नविषयकत्वात् । अपरञ्च, पूर्वमन्यप्रार्थना हि कृता । तथा च तन्निर्बन्धेन तथात्वे स्वतोऽतथात्वे नीरसत्वं स्यादित्येवं प्रार्थना । अत एव न पृथग्भगवतः पूजा कृता, पतित्वेन भावनात् । न चैवं पूर्वमन्त्रस्याप्रयोजकत्वेन मन्त्रत्वानुपपत्तिः, भावकस्य तथात्वेनोत्तरभावप्रयोजकत्वात् । अत एव व्रतफलत्वेन कृष्णचेतस्त्वमुक्तम् । एतच्च यथा तथोपपादितम् । अस्मिन्मन्त्रेर्थभावनैव मुख्या, न तु जपोपि । अतः स नोक्तः । स्वेष्टप्रकारेण प्रियभावनमेवात्र पूजारूपम् । इदमेव भगवता 'मदर्चना'इत्यनेनोक्तमिति दिक् । किञ्च, भगवानेव वा गुणातीत इति पक्षे तु सर्वमवदातम् । अस्मिन्पक्षे उभयोरैक्येप्युत्तरस्या गुणविशिष्टत्वेन पूर्वस्याः सकाशाद् भेदः सिध्यति । तेन मतभेदेपि तथा । न चाचार्योक्तावान्तरफलत्वपरमफलत्वानुपपत्तिः, एककार्य्य एव तत्सम्भवादिति वाच्यम् । स्वामिन्युद्देश्यत्वेन फलस्य परमत्वस्य तन्नान्तरीयकफलत्वेनेतरत्वस्य च विवक्षितत्वात् । एवं सत्येककर्मसाध्यत्वमप्रयोजकमिति ज्ञेयम् । अत एव पुरुषभेदेनावान्तरफलस्यैव परमफलत्वमपि भवति । अत एव ज्ञानमार्गीयमोक्षेच्छोर्योगेन दोषनिवर्तनं, ज्ञानेन च मोक्षसम्पादनं सङ्गच्छते ।

अत्राग्रे वयस्यैरागत इत्यस्य विवरणे, एते हि बालका इत्यारभ्य तद्योगार्थं
चेत्यन्तम् । अत्रेदं ज्ञेयम् । भगवान्सृष्टिं कुर्वन् कांश्चन जीवान् पुंप्रकृतिकान्
१०-१९-८. कांश्चन स्त्रीप्रकृतिकानसृजत् । शरीरस्यातथात्वेपि तेषां तेषां प्रकृतिस्तथैव भवति । पुंप्रकृतिकास्तु हरिं भजन्ते, पुरुषांशप्रवेशात् । नेतरे, केवलप्रकृत्यंशत्वात् । अत एव भगवद्भजनविधाने 'को नु राजन्निन्द्रियवा'नित्यादौ सर्वत्र पुंल्लिङ्गेनैवाधिकार्युक्तः । अन्यथा स्त्रीणां हरिभजनमकर्तव्यं स्यात्, अविहितत्वात् । तेन शरीरगतपुंस्त्वस्त्रीत्वे अविवक्षितदुक्तरूपमेव विवक्षित्वा भजनं विधत्त इति मन्तव्यम् । तथा च जीवेष्वपि पुंस्त्वस्त्रीत्वे स्त इति ज्ञायते । एवं सति पूर्वोक्तास्वपि पुंस्त्ववत्यः स्त्रियः । ते चात्यन्तं प्रिया इति तत्सम्बन्धि सर्वं प्रियमिति महानुग्रहेण तद्धर्माणामप्यङ्गीकाराच्च तत्सम्बन्धि यत् किञ्चित् तद्वैयर्थ्यं न युक्तमिति तद्दोषपुंस्त्वाख्यं धर्ममप्येतासु स्थापयितुं तत्र तत्रावतारितवान् । इदमेवाधिदैविकत्वम्[1] । अत एवार्यदशायामुक्तं वचनं सत्यं कृतमित्येते जानन्तीति तान् साक्षित्वेन वक्ष्यति ।

---

[1] किञ्च, शरीरसम्बन्धेनास्य गुणानामपि सम्बन्धः स्यात्, नौकाद्वारा तत्प्रयोजकत्वेन पूर्वत्रानुसारेण फले भवतीत्यत्र पूर्वोक्तं चैव फलमिति । न तु रोग जीव इत्यादिना दिगित्यधिकं क्वचित् ।

'तदिमे विदु'रिति । स्वप्रेक्षणादौ सति विकारस्य सहजस्तद्दोष, तस्मिन्नत्यपराध स्यात्, तेन चानर्थसम्बन्ध स्यादिति क्षारेण मलनिवृत्तिवदतिक्रूराया स्त्रिया पूतनाया प्रथम सम्बन्ध कारितवान् । एतेषा महापुरुषत्वेपि तदा साप्यत्र भगवानत्र वा भगवानिति भावयतीति तानन्न निनाय । अत एव तदन्त स्थितावपि नासुरभावप्रवेशः । तथा सति त सम्बन्धजक्लेशेन तपसेव तद्दोषनिवृत्तौ स्वकृते च तेषा भक्षणमिति स्वान ददानाय तत्प्राणै सह तानप्यानीतवान् स्वस्मिन् । कुमारीपूजकरीया प्रसादरूपाया शक्तेर्भगवतो वा प्रवेशेन तादृग्भोगयोग्यता पर सम्पादिता, सहज पुरुषत्वेतासु स्थापितमेव । अन्यथा 'यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घना'दिति न्यायेन कामभाव एव स्यात्, न तु सर्वात्मभाव, स्त्रीस्वभावस्यैव तादृशत्वात् । [1]अत एव प्रौढभावोत्पत्ति, येन लोकवेदनैरपेक्ष्येण भजनम् । भगवतोपि स्वच्छन्दभोग[2] एतास्वेतासा च । यद्यपि भगवान् विनैव साधन सर्वं कर्तुं समर्थ इति शक्य वक्तु तथापि तत्तद्वस्तुमर्यादास्थापनपूर्वक भोगे महान् रस इति भगवतैव सर्वरसभोक्त्रा तथा क्रियते । अन्यथा विनापि स्त्रीत्व स्वान द दातु समर्थ इति तथैव कुर्यात् । अत एव वात्स्यायनीयानुसारेणैव रमते । 'भगवानपि र तु मनश्चक्रे' इति वक्ष्यते चात सर्वमवदातम् ।

अत्रैवाग्रे तासा वासास्युपादायेत्यस्य विवरणे, उपादायेत्यस्यान्यत्र

१० १९ ९ स्थापितमित्यर्थ इत्युक्तम् । अत्रायमाशय । वस्त्रग्रहणोक्तेरादाये येतावतैव सम्भवेपि गृहीतस्य ग्रहीतृसामीप्ये अयतः प्राप्तेपि सामीप्यवाच्युपसर्गकथन तद्विशेषाभिप्रायकमिति म तव्यम् । स एव स्वान्त स्थितेत्यादिना निरूप्यत । तच्चिन्त्यते । 'यः पृथिव्या तिष्ठ'न्नित्यादिश्रुतिनिरूपितत्वेन तस्य नैमार्गिकत्वद्धर्मसत्वाद् वस्त्रैस्तदाच्छादनकथनं न युक्तिगम्यम् । भगवता सह व्यवधानासम्भवाच्च । अत एव तेषु दैत्यप्रवेशोपि तथा । प्रयोजन चाच्छादनस्य न विद्म । तदभावार्थं नीपारोहणोक्तिरपि तथा । तत्र हि स्वयमारूढः । स्वनिष्ठत्वेन स्वद्वारा जगतस्तत्सम्बन्धो वाच्य । एव च सति भगवन्निष्ठत्वेनैव त प्रवेशासम्भवे तदारोहणं किमर्थम् ।

उच्यते । एके हि शास्त्रार्थत्वेन हरिं ज्ञात्वा तन्माहात्म्य च भजन्ते । तदपि न साक्षात्, किन्तु श्रवणादिधर्मद्वारा । वस्तुतस्तु धर्मानेव भजन्त, तेन वैदिकास्ते । अन्ये च पुत्रत्वादिधर्मपुरःसरमिति लौकिकधर्मद्वारा । अतस्तदनुरूपमेव फल तेभ्यो हरिर्ददाति । एता हि धर्मिमात्रे पर्यवसितमतय, न तु तद्धर्मेष्वपि । न वा धर्मद्वारा । नारदादिवद् यशोदादिवच्च । अत एव भगवताग्रे वाच्यमेव मदर्थोज्झितलोकवेदस्वाना'मिति । अत एव स्वाभाविकलज्जात्यागोपि । एव सति 'ये यथा मा प्रपद्यन्त' इति वाक्यादेतदनुरूपमेव

१ तत मू पा । २ स्वच्छन्द भोग मू पा ।

भगवतापि कार्यम्, सर्वमर्यादायाः पूर्वं स्थापितत्वमतो भजनमिति । भगवतापि स्वस्वरूपमर्यादात्येनदर्थं त्यक्ता । अत एव 'आत्मारामापी'ति वक्ष्यते । 'साधवो हृदयं मह्य'मित्यत्र 'मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपी'त्यपि भगवतोक्तम् । अन्यथा अकुण्ठितज्ञानशक्तेस्तदज्ञान-कथनमनुपपन्नं स्यात् । एषा हि पुष्टिरीतिः । अत्र मर्यादामार्गवैपरीत्यं न दोषाय, किन्तु गुणाय, मार्गस्यैव तथात्वात् । एवञ्च भगवत्स्वरूपदर्शनस्यातिरिक्तस्य यथा न भवति तथा स्वरूपं गूढमिति तु यस्य । 'नाहं तेभ्य' इति वाक्यार्थस्य ज्ञानं नायथिविषयकम्, तथा स्वरूपमप्येतदर्थं प्रकटीकृतमेतदितरासम्भवमिति भगवता सह व्यवहारमपि सम्भाव्यते । अलौकिकश्चायमर्थो वचनवशेन भक्तिमार्गीयाभिप्रायेण चावगन्तव्यः । अतो न व्यापकत्वेन तदसम्भवः शङ्कनीयः । अन्यथा 'हृदिस्थ कुरु करतरम्' 'निभृतनिहृदयं न यस्ये'त्यादिकमनुपपन्नं स्यात् । श्रुतिरपि 'तद्दूरे तद्वन्तिके' इत्येतदभिप्रायिकैव । अभिप्रायक्रमानभिज्ञ वस्तुतस्तथेति नानुपपत्तिः काचित् । यत्तु 'नीवारोहणानुपपत्ति'रिति तत्रोच्यते । भगवान् हि लीलां कुर्वन् शास्त्रार्थमपि बोधयति । एतद्भावनतामत्र मात्र उत्पन्नमत्र , अस्येषा दुस्तरा । तच्चानुरूपधर्मविशेषस्वरूपकः । स च भगवदधिष्ठितैर्वस्त्रैरेतदुक्तकर्म, श्रवणादिभिश्च शीघ्रं निरस्य इति ज्ञापनार्थं वस्त्राणि आदानाराहरणयोरित्येतत्तात्पर्यं ज्ञाय ग्रन्थ इति नोक्तानुपपत्तिः । ननु सेवकेषु सत्सु स्वयमीश्वरः कुतो वस्त्राणि जगृहे । अगृहीतैव तन्निकटे[1] एव वा कथं नाकारितवांस्तत्राह तासामावरणमिति । नह्यत्र वसनग्रहणमुच्यते । किन्त्वेतासां साक्षाद्-भगवत्सम्बन्धे तदावरणस्य हरणम्, तच्च नान्यशक्यमिति वस्त्रव्याजेन तद्बोधयन् पूर्वोक्तं स्थापितमित्यर्थः । भगवत्कृतिर्लौकिककरन् प्रतीयते, परं वस्तुतस्त्वलौकिकी । तत्त्वेन भानं च भगवद्दर्शनेन भवति, नान्यथेति भावः ।

एतन्मे हसद्भिः महदत्तालैरित्यत्र, तेषामपि मायाधिदैविकीत्यादि । यदि

१० १९ ९ भगवान् स्वसम्बन्धं तत्र जानीयुस्तदा पुरुषास्तत्त्वज्ञानाभावेन तद्दृष्टिपातेऽपि

भयाभावज्ञानाभावात्[2] प्रथमकारण एवागच्छेयुः । तत्र च तथा न ज्ञापयन्त्य यथा च ज्ञापयतीति तत्कापस्थ माया । तथा च पुरुषास्तत्त्वज्ञानेन स्वस्य चान यत्वेन नच्छद्द्या नागता इति । एतेषामाधिदैविकत्वेन भगवदिच्छानुसारित्वेन च तत्राधिदैविकत्वम् । प्रमारिच्छा तु रसविशेषार्थं परीक्षासम्पत्त्यर्थं चेति ।

अस्मदीयः काम इति । लोके हि क्रियाफलस्य स्वसामानाधिकरण्यवैयधिकरण्यविव

१० १९ १० क्षयैव गतिक्रियायामागमनगमनशब्दौ प्रयुज्येते वक्त्रा, तथा चागच्छेत्येतावतैव

स्वनिकटदेशप्राप्तावत्रेतिपदं किमर्थम् । न चाभिमुख्यस्यैवार्थत्वेन देशविशेषा

1 तन्निकटस्थ मू. पा. । 2 भयाभावज्ञानात् मू. पा. ।

कांक्षापूरकत्वेनात्रपदं सार्थकमिति वाच्यम् । 'स्वं स्वं वासः प्रगृह्यता'मिति वाक्यादागमनस्य तदर्थत्वादन्यत्र स्थितौ ग्रहणासम्भवात् तत एव तद्योग्यतत्प्राप्तेः । दण्डेन घटं कुर्वित्यत्र दाढर्यस्येव । अपरञ्च । आभिमुख्यपदार्थोपि विचारणीयः । न च सांमुख्यमात्रं सः । सम्मुखं स्थित्वा पश्चाद्गच्छ यत्यागच्छतीति प्रयोगापत्तेः । किन्तु वक्तृनिकटदेशसंयोगफलक-क्रियाजनकप्रयत्नः सः । इतोपि नात्रपदं सार्थकम् । न च तत्रागत इतिप्रयोगान्न तथेति वाच्यम् । तत्र प्रयोगद्वयमपि लोके दृश्यते । उक्तरूपाभिप्रायवतस्तु नियमत आङ्प्रयोगो दृश्यत इत्याङोऽत्र शक्तिः । तत्रागत इत्यादौ तु वक्ष्यमाणदेशस्याभीष्टत्वेन तत्र स्वस्थितिमिव मन्यमानस्यौपचारिकः प्रयोग इति स्वयाप्युररीकर्तव्यमिति चेत् ।

उच्यते । एतावत्पर्यन्तं भावनयैवैताः सर्वं कृतवत्यः, न तु[1] साक्षाद्भगवत्प्राकट्येन । तच्च साक्षादप्राप्तावेवोचितम्, न तु प्राप्तावपि, एतदतुच्यत्वात् । जातेपि प्राकट्ये पूर्वोक्त[2]-स्थितिर्नोचितेति भावितं तत्कार्यं च त्यक्त्वा अत्र प्रकटे मय्यागत्य वासः प्रगृह्यतामित्यर्थः । किञ्च, एतावत्कालपर्यन्तं भावनयैव कामपूर्तिरासीत् । स च न मुख्य कामः, किन्तु तदाभासः । अतो मुख्यं काममेव ददामि वासोरूपेण लोके परिदृश्यमानं परं वस्तुतस्तु मदीयकामरूपमिति सामानाधिकरण्यमुक्तं कामं वास इति । अत एवाग्रे न भावनामात्रेण कामपूर्तिः साक्षात्सम्बन्धं विना । एतदेवाभिसन्धायोक्तमाचार्यै'रस्मदीय कामः' इत्यादि । तत्र भावनायां मुख्यः कामभावो न भवतीत्यर्थः । अन्यथेति । ईश्वरत्वेन तन्निमित्तकवस्त्रा-भावस्याभावे रसमर्यादाभङ्गः स्यादित्यर्थः । दत्तस्यादानं ग्रहणम् । तत्र प्रियस्य रसवशात् स्वाधीनत्वे सति तदीयस्याददत्तस्यापि रसाधिक्येन बलाद्वाससो ग्रहणं प्रकर्षः प्रशब्देन घ्वन्यत इत्यभिप्रायेणाहुः वासोपीत्यादि । अत्र स्वं मदीयं स्वं स्वकीयं यथा भवति तथा प्रगृह्यता-मित्यर्थः । एतेन भवतीषु नादेयं किञ्चिदस्तीति सूचितम् । सम्बोधनेन पूर्वं वस्त्ररहिता अपि सन्निकटे समागत्योक्तरूपबलनयो भवत्यो भवन्त्वित्यप्यर्थः सूचितः । वाच्येर्थे वाससामेतदी यत्वस्यानुक्तिसिद्धत्वेन तदुक्तिवैयर्थ्यमाशंक्येत, तदपनोदनाय तद्ध्वनितमर्थं पक्षान्तरत्वेनाहुः अस्मदीयाभिरित्यादिना । अधुना यूना वस्त्रदत्काममभावमपि त्यक्त्वा निहरन्ति, मुदेति-पदाद्भावनयैव पूर्णमनोरथा इति ज्ञापनात् । तथा च सम्बोधनेन स्वातन्त्र्याभावात् स्वाधीनत्वेन[3] स्वकीयत्वं घ्वन्यते, तेन ग्रहणेधिकार उक्तो भवति, स्वपदाभ्यां च पूर्वसिद्धं स्वत्वमनूद्यत इति कृपिवदशायां प्रार्थनादेतुर्य. कामः पूर्वं इहैव वा पूर्वकालीनो यः स घ्वन्यते । एतदेवोक्तमस्मदीयाभिरेव पूर्वपरिग्रहः कर्तव्य इत्यनेन । पूर्वपरिग्रहस्त्यक्तार्थपरिग्रह इत्यर्थः । अन्यथेति । अस्माभिर्निजबलेनैतावत्साधितम् । तेनैव अन्यदपि साधयिष्यत इति

---

१. न तु तत्र साक्षाद् मू. पा. । २. पूर्वोक्ते मू. पा. । ३. स्वाधीनत्वेन मू. पा. ।

भावे सति भगवदधीनत्वाभावेनोक्तरूपाधिकाराभावात् कर्मफलस्यानुपपत्तेन तथाकृतत्वेन दत्तवस्त्र-परिग्रहोऽनिष्टः स्यात् । सर्वभावप्रपत्त्यैकलभ्यो रसो हीष्टः । तदितरोऽनिष्टः स स्यादित्यर्थः । एतेन पूर्वं स्वं स्वकीयमेवाधुना त्यागात् पुनः स्वं यथा भवति तथा गृह्यतामित्यप्यर्थो मूलस्य ध्वन्यते । पूर्ववत् प्रचुरभावयुक्ता भवन्त्विति भावः । भगवतो हि स एवेष्टः । अन्यथा रसाभासः स्यात् । एतदेवान्यथानिष्टः स्यादित्यनेनोच्यते । अथवा । वीप्सया नायिकाभेदेन यादृश्या यादृशो भावस्तादृशो तादृशमेव तं गृह्णातु, न विजातीयमित्यर्थो ज्ञाप्यते । विजातीयग्रहणे रसपोषो न स्यात् । एतदेवोक्तमन्यथेत्यादिना । उच्छलिते रसे त्वन्या व्यवस्थेति न काचिदनुपपत्तिः । तदर्थमेवैतत्करणं यतः । यद्वा । त्यागात्याग-निर्णयरूपत्वादेतत्प्रकरणस्य तन्निर्णयोऽप्यनेन ध्वन्यत इत्याहुः अस्मदीयाभिरित्यादि । अत्रायमाशयः । अधुनैनासां भाव्यवस्थान्तरस्फूर्तौ हि स्वरानुसन्धानपूर्वकं वसनस्थापनं तीरे स्यात्, किन्तु रसभरवशेनेयमेवावस्था मे सार्वदिकी कदाचित् तदपेक्षायां प्रियस्योत्तरीयमेव ग्रहिष्य इति प्रत्येकं भावोत्पत्तेर्वसनानां त्याग एव कृतः, न तु स्थापनमात्रम् । एवं सति त्यक्तार्थपरिग्रहत्वेन तद्ग्रहणं न युक्तं स्यादिति । तन्निषेधकवाक्यस्य मर्यादामार्गीयपरत्वात् धर्मिपराणां वचनानधीनत्वेन केवलं तदधीनत्वात् तदत्तस्य त्यक्तस्यापि ग्रहणं युक्तमेवेति । अन्यथा मर्यादामार्गीयत्वमित्यर्थः[1] । किञ्च, केवलवस्त्राणां त्यागोऽभूत्, भगवांस्त्वधुना स्वकीय[2]-कामरूपाणि तानि ददातीति त्यक्तार्थतापि नात्र । आचार्यैस्तु लोकदृष्टिमपेक्ष्य समाहितम्, त्यागनिर्णयकथनार्थं च । वा पूर्वपरिग्रह इत्यत्र नञ्प्रश्लेषो वा कार्यः । यद्वा । पूर्वपदेन पूर्वः पुरुषाख्यो धर्म उच्यते । तदभावे सर्वभावप्रपत्तिर्न स्यादित्युक्तम् । तेन पूर्वं दण्डकारण्ये पुरुषा एव गोकुले समागत्य स्त्रियो जाता इति पूर्वसम्बन्धं स्वस्य स्मारयन्त्यागत्यावत्य इत्यनेन सम्बोध्य कर्तव्यमाह । सः [3]तच्छब्दस्य पूर्वपरामर्शित्वेन पूर्वः पुरुषाख्यो धर्मः प्रगृह्यतामिति । अत्र स्वशब्दस्यात्मीयरूपस्य कथनात् तद्विशेषणत्वम् । ध्वनितेऽर्थे लिङ्गादेरविवक्षितत्वेनापि तथा । क्रियाविशेषणं वा । सर्वभावप्रपन्नाभ्य एव स्वानन्दं शृङ्गाररसरीत्यैव दास्यति । स च मानखण्डितादिभावैरेव पूर्णो भवति । सर्वात्मभावस्फूर्तौ च न तत्सम्भव इति कदाचित् तत्सम्भवः कदाचिन्नेति विकल्पेन गृह्यतामित्याह वाशब्देन । विसर्गलोपश्छान्दस इति मूले ध्वनितोऽर्थो ज्ञेयः ।

माऽनयं भोः कृथा इति श्लोकस्य विवरणे उक्ता राजसादयो ये गुणास्ते स्वा-
१० १९ १५ मिनीभावानामन्योन्यं वैजात्यं ज्ञापयितुं दृष्टान्तरीत्या, न तु प्राकृततद्रूपाभिप्रायेण ।
अथवा 'न तदस्ति पृथिव्यां वा' इति वाक्याद् गुणरहितं वस्तु त्रिलोक्यां न

---

१. मार्गीयत्व इत्यर्थः । मू. पा. । २. स्वीय–मू. पा. । ३. 'वास इति पदे वा इति स इति पदच्छेदेन व्याख्यानं ज्ञेयम्' । एतट्टिप्पणं मूले नास्ति ।

सम्भवतीति महिलत्वादिना प्रत्युच्यते। अत्रैते भावा एव तद्रूपाः, न तु प्राकृता अत्र सन्तीति। एतेनात्र प्रकृतिरपि भिन्नैवेति ज्ञाप्यते। सा च स्थायिभावरूपैवेति ज्ञेयम्। अत एव भगवता पृथिव्यादय उक्ताः, न तु सामान्यतः। लीलाया अलौकिकत्वेनाजन्यत्वेन च पृथिव्यादि-मध्यपातित्वाभावाद् ब्रह्मवत्। एतद्विद्वन्मण्डने प्रपञ्चितमस्माभि।

अत्रैव ततो जलाशयादित्यत्र मूले तत इत्यानन्तर्यमात्रमुक्तम्, न तु श्रुत्वेत्यादि-ज्ञानवाचकम्। तत उक्तं वाक्यार्थापरिज्ञानेपीति। स चेश्वरवाक्यमेव
१० १९-१७ कर्तव्यमित्यादिनोक्तः। ईश्वरवाक्येनेत्यादि। माऽनयं भोः कृथा इति श्लोकविवरणे ये राजसराजसादयो गुणा उक्तास्तद्भावनवशात् तादृशवचनान्येवोक्तवत्यो, न त्वागता, तदा प्रभुणा दासीत्वादेवागन्तव्यमित्यनुक्त्वा, यदी युक्तं यत्, तेनानागमने दासीत्वमपि न सेत्स्यतीति ज्ञापितम्। तच्चानिष्टमिति भयरस उत्पन्न। सर्वान् भावास्ति-रोहितान्करोदितीश्वरवाक्येन तेषां तिरोभावे सर्वासामेकरूपत्वेनैकेनैव रूपेण सर्वा आगता इत्यर्थ। नन्वत्यन्ततामस्य इति। परपुरुषादा मानं बालेभ्यो न दर्शयिष्यामो, भगवदुक्ता अपीत्याग्रहस्तमःशब्देनोच्यते, बालेषु स्वधर्मत्वेन पुरुषान्तरत्वाभावेपि तथात्वेनाज्ञानात्। एवं सति भगवद्वाक्यादागमनं न सम्भाव्यत इति कथमागता इत्यर्थः। एतत्समाधानेऽयमाशयः। स्वनिकटे समानेयाः, सर्वथा परीक्षार्थं बालकस्वरूपं च न ज्ञापनीयम्। एवं सति तदुभयसम्पत्त्यर्थं लीलोपयोग्याधिदैविकः कालो मुख्य सेवकः स्वधर्मं शीतमन्तर्बहिश्चाविष्कार्य जलान्तःस्थितौ बाधकम्। अत एवेतः पूर्वं जलविहारेपि न शीतमभूत्। तेन तत्र स्थातुमशक्ताः [1]कर्शनतोया पूर्वोक्ताग्रहस्यापि तिरोधानादागता इति। एतदेवोक्तं स्वभावाधीना एवेत्यनेन। नन्वेवं कालाधीनत्वं स्यान्न भगवदधीनत्वमिति चेत्। स्यादेव यद्याज्ञया नागत स्यात्। नत्वेवम्। पूर्वं श्लोकयोः पश्चाद् भगवदनुदितयाऽस्योक्तकारित्वयाः सिद्ध्यर्थमेवा-गमनात्, यतो भगवता तथैवोक्तम्, यदिपदेनाधुनानागमने पूर्वोक्तं द्वयमपि न सेत्स्यतीति ज्ञापनात्। अतोऽत्रापि भगवदुक्तकरणं सम्पद्यतामिति मया यत्रागमनं तत्रैव सामर्थ्यकोक्तकरणं स्वतःसिद्धमिति बुध्यस्व। शीतोक्तिरक्ताग्रहदार्ढ्यज्ञापनायेति ज्ञेयम्। एवंभूता अपि पूर्वं न निर्गता इति। तत एवम्भूतोक्त्यनन्तरं त्वागता एवेत्यर्थ। यदीति पदं श्रुत्वा स्वाग्रहविपरीत प्रियाग्रहं ज्ञात्वा स्वेष्टप्रतिबन्धं च ज्ञात्वा तथा नकु। तत्रापि स्वप्रधानाद्भमाच्चाद्येति निगूढाशय। तेन कथन स्वाग्रहमत्यक्त्वैवागता इति स्वभावाधीना एवेत्युक्तमाचार्यैः। भगवदनभिमतकरणं कालधर्मो बाधत इत्यपि ज्ञापनाय शीतोक्तिर्ज्ञेया। सम्भवदुक्तिकः पूर्वमस्माभिरुक्त आशय इति सर्वमवदातम्। ज्ञानदृष्टिः सर्वत्र न व्यापृतेत्यादि। अत्रेदं ज्ञेयम्। भगवत

[1] कर्पणोतया मू पा।

एतत्सर्वाङ्गदिदृक्षातिप्रचुरेपि तत्प्रतिघाते रोपोऽभवदिति तद्भाववर्णनं कृतमतस्त्याज्या इत्यनेन । मध्ये प्रसादितत्वोक्त्यायमर्थो लभ्यते । यत्र पाण्यन्तरायमपि न सहते, तत्र वस्त्राणि कथं ददातीतिशङ्काऽभावाय वृक्षस्कन्धनिधानता पर्यमाहुः तासामावरणानीत्यादि । अत्रायमाशयः । पूर्वं भगवदन्तरायवेनान्यत्र स्थापितयि युक्तम् । अत परं यथा वैष्णवसङ्गो भगवत्प्रापक-स्तथैतद्वस्त्राणामपीति वृक्षस्कन्धे निधानेन तादृधर्मयुक्तान् कृत्वेत्यर्थं । तेपां परार्थता भगवतैवानुपद वक्ष्यते यत इति भावः । एतेषां तत्प्रापकत्व रसोद्बोधकत्वेन । तेन तादृक्संस्थानविशेषकृतिरपि लक्ष्यते । तदानीं प्रीतियुक्तत्वे विशेषहेत्वपेक्षायां तमाहुः तासां निदानं श्रुत्वेति । वयस्यसहिते त्वयि सति वाक्यादनागमनमागमन वा साध्वसाधु वेति वयं न विद्मः । केवल त्वदीयाश्च वयम् , अत किं कृते किं मनुते भवानिति शङ्कितहृदयासु यथोचिता रक्षा त्वयैव कार्येत्यादिरूपं श्रुत्वान्यत्वं ज्ञात्वा तथा जात इत्यर्थं । यद्वा निदानं निजं स्वरूपमित्यर्थः । तथा च पद्मिनीनां नीवीषु पद्मगन्धो भवतीति यदा वृक्षस्कन्धे विविच्य स्थापितास्तास्तदा मधुपकुलाकुलतया तदीयझङ्कृतिश्रवणमेव निदानश्रवणम् , तेन स्वानुरूपनायिकोत्तमत्वज्ञानेन रसभावोद्बोधात्तासु प्रीतोऽभवदित्यर्थः ।

बद्ध्वाञ्जलिमित्यत्र । क्रियाशक्तिर्बाहू इत्यर्थः । क्रियामूलस्यापीति ।
१०.१९.१९ बाहुमूलस्यापीत्यर्थः । यज्ञदाने लोके वेदे च मुक्तेरेव परमफलत्वप्रसिद्धिरिति तस्या भक्तिमार्गेऽप्यत्र प्रकटीकर्तुमाहुः ननु तर्हि मुक्तिमेव दद्यादित्यादि । सर्वदु खाभावरूपत्वेन मुक्तेरुक्तरूपकरुणत्वस्य तदैवोपपत्तेरिति भावः । एतद्दाने हेतुत्वेन विशेषणव्याख्यानेन येषु नायं तोषस्तेभ्य एव मुक्तिदानम् , न त्वेवमूतेष्वपीति भावः सूचित । तथा च तदल्पत्व स्पष्टमेव ।

इदं प्रलम्भ इत्यत्र, लौकिकदृष्ट्यभावस्याविचार्यत्वे बाधकमाहुः अन्यथेति ।
१०.१९.२२ असूयाहेतुत्वेन लोके ये धर्माः प्रसिद्धास्तेष्वनुभूयमानेष्वपि तदसम्भवश्चेत् , तदा सिद्धमलौकिकत्व भावस्येति तात्पर्येण मूले ते निरूपिता । न च स्नेहमात्र-मेतेनोक्तमिति वाच्यम्, तद्वतीनामपि खण्डिताकलहान्तरितादीनामसूयासम्भवात् , ईश्वरेऽसूयानिष्टहेतुरिति शास्त्रज्ञानवतां स्नेहरहितानामपि तदसम्भवाच्च । न च खण्डितादीनां सङ्गाभावात्तथात्वमत एवात्राप्यन्ते विशेषणं तथेति वाच्यम् । यदा प्रलम्भनादिस्तदा वक्ष्यमाणसङ्गाभावात् तत्सम्भवात् खण्डितादीना मियं प्रत्येव तथोक्तेः सङ्गामानाभावाच्च । न च पूर्वकालीनः स तथा, उत्तरेण सङ्गेन तद्बाधात् । न च पूर्वकालाधिकरणकसङ्गा-भावस्तदाप्यस्ति, तस्यात्यन्ताभावरूपत्वाद्विशिष्टाप्रसिद्धावपि खण्डश प्रसिद्धेरिति वाच्यम्, उत्तरकालीनातिरिक्तस्य सङ्गस्य प्रतियोगित्वे मानाभावात् गौरवाच्चात्यन्ताभावत्वाभावात् ।

न चैतेन दोषमात्राभाव उपलक्ष्यते एतास्विति वाच्यम्, दोषाणां हि मूलमभिमानस्तदभावश्चाञ्जलिबन्धपर्यन्ताज्ञाकरणेनैवोक्त इति पुनस्तदुक्तिवैयर्थ्यापत्तेः। तदेतदुक्तं **सर्वथा निरभिमानाना**मित्यनेन। एवं च सति सङ्गे सत्यपि लौकिकरीत्या भावे सत्यसूया भवतीति तदभावोक्त्या लौकिकदशत्वभाव एवोक्तो भवति। स च न रूक्षः, किन्तु महारस इति ज्ञापनाय प्रत्येकविशेषणनिर्धारणीयार्थानाहुर्**भगवद्वचने** चेत्यादिना। एतासामेतादृशो विशुद्धभावो येन वसनद्वारापि सम्बन्धं साक्षादिवान्वभवन्निति मूले प्रेमसङ्गनिर्वृता इत्यनेनोक्तं तदभावहेतुभूतेन। अन्यथा हेतुत्वेनोक्तदृढप्रलम्भाव्यवहितोत्तरक्षणेऽसूयोत्पत्तौ प्रतिबन्धकाभावादुक्तानुपपत्तिरिति भावः।

परिधायेत्यस्य विवरणे, **रसाकारा जाता** इति। रसः शृङ्गारस, स हि स्वयोग्येष्वेवाङ्गेषु प्रकटीभवतीति स्वशास्त्रे सिद्ध इत्यङ्गानामतादृक्त्वे रसाश्रयत्वमपि न स्यादिति तादृशत्वमत्र जातमिति ज्ञापनायैव धनुःकवचादिसम्पन्नाः
१०-१९-२३.
रणार्थं सज्जिता वीरा प्रेष्ठसंगमसज्जिता जाता इत्युक्तमित्यर्थः। वाससां कामरूपत्वात् तदनन्तरं तथात्वमुक्तम्। ननु कुमारीणां तदैवोक्तरूपत्वमनुपपन्नमित्याशङ्क्य विपक्षे बाधकमाहुः **अन्यथे**ति। तादृगवयोद्गादिसम्पत्त्यभावे कामशास्त्रोक्तनखदन्तताडनादिव्यापारोद्बोधनीयरसानामाश्रयाभावः स्यादित्यर्थः। तथाच मूलोक्तसंगमपदार्थबाधप्रसंग इति भावः। उक्तभावेऽपि यथाकथञ्चित्संगमे पूर्णरसाभावेन क्षीणरसत्वं वा स्यादित्यर्थः। पूर्वं दारिकात्वकुमारीत्वोक्त्याधुना च रसाकारत्वनिरूपणेन भगवानेव गुणातीत इत्यादिनोक्तभगवत्स्वरूपात्मिकैवासां देहेन्द्रियान्तःकरणादिरूपा सामग्रीति ज्ञाप्यते। कालक्रमं विनैव तदैव तथात्वादिति।

लज्जायितेक्षणा इत्यत्र, **पूर्वस्वदोषेति**। प्रथमाकारणेऽनागमनं दोषः। वस्तुतस्त्वधुना प्रेमप्रकटितरसभरभरितत्वेन तत्स्मानुसन्धानमसम्भावितमिति तत्समयोचितभावस्थितिरेवैषेत्याहुः **तदेदं भावस्थिति**रिति।

सङ्कल्पो विदित इत्यत्र, भवतीनामित्यस्य विवृतिः **सर्वासामेवाज्ञातस्वरूपाणा**मिति। स्वरूपतो धर्मतश्चेति द्वेधा वेदनं सम्भवति, इह तु भवतीनां
१०-१९-२५
सङ्कल्प इति पदन्यासेन सङ्कल्पस्यैव वेदनम्, न तु स्वरूपस्यापीति ज्ञाप्यते। स्वरूपस्य रसात्मकत्वेनानुभवैकवेद्यत्वादग्रे वेदनं भावि। संप्रति तु सङ्कल्प एव विदित इति रसोक्तिः। 'लोकवत्तु लीलाकैवल्य'मिति न्यायादसमर्यादयैव भगवानेतत्स्वरूपानुभवं करिष्यतीत्याशयेनैवमुक्तम्।

मयानुमोदित इत्यत्र, **अनेन कार्याधीनत्वादित्यादि** । अमाविति पदेनोक्तोऽर्थः कार्यपदेनोच्यते । फलं च भगवद्रमणम् । तच्चैतन्निवेदितदेहेन्द्रियादिभोगरूपमेव । तच्चोक्तकार्यमध्यपाति । कार्यं चैतत्कर्तृकत्वेनैतदधीनमिति तथा । असाविति पदोक्तपूजाया भगवति विविधरसभावजनकत्वेन तत्पूर्वकस्मितविन्यासेक्षणादिभिस्तद्भावः पूर्यते, नान्ययेति परस्परं भोग एवाद्भुतः सम्पद्यते । इदं चोक्तपूजामध्यपाति, पूजयन्तीकर्तृकनिवेदितभोगस्य पूजामध्यपातित्वात् । एतस्या एव रसमर्यादाक्रमेण पूजाया अग्रिमफलसाधकत्वमिति सुष्ठूक्तं **गोपिकाधीनमेव फलमिति** । अत एवाधुना न रमणम् । तत्र कृष्णचेतस्त्वेन मानसनिश्चये सत्यपि 'यदि मे दास्य' इति वचनेन 'यूयं विमला' इत्यादिवचनेन च जनितो यः फले संशयः सोऽपि निवारित इत्यर्थः ।

अत्रैव याताबला इत्यस्य विवरणे, **यथा भूमिरित्यादि** । अस्य कामस्य का
१० १९ २७ या तरानुत्पादकत्वेन[1] दृष्टान्तीकृता धाना इति तद्व्यञ्जितोऽर्थोऽत्रोच्यते । ते
हि पूर्वावस्थाया भूमावुप्ता अङ्कुरोत्पादकाः । तत्र न हि विजातीयाङ्कुरानु-
त्पत्त्यर्थं रक्षार्थं भूः यत्र नीयते, किं तु तदुत्पादका भौमा दोषा एव निरस्यन्ते । प्रकृते तु भगवानस्मानतः परं यत्र कुत्रापि स्वसङ्ग एव नयतीति स्वामिनीनां हृदयम् । तच्चाधुना रसपोषाय लौकिकविरोधाद्रसाभाससम्भवाच्च न कर्तव्यमत इयमाज्ञेति । यद्वा । भौमा एव भूसम्बन्धिनो हलादय एव परं भूसमीपं नीयन्त इत्यर्थः । तेन यथासम्भवं भवतीरुद्दिश्य सन्ध्यादिष्वागमेव व्रजमागमिष्य इति भावः ।

मयेमा रंस्यथेत्यत्र, रमणसहितास्ता इति । आसां क्षपाणामेतन्मात्रभोगार्थमेवाविर्भावादेतज्ज्ञापको धर्मविशेषः क्षपासु वर्तत इति तद्दर्शनेन स्वरमणनिश्चयोऽभूदित्याशयेनेदमुक्तमिति ज्ञेयम् । अत्रैवोपसंहारे **तासामर्धभक्तिरिति** । अङ्गसङ्गाभावादर्धत्वम् ।

अत्रैवाग्रिमप्रकरणार्थनिरूपणे, **अन्यथा गोपालानामनर्थपर्यवसानं स्यादिति** ।
१० १९ २९ अत्राथ गोपैरित्यनेनोक्ता गोपाला उच्यन्ते, न तु पूर्वोक्ताः, विनियुक्तत्वात् ।
गोपपदेनैव च तद्व्यावृत्तिः, तेषु तदभावात् । अत एव मूले तेषु वयस्यत्वादिकमेवोक्तम्, न तु गोपत्वमपि । स्तोकादयो यदि व्रजस्थं वस्तुमात्रं न केवलं भगवदर्थं किं त्वन्यार्थमपीति जानीयुस्तदा पूर्ववृत्तान्तश्रुत्या प्रभौ दोषारोपं कुर्युः । स एव चानर्थरूपः । यदि तदर्थमेव सर्वमिति जानीयुस्तदोक्तवैपरीत्यमित्यर्थः ।

---

[1] —नुत्पादकत्वेम् पा ।

अत्रैव वृन्दावनाद् गतो दूरमित्यस्य विवरणे, वृन्दावनस्य स्त्रीप्राधान्यादित्यादि।

१०-१९-२९. अत्रोपक्रान्तत्वात् परार्थताज्ञानमेव ज्ञानपदेनोच्यते । भगवदीयव्रजस्त्रीणां तु रसभावभरेणास्मदर्थमेव प्रभुप्राकट्यमिति ज्ञानं दृढम् । अत एव वक्ष्यन्ति च 'व्यक्तं भवान् व्रजजनार्तिहरोऽभिजात' इति । एवं सति तद्वने तद्विपरीतज्ञानं न सम्भवतीत्यर्थः । भगवदतिरिक्ते वस्तुनि तूपेक्षेति तस्मिन् [1]तदर्थत्वात्तदर्थत्वज्ञाने अपि न सम्भवत इति भावः ।

निदाघार्कातप इत्यत्र, व्रजजातापेक्षयेति । भगवदन्तिकागमने निवारकत्वाद् वृक्षाणां

१०-१९-३०. चैतद्रमणानुकूल्यत्वात्तथा त्वमिति भाव । यद्वा, व्रजजाता वृक्षा एवात्रोच्यन्ते । तेषु लीलाविशेषानुपयोगात्तथात्वम् ।

परार्थैकान्तजीवनानित्यत्र, परार्थजीवनानित्येतावतैव चारितार्थ्येऽपि यदे-

१०-१९-३२. कान्तपदयोः कथनं तत्तात्पर्यमाहुः तदा अन्ते धर्म इत्यादि । जीवनस्य परार्थसाधनत्वेन तत्पूर्वकालीनस्य तस्य तथात्वं वाच्यम् । तथाचोत्तरक्षणे जायमानः परार्थः पूर्वक्षणीयजीवनस्यान्ते भवति । स च न प्रासङ्गिकस्तथा, किन्तूद्देश्यत्वेन मुख्यः । एतदर्थमेकपदम् । एतदेवोक्तमन्ते या मतिरित्यादिना । एवं सति परार्थ एवैको मुख्योऽन्ते यस्येति मूलार्थः सम्पद्यते । अस्मिन्नेव पक्षे योजनान्तरमप्याहुः एकान्तत इति । यथोपवासा इत्यादि । एतस्यैव विवरणं विद्यमानमित्यादिना क्रियते । तथाहि । तदस्था स्थितस्य रन्तिदेवस्य तदभावे अन्नाभावे सति ये जाता उपवासास्ते तस्य मोक्षहेतवो जाता इत्यर्थः । तथा चैतादृशास्त उत्तमा इति भाव । स्वत इति । स्वत एवान्नाभावे सति न तु दानप्रयुक्त इत्यर्थः । ईदृशस्यान्यतोऽन्नप्राप्तिसम्भवेऽपि स्वस्यापेक्षासत्त्वेपि तत्पीडाभावाय तद्दत्तान्नाग्रहणेन य उपवासः स मध्यम इत्यर्थः । तदुभयाभाव इति । स्वतः परतश्चान्नाभावे सत्यन्नकामनायां सत्या य उपवासः स तथेत्यर्थः । निर्हेतुश्चेदिति । ईदृशोऽपि चेदनेनोपवासेनास्येष्टं स्वस्य वा करिष्य इति संकल्पं न कुर्यात्तदा स उत्तमः । तस्मिन्सति मध्यमः । अग्रे स्पष्टम् ।

वातवर्षातपहिमानित्यत्र, आश्रयतुर्णामिति । चतुर्णां मध्य आश्रयत्रयाणां सहकारीत्यर्थः । यद्वा । मन्दोऽनिल. स्वसजातीयानेकसहकारेण महत्कार्यमपि करोतीत्याशयेनेदमुक्तम् । तथा च यथाश्रुत एव ग्रन्थो बोद्धव्यः ।

विमुखा यान्ति नार्थिन इत्यत्र, अग्रेपि वीनां मुखे न प्रविशन्तीत्यादि।

---

१. तदर्थत्वात्तदर्थत्व—गु. पा. ।

१८-१९-२२. अग्रेपि देहत्यागानन्तरगपीत्यर्थः । वीनां पक्षिणां गृध्रादीनां मुखानि भक्षणार्थं भवन्ति येषु ते विमुखास्तादृशाः सन्तो न यान्ति, दारुषु सत्सु देहस्य भस्मीभावात् । विरान्दस्य कालव्यवधानेपि तथा । वृक्षमात्रभिक्षुकाः परमहंसाः ।

[1]एतावज्जन्मेत्यत्र, यदि सर्वतुल्यतेति । ज्ञाने जातेऽप्यजयस्वार्थपरता चेत्तदा
१०-१९-३५. तयेत्यर्थः । अत्रैव एतावज्जन्मेत्यस्य विवरणे यथा पुमान् कुण्डलवान् कुण्डली भवति । न हि तत्र कुण्डलातिरिक्तं कुण्डलित्वमस्ति, तस्यैव विशेषणत्वात् । तथात्रापीत्याशयेनाहुः एतावदित्यादि ।

इति एकोनविंशोऽध्यायः ।

विंशतितमेऽध्यायेऽध्यायार्थसन्दर्भे, उभयोर्निर्णयो यादृगित्यादि । उभयो-
१०-२०-०. ज्ञानकर्मणोः । भगवत्सम्बन्धं विना कर्मापि न सत्त्वशोधकम् । अन्यथा गोपवात्स्यैरेव भगवद्भावः स्याद्विप्राणाम् । तथापि कर्मणो वैदिकत्वात् तस्य च भगवत्येव तात्पर्यत्वात् पर्यवसानं भक्तावेव । तदपि न स्वतः, किन्तु भक्तसङ्गादेव । भक्त्यभावे वैयर्थ्यं च । भक्तया इति वचनादेकस्याः प्रसङ्गेनान्यासामप्यङ्गीकारः । तादृशीनामपि सङ्गेन पुंसां भक्ति । 'गृह्णन्ति नो न पतय' इतिवाक्यं श्रुत्वा हि तत्समाधान-पूर्वकं प्रभुगमनमेवोक्तवान् । सम्पन्नं च तदेव । तेनान्यशेषतया भजनं प्रभुर्न मनुते । तेन च भगवदन्तराय एव भवति । अतो न पुरुषार्थसिद्धिरिति ज्ञाप्यते । अन्यासामपि स्नेहवत्त्वेऽपि प्रसादविषय एव तद्धेतुत्वेन भक्तत्वोक्त्याऽन्यभावतो वैलक्षण्यमेतदभावे ज्ञाप्यते । तच्च सर्वात्मभावत्वमेवेति ज्ञेयम् । पुष्टिलीलायामङ्गीकार एवात्र प्रसादः, न तु शीघ्रं मुक्तिः । पूतनादिसाधारण्येन प्रसादविशेषोक्तिरत्र विरुद्धा भवेत् । शरीरस्य मर्यादामार्गीयत्वेन तत्त्वागपूर्वकं देयं दत्तवानिति हृदयम् । एवंरूपतयोर्निर्णयोऽप्युच्यत इत्यर्थः ।

ननु 'नन्वद्धा मयि कुर्वन्ती'ति 'प्रागबुद्धिमनास्त्वामे'त्यादिना च स्वस्मिन्सहजप्रियत्वोक्तया स्वेतरेषु प्रीतेरौपाधिकत्वेनापुरुषार्थत्वं स्फुटमेव भगवतोक्तमिति तच्छ्रुत्वापि कथं पत्यो गृहान् गता इत्यत आहुः साक्षाद्भगवतोक्तं हीति । यथा यथावत् तात्पर्यज्ञानपूर्वकं पूर्वमेव न भावन इत्यर्थः । गोवद्रागमार्गेभ्यो यदुक्तं तत्परस्परोक्तम् । उत्तमाधिकार-रहितानामिति शेषः । एतच्च 'प्रायःपुंस'इतिश्लोकविवरणे स्फुटीभविष्यति ।

ननु देहत्यागोत्तरावधिको कष्टमार्गोऽसत्यं पूर्वमप्यन्येषामपि जातः सम्भवतीति कथं प्रतिबन्धकरणमुपपद्यत इत्यत आहुः स्त्रिया भाव इति । परः[2] सर्वासां पत्नीनां भावेभ्य

---

१. एतावज्जन्मेत्यस्य विवरणे मू. पा. । २. परः । मू. पा. ।

उत्कृष्टः सर्वात्मभाव इति यावत् । स्त्रिया उत्तमनायिकाया भावस्तथा । यथापूर्वं न भासत इत्यर्थः । वस्तुन एव तथात्वादिति भावः । यद्वा । तर्हि पत्नीनां परम्परोक्तभानं कथमित्यत आहुः स्त्रिया भाव इति । यथा प्रभुवाक्यं दुर्बोधम्, तथा स्त्रीणां भाव एवोत्कृष्ट इत्यर्थः । तथा च प्रियसम्बन्धिवार्ताश्रवणजनितोत्कटभवेनैवागता, न तु वचनतात्पर्यं ज्ञात्वेति भावः । जात्यभिप्रायेणैकवचनमुक्तम् । यद्वा । ननु 'प्रसीद' त्विति वाक्यात्प्रसादस्तस्यामवश्यं वाच्यः । स च देहत्यागः सद्योमुक्तिर्वेति न वक्तुमुचितम् । एनयोः पूतनादिसाधारणत्वादन्यस्य स्पष्टतयानुक्तत्वात् तत्कार्यं न किञ्चित्पश्याम इत्यत आहुः स्त्रिया भाव इति । यथा व्रजसीमन्तिनीनां तथास्या अपि भावः परः सर्वोत्कृष्टः सर्वात्मभावरूप इत्यर्थः । तथाच यथैतासु लीलां कृतवानेवमेवास्यामपीति । मर्यादामार्गीयत्वाद्देहो नाशितः । यदीयमत्रागता स्यान्न निवर्तेतैव, सर्वात्मभाववत्त्वात् । अतोत्र प्रतिबन्धकं मर्यादादेहं नाशयित्वा[1] नीतवानित्ययमेव प्रसादः । अन्यथा 'ये यथा मा' मिति प्रतिज्ञा न संगच्छेतेति भावः । यद्वा । नन्वेकस्यामेव प्रसादे को हेतुरत आहुः स्त्रिया इति । परः सर्वासां भावेभ्य उत्कृष्टोऽस्या भावोऽस्तस्तथेत्यर्थः ।

सत्कारा विप्रभार्यापा इत्यस्य विवरणे, ज्ञानं हि ब्रह्मात्मकमित्यारभ्य कार्यक्षमं भवतीत्यन्तम् । अत्रायमाशयः । पूर्वाध्याये हि सर्वमत्रत्यं भगवदर्थमिति
१०-२०-२. ज्ञानमुपदिष्टम् । एवं सति स्वविनियोगानर्हत्वज्ञानेन वस्तुमात्रे तथाकरणे व्यवहारविरोधेन च लीलाविरोधः स्यात् । अत एव क्षुन्निवारणस्यावश्यकत्वेन भगवदीयवस्तूपयोगभिया नूतनप्रार्थनम् । अन्यथा फलादिभ्य एव तत्सम्भवे प्रार्थनं व्यर्थं स्यात् । तेन यदुपयोगकरणे प्रभोरिङ्गितमस्ति तस्य तथाकरणम् । यत्रातथात्वं, न तत्र तथेति ज्ञानमपेक्षितम्[2] । तत्रापि यदीदं मयैव भोक्तव्यमित्याग्रहः स्यात्तदैव बाललीलायां रसः स्यात्, अन्यथा शान्तरसमध्यपातित्वेन रसाभासः स्यात् । इदं चोपदिष्टज्ञाने जाग्रति न सम्भवतीति प्रथमं लोकानुरूपं पर्यवसानतो भगवद्गामि यज्ज्ञानं तयतो भवति तदिदमन्नमिति तथोक्तवान् । अन्नस्वामिनां बहिर्मुखत्वात् समर्पणकर्त्रीणां च भक्तत्वादुभयत्वं तस्येति । अन्नस्य ज्ञानपोषकत्वं श्रुतिसिद्धम् ।

[3]मां ज्ञापयतेत्यत्र, तस्यान्नदोषो निरूपित इति । पूर्वं यथेष्टमिति कामपदं व्याख्यातम्, अधुना तस्यान्नविशेषणत्वमभिप्रेत्य तत्तात्पर्यमुच्यते । दोषः[4]
१०-२०-१४. स्वभोगे ज्ञेयः स कथं निरूपित इत्यत आहुः कायपदादिति । अत्रेदमाकूतम् ।

---

१. नाशयित्वाऽनीतवा–मू. पा. । २. ज्ञानमप्यपेक्षितम् । मू. पा. । ३. मामित्यारभ्य सर्वमवदातमित्यन्तं शोधपत्रमेकस्मिन्नेव पुस्तके लब्धम् । एतन्मूलपाठे नास्ति । ४. दोष अत्र स्वभोग्यत्वाभावो ज्ञेयः । इति क्वचित् पाठः । मू. पा.

अन्न हि पुरुषस्वामिकं भवतीति तदन्न तै स्वर्गकामनया यज्ञसबन्धिदेवतान्तरोद्देशेन सङ्कल्पपूर्वकं निष्पादितत्वात् सकाममपि कामप्राचुर्यात् कामरूपमेव जातमिति ज्ञापनाय तथा विशेषणम् । तेन तेषामभक्तत्व सूचितम् । तथा चान्योद्देशेन कृतमभक्तसबन्धि स्वभोगयोग्यं न भवतीति दोषोक्ति । [1]किञ्च, 'मा ज्ञापयत पत्नीभ्य' इत्युक्त्वा दानसमयेपि 'मह्य दास्यन्ती'ति[2] पात्रान्तरोक्त्या चोक्तदोष एवान्नस्य स्फुटीभवतीत्याशयेनोक्त म इति पदाच्चेति । न च पूर्वोत्तरवाक्ययो: कथ सगतिरिति वाच्यम् । तासा भक्तत्वात् मदागमने ज्ञापिते मत्सबन्धित्वं ज्ञात्वा वो युष्मभ्यमपि दास्यन्तीति ज्ञापयितुमादौ स्वकथनम्, अग्रे [3]दोषत्वमन्नस्य ज्ञापयितु म इति कथनमित्युपपत्ते: । अन्यथा यथा भगवतोक्तं वो दास्यन्ति तथा ता अपि तेभ्य एव दद्यु:, न तु [4]स्वमत्रानयेयु । तर्हि कथं तदन्नमेताभिरानीतं भगवानङ्गीकृतवानिति चेत् । अत्रैव प्रतिभाति । पत्न्या आत्मनोऽर्धत्वात्तदन्ने तासामशो[5] भवितुमर्हति । स च तासा भक्तत्वादुक्तदोषरहित एवेति म तव्यम् । तथा सति तस्य पूर्वमपृथग्भावात् समुदिताभिप्रायेण दोषोक्ति । ततस्ताभिर्भगवदर्थं स्वाशे पृथक्कृते तदङ्गीकरणमावश्यक प्रभो, 'भक्त्युपहृतमश्नामी'ति वचनात् ।

यद्वा । 'अन्नमादाय भाजनै'रिति भाजनोक्त्या पृथग्भावासभवेपि यथा तदन्ने पूर्वमन्योद्देशो दोषहेतुरभूत्, एव पश्चाद्भगवदुद्देशस्तस्मिन्नि[6]वृत्तिहेतुरभूत् । अत सर्वमेवान्नमङ्गीकरणयोग्यमित्युपपद्यते । न च तासा भक्त्या पुमश कथमदुष्टो भवतीति शङ्कनीयम्, तत्सबन्धात्तेषामपि भक्तत्वस्य वक्ष्यमाणत्वात् ।

अथवा, काम यथेष्टमिति पक्षेपि तत्तात्पर्योक्तिस्तस्यान्नस्य दोष इति । अत्रायमर्थ । [7]आधिदैविक यज्ञं सपादयितु पुभिराधिदैविकयज्ञाभक्तस्य भगवतस्तदाज्ञयाध्यात्मिकाना गोपाना याच्ञाभङ्ग कृत: । सोत्र दोषपदेनोच्यते । तथा सति कथमाधिभौतिकोपि स संपत्स्यत इति ज्ञात्वा साक्षादाधिदैविके दातुमशक्यत्वादाध्यात्मिकेभ्यो वो युष्मभ्य यावता तृप्तिर्भविष्यति, तावद् दास्यन्ति तेन चाधिदैविकस्य तृप्तिर्भविष्यति,[8] आधिभौतिकश्च[10] सपत्स्यत इत्याशयेनोक्त कामपदाद् इति पदाच्चेति । अन्यथा [11]यज्ञोयानस्य यज्ञार्थमस्थापयित्वा यथेष्टदानकथनानुपपत्ते । तास्तु 'यथा तरोर्मूलनिषेचनेने'ति [12]ज्ञानेनाधिदैविकद्वारेणैव सर्वं तत्रैव भवतीति सर्वमन्नमानीतवत्य इति सर्वमवदातम् ।'

---

१ किंच पूर्वं 'मा मू पा । २ दास्यन्ती'ति वक्तव्य तथानुक्त्वा वो दास्यन्ती'ति मू पा । ३ सदोषत्व मू पा । ४ स्वयमश्ना–मू पा । ५ तासामप्य–मू पा । ६ देशस्त न्निवृत्ति मू पा । ७ आधिभौतिक मू पा । ८ –ध्यात्मिकयज्ञ मक्ताना गोपानाच मू पा । ९ –भविष्यतीति, मू पा । १० आधिदैविकश्च मू पा । ११ यज्ञार्थीयान्नस्य मू पा । १२ न्यायेनाधि–मू पा ।

अत्रैव श्यामं हिरण्यपरिधिमित्यस्य विवरणे, ज्ञानक्रिययोरित्यारभ्य सर्वविरोधः
१० २० २२. परिहृतो भवतीत्युक्तम्। ननु स्वरूपस्योक्तरूपत्वे तासां व्यावृत्य गमनं सर्वथा विरुद्धम्। तथाहि। ज्ञानं हि क्रियाऽर्थवसायि। तथाच बर्हधातुप्रवालेत्यादिविवरणे केवलधर्मसहितरसदानार्थोपस्थितिपरवशत्वयुग्मरसख्यापनादिक्रियया तदनुरूपमेव भगवज्ज्ञानमपीति ज्ञायते। तथा च व्यावृत्यगमनमेतदुभयविरोधि। इत एव मर्यादाविरोध। न हि भगवज्ज्ञानादि विरुद्धं भवितुमर्हति। 'कृष्णाङ्घ्रिपद्ममधुलिण्न पुनर्विसृष्टगेहे'इत्यादि भागवत शास्त्रं रसशास्त्रं च तादृशमतस्तद्विरोधः। अङ्गानि भगवत्प्रेम्णः प्राचीनश्रवणादीनि विभावकानुभावकादीनि च। भगवत्सङ्गतानामन्यत्रापि पतित्वेन भजनमिति भक्तेर्विरोध। व्यामोहेन समाधानस्याशयमाशय। यदि पूर्वोक्तरूपेष्वेकस्यापि स्फूर्तिः स्यात्, स्यात्तत्कार्यमेव। किन्तूक्तानां मूलरूपे मोहकसम्बन्धात् कस्यापि न स्फूर्तिरिति न तत्कार्यसम्भव इति। यद्वा। भगवतो ब्रह्मत्वेन तज्ज्ञानशक्तेरपि सर्वसमत्वेन विकाराजनकं प्रादुर्भावितश्च तज्जनकत्वात् तथा। तत्क्रियाशक्तिरपि योगशास्त्रादिनिरूपिता मनःसमाधिहेतुत्वेनोक्तरूपैवेति तथा। ब्राह्मणीष्वेवभावप्राकट्यं मर्यादाविरोधि। शास्त्राणि स्वस्वाधिकारानुसारेण भगवद्भजनं विदधते। तथा सति शुभं फलम्, विपरीते विपरीतमिति। एतासां विवाहितपुंभजनस्यैव तथात्वादुक्तरीत्याऽतथात्वहेतुत्वेन तथा। शास्त्रोक्तरीत्यैव भजनं भक्त्यङ्गमिति तद्वैपरीत्येन भावजनकरीतिप्राकट्यमङ्गविरोधि। जारत्वेनात्र भजनं स्यात्, तच्च भक्तिविरोधि। व्यामोहसमाधेरयमाशय। लोके यो हि येन यदर्थे व्यामोहितः क्रियते स तदनुगुणमेव करोति, न तु [1]स्वानुगुणम्। तथाच पूर्वोक्तानामेवभावेन भजन एव तात्पर्यमध्य॥ सम्पन्नमिति तेषां पुष्टिमार्गीयत्वकरणान्न विरोधगन्धोऽपीति। यद्वा। ननु स्वरूपस्योक्तरूपस्योक्तरूपत्व इत्यादिनास्मदुक्ताशङ्कानिरासायाहुः सर्वव्यामोहादिति। सर्वासां पत्नीनां सर्वांशे वा तासामेव व्यामोहो भगवता कृत इति पूर्वोक्तभगवदीयज्ञानक्रियादेः कार्यासम्पत्तिरभवदेतासु, तेन गेहं गता। अत्रेदमाकूतम्। तासां गृहगमनेऽप्या भगवदीयज्ञानक्रियादिकार्यासम्पत्तिः स्पष्टैवेति ज्ञानाद्युक्तिर्निरर्थेति शङ्कानिरासायावश्यं तत्प्रयोजनं वाच्यम्। तच्च मर्यादादेहं त्याजयित्वा पुष्टिमार्गीयं तं प्रापयित्वा मनानीतां या, तन्निमित्तं प्रभुणा तादृशा धर्माः प्रकटीकृता इति तस्याः तत्कार्यं सम्पन्नम्। एतदर्थमप्राकट्यादेतासु तत्कार्यासम्भवेऽपि न विरोध। अत एवैतद्दर्शनमस्मिन् श्लोके नोक्तम्, किन्तु पूर्वस्मिन्नेव। परन्तूभयदृष्टं रूपमेकमेवेति पूर्वेणास्य श्लोकस्य संगतिः कृता। प्रतीयमानानामपि धर्माणामेतद्धृदयानारोहो व्यामोहादिति। पूर्वमप्रतीतिरेव धर्माणामुक्ता, सम्प्रति प्रतीतानामपि हृदयाप्रवेश उच्यत इति विशेषः।

---

1 स्वानुगुणम्। मू. पा.

मार श्रुतेत्यत्र, कर्णपूरवदत्यर्थोक्तौ, दृष्टानन्तर्यभावादिति । दृष्टं दर्शनम् । तदानन्तर्यभावादित्यर्थः । यथुक्ताना भावाना तदनुरूपस्वीयभावे साक्षादनु-

१० २० २३ भवानन्तरं श्रवणं स्यात्, तदा पूर्वानुभवसंवादेन सर्वाङ्गे तदभावाभावः स्यात्, अत्र तु तथात्वाभावान्न तथेति भावः ।

नन्वद्धा मयीत्यत्र, यावन्न भगवति प्रेमेत्यादि । अत्राय भावः । भक्तिमार्गे स्वतन्त्रपुरुषार्थत्व भगवत एवेति निरुपधिस्नेहस्तद्विषयक एव भवति ।

१० २० २६ तदुपयोगित्वेन स्त्रमादे परं तथा त्वमिति वस्तुस्थितिः । अत एव 'यर्ह्यम्बुजाक्ष न लभेय भवत्प्रसादं जह्यामसून्' इति महिषीवचनं गीयते । [1]एवं यथा विषयिणामात्माध्यास प्रयुक्तस्नेहविषयत्वेषु देहेन्द्रियादिषु स्वात्मज्ञानेऽपि परमस्नेहः, तथा भगवत्स्नेहरहितानामपि मुमुक्षूणां विषयवैराग्यमिति ज्ञेयम् ।

पतयो नाभ्यसूयेरन्नित्यत्र, पित्रादयोऽपि पूर्वपूर्वोपाधीत्यादि । पतिपितृभ्रातृ-सुतादीनां मध्ये पूर्वस्यैतन्निषेधप्रयोजको यो धर्मः स उत्तरे नास्तीत्यर्थः ।

१० २० ३१ एतदेव विवृतं नहीत्यादिना । पितुस्तत्सुतदत्तपिण्डे लोभादेतन्निषेधः सम्भवति, स न भ्रातरि । भ्रातुः स्वसृसौभाग्येच्छा भवति तथा । सुते तु स सा । अस्य मातु-र्निर्दोषत्वमपेक्ष्यम् । अन्येषां तदपि न यथः । यद्यप्ययधर्माभावोऽनसूयाया न हेतुः, तथापि स्वनिष्ठतादृधर्माणामप्यधुना नाशात् तदुपलक्षकोऽयं ग्रन्थ इति ज्ञेयम् । एवं संयागमनसमये प्रतिषेधकतद्धेतुभूतपत्यादिनिष्ठधर्मा एव पूर्वपूर्वोपाधिशब्देनोच्यन्त इत्यपि ज्ञेयम् ।

अथानुस्मृतये यस्याभासे, एव ज्ञानकर्मणी द्विविधे इति । विप्रतत्न्योर्मर्यादा

१० २० ३७ पुष्टिभेदेन द्विविधे ते निरूप्ये इत्यर्थः ।

यद्विश्वेश्वरयोर्याच्ञामित्यत्र, विश्वेश्वरपदतात्पर्यमाहुः वस्तुतो भगवतैवेत्यादि । विश्वस्यैवेश्वरो नियामकः प्रवर्तको निवर्तकश्च यत इति भावः । वलित्वावयात् परम्परयापीत्यादि । यद्यपि मागितिवदान् वलिना स्वविषयकमेवोक्तमिति न भगवद्धर्म-निरूपकत्वाद्गर्भितमिति भाति, तथापीश्वरस्यैवेदं वाक्यं भगवतो यैश्वर्यधर्मरूपत्वात् तस्य च भगवदीयस्यैव वलो सरस्वत्याद्भगवद्वाक्यमत्र[2] पर्यवसानमिति च । ननु याच्ञाभङ्गश्चेद् भगवत्कर्तृक एव, तदा विप्रापराधत्वेनास्य कथनं कथम् । अस्त्वया । पत्नीनां दीक्षितविहितात् प्रभावा न ददातीति विधुन्वन च शापितमानिति, प्रभुत विप्रापकारकृतेत्यापद्यत इत्याशङ्क्याहुः ब्राह्मणानामयमिति । अत्र सत्रव्रतो धर्मो नमसर्पणेन न बाध्यते । 'शेषाद् भुञ्जीरं'इति-विधेरन्नदानस्य विहितत्वावजार्थनादरा याद शापभूतानातिरिक्तनन्दुदानस्यैव निषेधस्य

[1] एव मति यथा मु पा । [2] वक्यमत्र मु. प ।

कृतत्वा'दनहीनं दहेदाशु'मितिवाक्यादान्यकत्वाचेति भाव । किञ्च, अग्रे फलदर्शनादपि साधनवैगुण्य न वक्तु शक्यमित्याहु स्नेहाच्चापीति । यद्यपि तदीयान्नस्वीकारेण भक्तसङ्गेन च तेषा भक्तिर्जाता, तथाप्यग्रे तेषा कर्मफलासम्भवाद्दैहिककर्मणो वैयर्थ्यासम्भवादेतत्फल वेनापि भगवता भक्तिरेव सम्पादितेति ज्ञापनायापिशब्दः । यच्चोक्त याञ्चाभङ्गश्चेदित्यादि, तत्राहुः भिक्षारूपेणेति । भगवता विहितैव सा बाध्यत इत्यर्थ । लौकिकी तु विप्रैरेवेति युक्तमपराधत्वेन कथन याञ्चाभङ्गस्येति भावः । अतो याञ्चापराणि भगवद्वचनानि लौकिकतत्परत्वान्न निरूप्यन्त इत्याहु न्यासभूतानित्यादि । यद्वा । ननु भक्तवात्सल्यपालकत्वाद्भगवतः कथ बलियागविरुद्ध स्त्रीषु याचन कृतवानित्यत आहुः ब्राह्मणानामिति । बलिवाक्येन वर्णाश्रमधर्मत्वेनोक्ता स्नेहप्रयुक्ता च या याञ्चा सा न बाध्यते, कन्यादिविषयिणी सा लौकिकी, सापि तथा । किन्तु दैन्यप्रयुक्तैव सा बाध्यत इत्यर्थः । प्रकृते च न दैन्यप्रयुक्ता सा, 'भक्ताया प्रसीद'त्विति वाक्यादिति भाव । अत एव तादृग्वचनैरविरोध इत्याहुर्न्यासभूतावित्यादि ।

विमुखा ये त्वधोक्षज इत्यत्र, ज्ञानेष्वात्मसाक्षात्कार इत्यादि । इन्द्रियजन्य-
ज्ञानस्य पुरुषोत्तमाविषयत्व प्रदर्शयन्ति ज्ञानेपीत्यादिना । मनोज्ञ यात्म
१० २० ३९ साक्षात्कारफलकज्ञानमार्गस्यात्ममात्रपर्यवसायित्वम् । कर्ममार्गस्याधिकारिभेदेन द्वैविध्यम् । बहिर्मुखाना तु क्रियारूपे भजनम्, तेनैवादृष्टद्वारा फलसिद्धिरिति यतन्त मतम् । श्रुतिता पर्यज्ञानवता त्वलौकिके यज्ञरूपे भजनमितीन्द्रियजज्ञानकृत्यविषयत्वेनाधोक्षजत्व सिद्धमित्यर्थ । भक्तिमार्गे भगवत्साक्षात्कारो 'नाह वेदै' 'न तु मा शक्यसे द्रष्टु'मित्यादि वाक्यैर्नेन्द्रियजन्य इति भाव । दृष्टेपि भगवति यावत्सर्वेन्द्रियै साक्षान्नानुभूयते, न तावत्स्वास्थ्यमिति, न साक्षात्कारमात्र फलम् । 'दर्शयन् मुहुर्मनसि स्मरं यच्छमा'ति वाक्याद् दर्शनस्याग्रेतनभोगोपयोगित्वेनाङ्गत्वम् । यथेक्षुदण्डस्य रससम्बन्धाद् भक्ष्यत्वम्, तथा भगवदानन्दलेशसम्बन्धेन येषा रूपाणा भजनीयत्वमित्याशयेनेक्षुदृष्टान्तः । केवलरसात्मक स्वयमधुनैव प्रकट इत्यादि पूर्वमेव ते पत्न्यः कर्तव्यत्वेन स्थिता, न चन परमपी याहुः अत एतादृश इत्यादि ॥ इति विंशोऽध्यायः ॥

एकविंशाध्याये, एतद् ब्रूहि महान्काम इत्यत्र, शुश्रूषा इत्यग्रे कथनात् सम्प्र-
श्नत्वेनेच्छैवोक्तेति कामपदार्थमन्यमाहु अभिलषितोर्थ इति । यद्यप्यद्वारा
१० २१ ४ कथनेपि शुश्रूषानिवृत्ति सम्भवति, तथापि शुश्रूषत्वे महत् साक्षाद्भगवत्क थनलक्षणोर्थो महानिति प्रातीतिकार्थः । वस्तुतस्तु यागभङ्गलक्षणोर्थस्तत्वेनेति हृदयम् ।

तथाप्यन्यभजननिवारणपूर्वकस्वभजन एव प्रमुतात्पर्यमिति पक्षान्तरमाहुः तद्विषयिणीच्छा वेति । स्वयागविषयिणी सेत्यर्थः ।

पर्जन्यो भगवानित्यत्र, अन्यथा तद्दैवसेत्यादि । भगवदतिरिक्तस्यैकस्या-
१०-२१-८. खिलजगदुत्पत्तिस्थितिहेतुत्वं न सम्भवतीत्येतत्परोऽयं ग्रन्थः ।

इत्यद्रिगोद्विजमखमित्यत्र, वासुदेवत्वेन शुद्धसत्त्वाकारमन्तःकरणं कृत्वा कर्मो-
पयोगिश्रद्धासामर्थ्याद्युपयोगित्वेन तत्राविर्भूय सर्वं कारितवानित्याशयेन
१०-२१-३८. वासुदेवप्रचोदिता इत्युक्तम् । प्रेरणे प्रकर्षोऽप्ययमेव । अन्यथा न वदेत् ।
अग्रे च गमने गोपानां मुख्यत्वं प्रभोस्तु गौणत्वमुक्तमित्यनावेशस्तदा सूच्यत इति तदु-
भयतात्पर्यमाहुः भगवदावेशेनैतदित्यादि ॥ इत्येकविंशोऽध्यायः ॥

द्वाविंशाध्यायार्थोक्तिसन्दर्भे, तद् ज्ञापयति निश्चितमिति । दृष्टार्थकलककर्माधिष्ठाता दृष्टानिष्टजननद्वारा स्वत्यागे सति स्वानुभावं ज्ञापयतीत्यर्थः । अदृष्टानेकसाधनसत्त्वेपि गोवर्धनात्मकदृष्टसाधनेनैव रक्षणे तात्पर्यमाहुः उभयोर्हेतुकत्वार्थमिति । एतज्ज्ञापनार्थ-मित्यर्थः । 'तत्क्षेपेणोपजीवन्ती'तिवाक्यात् स्वोपजीव्यात्मजनकत्वेनेन्द्रो यष्टव्य इति व्रजराजेनोक्तं यथा, तथा भगवतापि 'वयं गोवृत्तयोऽनिशं' 'वनशैलनिवासिनश्चा'त उपजीव्यत्वाद्गिरेः 'गवादीनां मख आरभ्यता'मित्युक्तमित्युभयार्हेतुकत्वम् । एवं भगवता कृतमिति । दृष्टमेवानिष्टमन्यप्रतीत्या दृष्टेनैव तद्वारणं चेत्यर्थः । अन्यथा 'गोपाये स्वात्मयोगेने'तिपदं विरुध्येत । तद्रूपेण भुक्तं यद्रूपेणैव रक्षितवानिति तत्त्वम् । दशश्लोक्यां प्रतिवाक्यार्थोक्तौ सर्वनाशनादिति । सर्वपुरुषार्थनाशनादित्यर्थः । तेषामेतदधीना-वस्थत्वादिति भावः ।

कृष्णं मर्त्यमित्यस्य द्वितीयार्थोक्तौ, अथवा कृष्णमित्यादि । विपरीतषड्गुणमिति
मर्त्यपदव्याख्यानम् । मर्त्यस्थानीयस्वत्वादिधर्मत्वेन येन विपरीतषड्गुणा लक्ष्यन्ते ।
१० २२ ३ तथा च ब्रह्म 'गृह्यमाणपि प्रीतिमारोपयत्स्वधर्मारोप सदानन्दे कृतवन्त इति
मे अप्रियं चक्रुरित्यर्थः । तत्त्वेनोपाश्रिये यस्यैव विवरणं भगवत्यपी यादिना कृतम् ।

अहं चैरावतं नागमित्यत्र, अश्वो गजो जले स्थले चेत्यादि । अमृ-
तमथनप्रस्तावे एवोत्पन्नत्वेनामृतधर्मा अप्यस्मिन्सन्तीत्यक्षयत्वम् । पूर्वं जल
१० २२ ७ एव स्थितत्वादधुना च स्थले सत्त्वात्तथेत्यर्थः ।

शिलावर्षनिपातेनेत्यत्रामासे, अन्यद्वा कर्तव्यमिति । अधुना स्वस्मिन्प्र-
१० २२ १४. वेशोऽन्यस्मिन्दार्थो ज्ञेयः ।

---

१. गृह्यमाणपीतिमा—मू ७। ।

तत्र **प्रतिविधि**मित्यत्र **योगमायेत्यस्याभासे,** न **प्रशासनन्यायेने**ति ।
१०-२२-१६. 'एतस्यैवाक्षरस्य प्रशासने गार्गि द्यावापृथिवी विधृते तिष्ठत' इति श्रुत्युक्तद्वारणवदत्र तन्न सम्भवतीत्यर्थः ।

गोपाये स्वात्मयोगेनेत्यत्र, पर्वतधारण इत्यारभ्य **भविष्यन्तीत्यन्तम्** ।
१०-२२-१८. अत्र हि द्वयं कार्यम् आसारादक्षा पर्वतधारणेन, एतेषां जीवदेहादिरक्षा च । अन्यथा पर्वतधारणेपि प्रलयकालीनमेघानां स्तनितादिभिरेषां प्राणस्थितिर्न स्यात् । तदेतदुक्तं **पर्वतधारण** इत्यारभ्य **योग एवे**त्यन्तेन । तेनात्मयोगेन गोपाये । स्वात्मयोगेन गोपाये इति मूलार्थो विवक्षितः, अन्यथा स्वपदं न वदेत् । अथवा । स्वश्चात्मयोगश्च तयोः समाहारस्तथा । युज्यते फलमनेनेति योगः साधनं सामर्थ्यं शक्तिरिति यावत् । आत्मनः सा योगमायैवेति सैवोक्ता । एवं सति स्वेन तत्प्राणादिरक्षा स्वरूपानन्ददानेन । तदुक्तं 'क्षुत्तृड्व्यथा'मित्यनेन मूले । तथाचाद्रिधारणे तेनासाराद्रक्षेति भावः । 'तस्मान्मच्छरणं गोष्ठ'मिति वाक्ययोस्त्वनन्तरं प्रामाशङ्कानिरासायाहुः **प्रथमं क्लेशसम्बन्ध** इत्यारभ्य **ततो भवेदित्यन्तम्** । नन्वीदृक्परिग्रहे नन्दादीनामन्यभजनमसम्भवि । कथञ्चित्सम्भवे वा ततो निवर्तनमेवोचितम्, न तु यागोपदेशोपि, स्वरूपेणैवैतत्परिग्रहात्साधनान्तरान[1]पेक्षणात् । न चाधुनैवायं परिग्रह इति वाच्यम्, 'स्वगोकुलमनन्यगति'मित्यादिवाक्यैः सार्वदिकत्वात् । किञ्च, स्वस्य सर्वज्ञत्वेन व्रजपरिग्रहस्य च पूर्वसिद्धत्वेन शरणागमनप्रार्थनपर्यन्तं तूष्णींभावोनुपपन्न इति चेत्तत्राहुः **प्रथमम्**मित्यादि । अत्रायं भावः । अत्र परिग्रहेणैव सर्वम्, न तु सोऽप्यन्यसाधनसाध्य इति ज्ञाप्यते । एवं सति पूर्वं विपरीतसाधनवत्त्वेपि स्वपरिग्रहेणैव तन्निवर्तनोक्तौ तत्सम्पद्यते, न तु पूर्वमेव तदभावोक्तौ । अत एवेतरसाधनासाध्यत्वोक्तिपूर्वकं 'यमेवैष वृणुते तेन लभ्य' इति श्रुतिरप्याह । इदमेवोक्तं **प्रथमं क्लेशे**त्यर्धेन । यागोपदेशप्रयोजनमाहुः **शरणागमन** इत्यादि । अन्यथा भगवद्वचनादिन्द्रयागे त्यक्तेऽस्माभिः क्लेशः प्राप्त इत्यसूयैवोत्पद्येत । तथा सति सर्वो निरोधो व्यर्थः स्यात् । परिग्रहस्य स्वतःप्राबल्यज्ञापनायैतेषां लोकसाधारणी रीतिर्यत उच्यते, अतो नासूयानुत्पत्तिशङ्कापि । पूर्वं देहेन्द्रियादीनामन्यत्र विनियुक्तत्वादपि तत्सम्भवः । अत एव तादृशत्वे इन्द्रियादीनां निरोधो न सम्भवतीति स्वकर्मणि विनियुक्तानि तानि तद्वस्तूनि च । तथा सति पूर्वदोषापगमात्प्रभौ न दोषारोप, तच्छरणागमने च बुद्धिरभूत् । न च स्वरूपबलेनैव परिग्रहादेतन्नैरर्थ्यमिति वाच्यम्, परिग्रहान्तःपातित्वादस्य । परिग्रहो हि तेषां तदीयस्य च वाच्यः, तेषां च परिग्रहीतृनिष्ठत्वाभावे परिग्रहस्वरूपासम्भवात् । न च शरणागमनेन परिग्रहोऽन्यथा-

---

1. साधनान्तरान—मु. पा. ।

चानिष्टत्वात् तेऽपि स्वयोगो ज्ञाप्यते । अन्यथैयुक्त्वा दधारेति न वदेत्, वरुन विनापि गोवर्धनोद्धरणेन रक्षासम्भवादिति भावः ॥ इति द्वाविंशोऽध्यायः ॥

त्रयोविंशाध्यायार्थोक्तौ, अज्ञानमिति । निरुद्धानामज्ञानादि कृष्णगं
१० २३ ० कृष्णविषयकं निवार्यत इत्यर्थः । प्रयोजनमाहु समत्वायेति । गोवर्धनोद्धरणेन
धृतो यो निरोधः स तु सर्वेषां समान इति तज्ज्ञापनाय तथेत्यर्थः । प्राकृतत्वेनेति । स्वनिष्ठो हेतु । जातस्तादृश एवेति । तादृश एव, अप्राकृत एव, प्रकट इति । अत्र भगवत्यप्राकृतत्वस्वसम्बन्धित्वयोर्विरोधाभावान्न सन्देह इति परः सिद्धान्तस्तथा, उच्यत इत्यर्थ । गर्गवाक्यानि परे सिद्धान्ते । तथा, हेतव इत्यर्थः । तज्ज्ञानमिति । भगवत्स्वरूपज्ञानं फलमित्यर्थ ।

एवंविधानीत्यस्य विवरणे, हेत्वभावे नैवैतत्कार्यमिति । अतिप्राकृतबुद्धित्वज्ञापनायैवमुक्तमिति ज्ञेयम् । तेन भगवन्माहात्म्यं सूचितं भवति । यद्वा,
१० २३ १ हेतुत्वेन प्रतीयमानो यः प्रभुस्तद्योग्याभाववता तद्व्यतिरिक्तेनेत्यर्थः ।

श्रूयतां मे वच इत्यत्र, पूर्वपक्षसिद्धान्तयोर्व्यत्यास इति । नन्दस्यात्मनो देहाज्जातत्वाभावेन तथात्वं सिद्धान्तो भवितुमर्हति यद्यपि, तथाप्येतादृश
१० २३-१५ एव स्वात्मज इति भगवता लीलार्थं तद्बुद्धिः सम्पादितेति तथात्वम् । न चास्या भ्रमरूपत्वेनास्य सिद्धान्ताभासत्वम्, न तु वस्तुतस्तथात्वमिति वाच्यम्, हेत्वसिद्धेः । भगवता तथैव लीलार्थमङ्गीकारात् । नित्यस्यैवभावोनुपपन्न इत्याशङ्कानिरासाय तादृशस्य तथात्वे हेतुमाहुरद्भुतकर्मेतीति । लौकिकोपपत्तिरहितं ह्यद्भुतम् । तथाचात्र तद्राहित्यं भूषणम्, न तु दूषणम्, अद्भुतकर्मत्वलक्षणस्वरूपसम्पादकत्वात् । अत एव 'तस्मान्नन्दात्मजोऽयं ते' इति गर्गोक्तिरपीति भाव ।

वर्णास्त्रय इत्यत्र, वाक्यान्यष्टश्लोकैरुक्तानीति नामकरणसमये गर्गेण छन्दोननुरोधेनैव वाक्यान्युक्तानि, तथैव न दैरपि, तान्येव व्यासेन श्लोकैरुपनिब-
१० २३ १६ द्धानीति तथोक्तम् । यद्यप्यासन्नित्यादीनि तानि सप्तैव, तथापि मन्ये नारायणस्यांशमित्यादिकं गर्गवाक्यफलितार्थनिरूपकत्वेन तद्रूपमेवेत्याशयेनाष्टसङ्ख्योक्ता ॥ इति त्रयोविंशोऽध्यायः ॥

चतुर्विंशाध्यायतात्पर्योक्तौ, गोरक्षा चेन्द्रियारभ्य जायत इत्यन्तस्याय भाव ।
साजात्यमात्रेणाप्यखिललौकिकगवाधिदैविकगामिनी पालनलीला पुरुषोत्तमातिरिक्तस्य
१०-२४ ० न सम्भवतीति तत्प्रमापिका तादृग्रूपसुरभिप्रपत्तिः । तदुक्तं 'भवताऽलोकनाथेन सनाथा वयमच्युत' इति सुरभ्या । लोकभिन्ना अलोका अलौकिक्य इति

यावत् । तामा नाथेन पालनकर्त्रा त्वया वयमपि सनाथा पालिता भवाम इत्यर्थः । लीलास्थपदार्थमात्र इयं व्यवस्थेति ज्ञापनायान्लोकेति सामान्योक्तिः, अन्यथोक्तौ या लोकनाथेति[1] वदेत्। तत्र हेतुरच्युतेति । धर्मतोऽपि च्युतिराहित्येन पालनलक्षणो धर्मो यद्यस्मद्ग्रामो न स्याद्गोत्वाविशेषात् तदास्मदर्शे स च्युतः स्यादित्यर्थ । तदेवमिति । लीलापदं भावप्रधानम् । भगवल्लीलाप्रमाणमिति समस्त पदम् । तथा चेयमुच्यमाना लीला भगवल्लीलात्वे प्रमाणं तथेत्यर्थः । ननु हेतुवादसिद्धत्वेने दयागथेद् मग्नः, तदा प्रकृतेपि 'भवता लोकनाथेने'त्यादिना रक्षकत्वादिहेतूक्तिपूर्वक एवेन्द्राभिषेक· कृत इति को विशेष इत्यत आहु अतो हेतूक्तिरपीति । यतो यागभङ्गकरणप्राप्तमदोपत्वशङ्कापरिहाराय तद्भङ्गतदपूर्वकारणपालनानां [2]केवललीलात्व ज्ञापनीयम् । तच्चाधिदैविकगागिन्द्रनिरूपणेन भवतीति तद्रूपमेव । अतोऽत्र हेतूक्तिरपि । एषा लीलारूपैवेत्यर्थ । अत एव 'भवाय भवे ति 'कृष्णेऽभिषिक्त एतानी'त्यादिना सफल्या वर्ण्यत इत्याहुः सत्फलेति । किञ्च, पारम्पर्यागतमर्यादा-भङ्गोऽप्येवं न जात इत्याहुरिन्द्रयागभेति । अग्रेपि प्रतिवर्षं गोमखं करिष्यतीति भवितेयुक्तम् । एतेन लीलासम्बन्धिलोकपालादयोपि न भगवदतिरिक्ता इति ज्ञापितमिति दिक् ।

गोलोकादाव्रजदित्यत्र, न हि प्राकृतैः स्ववशीयैरिति । प्रकृत लीलाकरणं
१०-२५ १ तत्सम्बन्धिभिरित्यर्थ । तथा सति लीलारसविरोध स्यादिति भाव· ।

इन्द्रस्तुत्याभासे, दशभि प्राणश्लोकैरिति । भगवदपराधैराधिदैविकसर्वतिरोधाने
१० २५ ३ तादृशा प्राणा अपि तिरोहिता इत्यत मृत इवाधुने याधिदैविकत्वप्राप्त्या स्वजीवनसिद्ध्यर्थं तत्प्रमानसंख्याकैः श्लोकै स्तुतिमाहेति संख्यातात्पर्यमुक्तम् । ननु 'गोवर्धने धृते शैल' इतिवाक्यात् क्रियाशक्त्याविर्भावं कृत्वा यथाय बोधितस्तथा पूर्वमेव ज्ञानशक्तिमेवाविर्भाव्य कुतस्तथा न कृतवान्, तदा प्रभुमाहात्म्यज्ञानान्नापराधं कुर्यात्, अधुनाप्येवं चेयत आहुः **क्रियाशक्तीति** । इन्द्रादीना बाहुरूपत्वादिति भाव । ननु प्रयोजनमस्तीति कुतस्तथा नाकरोदित्याशङ्क्य तदनधिकारमाहु **ब्राह्मश्चायमिति** । [3]हेतुकर्मसम्बन्धित्वेन वेदबाह्य इत्यर्थ । अत एव गवादिद्रोहार्थमाजगामेति भाव । एतदेवाहुस्तथाविध इति । अतःपरं क्रियाशक्तियोग्यप्रयोजनार्थं स्वस्मिन्यावती च दत्तास्ति तदुपयोगिज्ञानमपि दत्तमस्तीति भगवदधीनेन चतुर्विधपुरुषार्थाना भगवद्दत्तगुणानां च

---

१ -ऽलोकनथेति मू पा । २ कवल्पुरुषोत्तमचोलाम देवकार्यकृतिर्भूत्वर्यस्यादित्यर्थः । (इद टिप्पणं न मन्यकर्तृणाम्) । ३ हैतुक—मू पा ।

तिरोधानं ज्ञात्वा तत्सिद्ध्यर्थं स्तौतीति तावन्मह्यचकैः श्लोकैः स्तुत्या ज्ञाप्यत इत्याहुः पुरुषार्थप्रसिद्ध्यर्थमिति ।

स्वच्छन्दोपात्तदेहायेत्यत्र, नटवदेव रूपमित्यादिपद्यं पूर्वोक्तरूपे द्रष्टव्यम्

१० २४ ११ भिप्रायेणेति ज्ञेयम् ॥ इति चतुर्विंशोऽध्यायः ॥

[1]पञ्चविंशेऽध्याये तात्पर्योक्तौ, अन्यथा नन्दप्रिज्ञानमिति । यदि वरुणैश्वर्यं तदास्यस्वानयनलक्षणं पुरुषमर्यादि यत्परं माहात्म्यं पुरुषोत्तमत्वेन ज्ञानजनकमिति यावत् तद्दर्शनं न स्यात्तदा तत्तदेव पूर्वोक्तं नारायणांशत्वेन देवोत्तमत्वेन यज्ज्ञानम्, वस्तुतस्तु पुरुषोत्तमविषयकमेव ज्ञानं भक्तिमार्गविरुद्धं, पर्यवसायि पर्यवसानशालं स्यादित्यर्थः । तथा सत्यग्रे भजनानन्दानुभवो न स्यात्, तद्विरुद्धज्ञानवत्त्वात्, अतो निरवधिमाहात्म्यवत्त्वेन पुरुषोत्तमत्वेन ज्ञानं जननीयम्, भक्तिमार्गविरुद्धज्ञानवत्त्वेन निग्रहश्च कार्य । वरुणद्वारा भगवानुभयं कारितवानिति वरुणसेवकेन प्रभुर्मेनुत इत्यर्थः ।

नमस्तुभ्यं भगवत इत्यत्र । विवादे सति स्विव्यादि । ननु 'यावज्जीवमग्निहोत्रं जुहुया'दित्यादिकर्मकाण्डेन । यदहरेव विरजेत्तदहरेव प्रव्रजेत्' 'यामिमां

१० २५ ६ पुष्पितां वाच'मित्यादिना च विरोधात् कथं तत्तदुपास्यानां न[2] नमस्यतेत्याशङ्क्य तत्र विषयव्यवस्थामाहुः विवाद इति । विषयस्य विवादविषयस्येत्यर्थः । देहाद्यध्यासकृताधिकारकत्वेनाज्ञानमूलकत्वेन कर्मणो जघन्यत्वात् 'तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः, न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहे'ति प्रभुवचनाद्भक्तिमार्गो मार्गो तस्य दौर्बल्यम् । तत्रोपास्यरूपाणां भक्तिमार्गेऽपुरुषोत्तमरूपाद् दौर्बल्यमिति भावः । भक्तिमार्गाज्ञानदशायामेव कार्यत्वात्तेषां दौर्बल्यम् । अत एव 'मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते' इति भगवतोक्तम् । ननु चार्वाकादिभिरीश्वरो नाङ्गीक्रियत इतीश्वरोऽपि न सर्वसिद्धान्तसिद्ध । किञ्च, ईश्वरवादिनामपीदं स्वरूपं शुद्धं ब्रह्मरूपमिति न सर्वेषां सम्मतमित्यत आहुः सद्भिस्त्वति । मोहकशास्त्रजमोहरहिताः सन्त, तेषु परस्परं यस्मिन्विषये विवादस्तत्र तथेत्यर्थः । अत एवाग्रे श्रुत्यादिक्रमेणोक्तम् ।

न यत्र श्रूयते मायेत्यत्र, लोकानामित्यादि । मायया मोहिता एव तथा कल्पयन्तीति तथा । कार्यो मोहः, कारणं सा । [3]एतदेवाहुः कार्यकारणरूपिणीति ।

आनीतोऽयं तव पितेत्यत्रेदंप्रयोगं विनापि चारितार्थ्ये तत्प्रयोगात् तत्तात्पर्यमुक्तं वेपमानः पुरो वर्तत इत्यनेन । तत्र भगवदैश्वर्यदर्शनज-

१० २५ ७ सात्त्विकभावात्तथेति ज्ञेयम् ।

---

१ पञ्चविंशाध्याये मू पा । २ —पास्यानां नमस्य-मू पा । ३ एतदाहु मू॰ पा ।

नन्दस्त्वतीन्द्रियमित्यस्याभासे, यथैक वचनमिति । गोसवकर्तव्यताबोधकं
वचनं व्रजानयतेन्द्रमानभङ्गगोवर्धनोद्धरणव्रजजनाप्यायनतन्माहात्म्यज्ञानेन्द्र-
१० २५ १ प्रणतिगोविन्दनामधारणाद्यनेककार्यं करोति तथेत्यर्थः ।

ते तु ब्रह्महृदमित्यस्याभासे, विलय एवाभूदिति । अयमर्थः । लोकस्याक्षरा-
[1]त्मकत्वेनानन्दरूपस्य सर्वत्राविर्भावेन सर्वेषां देहेन्द्रियप्राणान्तःकरणात्म-
१० २५ १६ स्वप्याविर्भावे प्रकटाग्निसम्बन्धात् काष्ठान्तर्गताग्निप्रादुर्भावे तस्याप्यग्निरूपता-
परया काष्ठताविलयवदेतद्देहादीनामप्यानन्दतापत्त्या देहादिभावविलयोऽभूदिति । प्रत्या-
पत्त्यर्थमिति । पूर्वभावसम्पत्त्यर्थमित्यर्थः । सदात्मकाशस्येति । सर्वत्राविर्भावात् तत्तद्देहादि-
ष्वप्याविर्भूतांशस्येत्यर्थः । काष्ठाग्निवदिति । काष्ठान्तर्गताग्निप्राकट्यार्थं योऽन्योऽग्निस्तत्र
प्रविष्टस्तस्यापि तदतिरोधाने तिरोधानं न यथा, तथेत्यर्थः । अर्धज्वलितानामिति । अत्रैवं
ज्ञेयम् । व्रजवासिमनोरथपूर्त्यर्थं ब्रह्मानन्दाद् भजनानन्दे तारतम्यज्ञापनार्थं च स्वलोकस्य हि
प्रदर्शनम् । तारतम्यज्ञानं चाग्रे नैतत्स्फूर्तिं विना सम्भवति । सा चाधुनैतदनुभवं विना
तथेत्यधुनैतदानन्दानुभवोऽपि वाच्यः । स च स्वस्मिंस्तदभिन्नत्वाज्ञानं विनानुपपन्नः । एवं
सत्यानन्दात्मकत्वं स्वस्य भेदज्ञानपूर्वकमक्षरानन्दानुभवार्थे यथाज्वलितत्वम् । पुनः काष्ठता तु
पूर्वोक्तदेहादिष्वाविर्भूतलोकस्य तिरोधानेन तत्सम्बन्धजनितानन्दात्मकत्वभानतिरोधानेन च
यथापूर्वं स्थितिः । एवं करणस्यावश्यकतामाहुः अन्यथेति । तदेतुमाहुस्तथेति । अनाय
भावः । ज्वलितांशस्य पुनः काष्ठतानदानन्दात्मकतामापन्नस्य देहादेः पुनर्जडभावो दुःशक्यः ।
प्रकृते तु लीलोपयोगित्वात् सर्वथा देहादिभावे स एव च तथात्वसम्भवाद्देहादिभावं प्रकृति,
मुख्यतया विरतिरेव । एवं सति विरतिमपास्य प्रकृतिसम्पादकमेतादृशानां वेदब्रह्मैव
भवितुमर्हति । [2]कार्यस्यामर्यादत्वादेतदपि न मर्यादामध्यपाति तथा भवितुमर्हत्यतो यथा
हृदो नद्यन्तर्गत एव प्रवाहाद् भिन्नः सन् सदातिनिर्मलः स्वयं मकरन्दारविन्दोदयहेतुः
सततमतिगभीरतया स्वान्तःपतितपदार्थपूरणपटुस्तथा वेदान्तपाठेन मर्यादामार्गीयाद् भिन्न
सहजत्वेन निर्दोषभजनानन्दानुभवहेतुर्निर्विकारभावजनक पुष्टिमार्गीयमेवेति ज्ञापनाय मूले
वेदस्य ब्रह्मत्व हृदत्व चोक्तम् । एतदेवोक्तं तद्भिन्नस्य जलात्मकत्वमिपनेन । न चाक्षरात्मकत्वेन
लोकस्य तदानन्दात्मकं ब्रह्महृदपदमिति वाच्यम्, ब्रह्मानन्दस्य महत्त्वेन हृदस्याल्पत्वेन
तस्योपमानुपपत्तेः । आनन्दपदं हित्वा हृदपदोक्तावपरस्य तात्पर्यं वाच्यम् । नतूक्तरूपमेव
सम्भवति । एतेनैवाक्षरपरत्वं ब्रह्मपदस्य निरस्तम् । तदपरं पूर्वमेवोक्तेश्च । मध्ये शब्दब्रह्म-

1 —त्मत्वेन मू. पा. । 2 —दाविस्वरूपनिरूपणया भजनानन्दानुभवरूपस्यैव ।

योजनाया हेतुमग्रे वक्ष्यन्ति प्रमाणतो ज्ञानमित्यादिना। एवं सत्यत्र हृदत्वमज्जनोक्तिभ्या जलरूपतापि शब्दब्रह्मणोस्तीति मन्तव्यम्। तदाहुरत एवेति। एतस्यापि व्यापकत्वात् क्वचिद् गोकुलनिकटे प्रकटीकृत्येत्यर्थ। एवं कृतेरावश्यकतामाहुः तत्कार्यमिदमिति। एतादृशाना पूर्वभावसम्पादनलक्षण कार्यं प्रमाणतो ज्ञान च तदेकसाध्यमित्यर्थः। अत्रोपपत्तिमाहुरग्रे चेति। 'यत्राक्रूरोऽध्यगात् पुरे'त्यनेन। तत्र हि शब्दब्रह्मात्मके जले भगवत्स्वरूप स ज्ञातवानिति। मज्जनपदार्थमाहु शब्दब्रह्मात्मका एव जाताः। तत्र हेतुरुत्तमाधिकारिण इति। नन्वस्मादप्युद्धरणस्यावश्यकत्वे पूर्वस्मादेव किमिति नोद्धृत्य प्रकृतिमाव सम्पादितवानित्याशङ्क्य तत्र हेतुमाहुः क्रमथायमित्यादिना। स्वकृतमर्यादास्थापनार्थं तथाकृतिरित्यर्थः। तमेवाहुः परब्रह्मेति। परब्रह्मणा पूर्वं स्वस्मिन् स्थित पश्चात् स्वस्माद्विभक्त यद्वस्तु तच्छब्दब्रह्मात्मकं भवति। ततस्तेन तथा कृत जगद्रूपं भवतीत्यर्थः। इदमत्राकूतम्। साक्षाल्लीलोपयोगि जगद्धि सच्चिदानन्दात्मक स्वस्मिन् स्थित क्रीडेच्छया स्वस्माद्विभक्तं करोति प्रभुः। यतोन्त स्थित न बहिःकार्यक्षमम। तच्चानन्दस्वरूपाद्विमुक्त सत् [1]स्वरूपमलभमानमिव न किञ्चित्कार्यक्षम भवति। तदा प्रवृत्तिनिवृत्तिभ्यामलौकिकीभ्यामलौकिकार्थसम्पादनक्षम शब्दब्रह्मेति तदात्मकताया लीलोपयोगि प्रवृत्तिनिवृत्तिक्षमं भविष्यतीति ज्ञात्वा तथा सम्पाद्योक्तसामर्थ्ये सम्पन्ने तस्य प्रमाणरूपत्वाल्लीलायां प्रवृत्तिनिवृत्ती स्नेहाधीने इति न तदुपयोग इति तस्मादप्युद्धृता इति। एतदेवोक्तमन्यथा प्रमाणगृहीता इत्यादिना। लीला हि स्वतन्त्रा। एते प्रमाणाधीनत्वे विहितमेव कर्म कुर्युर्नेतरदपीति तत्रानुपयुक्ता भवेयुरित्यर्थः। यद्वा। प्रमाणमार्गगृहीतत्व प्रमाणैकवशचित्तत्वम्। तच्च पुष्टिलीलाप्रवेशानधिकाररूपमेवेति तथेत्यर्थ। तदार्द्रनयना इति। जले निमग्नानामार्द्रे ते भवत एव। प्रकृते च तस्य शब्दब्रह्मात्मकत्वेन यादृश श्रुतिसिद्धं भगवत्स्वरूपं तादृशमेव दृष्ट्वापि पश्यन्तीत्येतदेवार्द्रत्वम्। तदानन्दाश्रुभिरपि तथात्वं ज्ञेयम्। सर्वस्यापि प्रघट्टकस्य तात्पर्यरूपं गूढाभिसन्धिमुद्घाटयन्ति ब्रह्मानन्दादिति।

यद्वा। ते तु ब्रह्मह्रदं नीता इत्यस्याभासः। ततो दर्शनानन्तरमित्यादि। अत्राय भाव। अक्षरानन्दाल्लीलात्मकानन्दस्याधिकत्वेप्येतेषा तद्रूपत्वेन तन्मध्यपातित्वेप्यक्षरानन्दस्यैयदवध्यननुभवेन तारतम्याज्ञानाद् भगवता च लोकमध्य एव लीलाकरणात् स्वस्येतरलोकसाधारण्यं मन्यमानाना स मनोरथोभूत्। तत्पूर्त्यर्थं स्वलीलात्मकत्वांशं हस्तपिहितमिव कृत्वा साधारणीं रीतिं प्रकटितवान्। तस्या तु सच्चित्प्राकट्यमेव जीवेषु, नानन्दांशस्य। तत्प्राकट्ये च ब्रह्मभाव सम्पद्यते। स चाक्षरानन्दांशभूतः। अक्ष-

१ स्वस्वरूप—गृ पा.।

मपदेनैतेषां प्रमाणतो ज्ञानकरणार्थं लोकं प्रदर्शितवानिति वक्ष्यमाणत्वाल्लोकदर्शनेन याहात्म्यज्ञानपूर्वकः स्नेह आर्द्रतयनत्वोक्त्या सूच्यते।

[1]नन्वेवं व्याकृतौ को हेतुः? यथाश्रुतव्याकृतेरपि साधीयसीत्वेन प्रतीयमानत्वात्[1]। तथाहि। अतिगभीरत्वेन [2]शुद्धत्वेन तापहारकत्वेन[2] ब्रह्मानन्द एव ब्रह्महृदपदेनोच्यते। यथा हृदे मग्नो बाह्यमर्थं न जानाति, तथा तदानन्दभरेण देहाद्यनुसन्धानरहिता जाता इति ज्ञापनाय मज्जनोक्तिः। ततः कृष्णेन पूर्णानन्देन ततो[3] गणितानन्दात्पृथक्कृताः देहाद्यनुसन्धानयुताः कृताः। तदा तल्लोकं ददृशुः। अत एव ब्रह्मण इति व्यस्तं पदमुक्तम्, दर्शनक्रियायाः पूर्वयसम्भवात्। एवं साधारणानां व्यवस्थामुक्त्वा श्रीनन्दादीनां विशेषत आह नन्दादय इति। किञ्च, 'दर्शयामासे'ति पूर्वं भगवत्कार्यमुक्त्वैतत्कर्तृकदर्शनं 'ददृशु'रित्यनेनोक्तम्। [4]एवं सति तावत्पर्यन्तमेकवाक्यतैवोचिता, न तु वाक्यभेद इति चेत्। स्यादेतदेवं यदि दर्शयामासेत्युक्त्वा विषयस्वरूपं चोक्त्वानुपदमेव ददृशुरित्युक्तं स्यात्। उच्यते च [5]ब्रह्महृदप्रापणं तत्र मज्जनं तत उद्धृतिश्चेति क्रियान्तरसमुदायः[5]। तत्रापि तुशब्देन पूर्वार्थव्यवच्छेदपूर्वकम्। त्वदुक्तरीत्या तु दर्शनात्पूर्वमेव तदानन्दे मज्जनमुक्तं भवति, तच्च नोपपद्यते, हेत्वभावात्। किञ्च, दर्शयामासेत्यनेनैवैतद्दर्शनस्य प्राप्तेस्त्वदुक्तरीत्या पुनस्तस्यैव दर्शनं ददृशुरित्यनेन न वदेत्। तस्मादाचार्योक्त एव ग्रन्थार्थ इति ज्ञेयम्॥ पञ्चविंशत्यध्यायविवरणं समाप्तम्॥

इति साधनप्रकरणम्॥

फलप्रकरणम्।

षड्विंशाध्याये प्रकरणार्थोक्तौ, ब्रह्मानन्दात् समुद्धृत्येति। ननु सर्वसमर्थत्वेन

१०-२६-०. ब्रह्मानन्दवत्स्वगृहस्थिताभ्य एव स्वामिनीभ्यो भजनानन्दं कुतो नादात्, लोकवेदत्याजनपूर्वकं विवक्षितरीत्या कुतो दत्तवानित्यत आहुर्ब्रह्मानन्दादिति। तथैवैतद्दाने एतस्यापि ब्रह्मानन्दमध्यपातित्वेन तत उद्धृतेर्वैयर्थ्यं स्यात्, भजनानन्दस्वरूपं चैतादृशमेवेत्येवंरूपानन्द[6]दाने तददत्तमेव च स्यादिति भाव.। ननु स्त्रीभ्य एवैतद्दाने को हेतुः। तत्रापि पूर्वमन्यविवाहितासु। कुमारीष्वतथात्वेपि भगवता समं विवाहाभावात्तन्याय

१....१. नन्वेवमाचार्यैः कुतो व्याकृतम्? यथाश्रुतार्थस्यापि सुवचत्वात्। मू. पा.। २....२. तापहारकत्वेन शुद्धत्वेन च मू. पा.। ३. 'ततो' इति नास्ति मूले। ४. 'एवं सति' इति मूले नास्ति। ५....५. ब्रह्महृदप्रापणादि.। मू. पा.।

६. आनन्ददान इति पाठः।

एव । अत एव वरदानानन्तरमपि 'लब्धकामाः कुमारिका' इत्येवोक्तमित्याशङ्क्य तत्र हेतुमाहु लौकिकस्त्रीष्विति । भजनानन्दो हि स्वरूपात्मकः । तच्च 'रसो वै स' इत्यादिश्रुतिभी रसरूपम् । स च यादृक् स्वशास्त्रसिद्धस्तादृगेव । तत्र च स्याविश्राहितायमेव मुख्यो रस इति निरूपितम् । अतो लोकसम्बन्धि यो लौकिक्या भगवदतिरिक्तलोके विवाहलक्षणसम्बन्ध एव य इति यावत् । एतादृशीषु सम्यक् सिद्धा भवति । तत एत कथाश्रवणेन तद्भावोदये पुरुषेपि स रसो भवेत्, नान्यथेति स्त्रीष्वेव तद्दानमित्यर्थः । सिद्ध इतिपदेनैतद्रसस्वरूपसिद्धिर्थे पूर्वं भूलोके स्यात्तदा यत्रापि तत्प्राप्तिः स्यात् । सा चैतास्वेव सम्भवतीति तथेति ज्ञाप्यते ।

किञ्च । एकमौतुल्यतया हि भगवद्रमणमिति मर्यादा । सा च ब्रह्मानन्दरूपा । तथा च पूर्वाध्याये ब्रह्मभावोक्त्या तद्रूपत्वमुक्तं जातमित्युक्तमर्यादापि सम्पन्नेतीतोप्यत्र रमणमित्याहु स्वानन्दानुभवार्थमिति । यद्यपि स्वामिनीष्वेतावता न कोपि विशेष, तथा 'प्यधिकं तत्रानुप्रविष्टं 'न तु तद्धानि'रिति न्यायोत्रापिशब्देन ज्ञाप्यते । तथा च स्वपदस्य स्वामिनीवाचकस्यानुभवपदेन सम सम्बन्धो ज्ञेय । आनन्दपदं भजनानन्दपरम् । यद्वा । बलदेवे स्वधर्मान्निरूपयता भगवता 'गोप्योन्तरेण भुजयोरपि यत्स्पृहा श्री'रितिवाक्ये श्रियोपि स्पृहानिरूपणेन तस्या अपि दुर्लभो यो रसस्त प्राप्य गोप्यो धन्या इति मनस्त्रीष्वेव स्वानन्दानुभवयोग्यता निरूपिता, नान्येष्वन्यासु वेत्यर्थ । तथा च तत्रैवैतदधिकारवत्त्वात् तथेतिभावः । यद्वा । 'हेमन्ते प्रथमे मासो'त्यत्र तेषां प्रसादरूपा शक्तिः स्त्री भवतीत्यत्र या शक्तिरुक्ता तत्प्रवेशो यत्र, तत्र प्रभुसम्बन्धयोग्यता, स चैतास्वेव सम्पन्न इति पूर्वं निरूपितमित्यर्थः । एवं सत्येतत्प्रवेशो यत्र पुरुषेपि भविष्यति, तत्रैवभावो भविष्यतीत्याशयेनाहु तद्वारेति । तासामनुग्रहद्वारेति चार्थ । यत्रापि तत्प्रवेशोनुग्रहो वा तत्रापि स्त्रीत्वमृते नैतद्रसप्राप्तिरित्याहु स्त्रिय एव हीति । तत्पुरुषरूपं भगवन्तमित्यर्थः । नत स्त्रीकर्तृकपानानन्तरं पुमान् भगवांस्तासु प्राकृतीतरसाधिकरणभूतासु तमेव रसं पातुं शक्त इत्यर्थः । रसास्वादे पुंभावात्त्येति भावः । यतस्ता एव रसयोग्यास्तत्पाने शक्ताश्चातो न कदाचिद्रमणे व्यवधानं करोतीत्याहुः अतो हि भगवानिति । आन्तर त्विति । सखीवृन्दे मिथो गुणानुवादे लीलासहितप्रियतमप्राकट्येनान्तर्ये भावविशेषा उत्पद्यन्ते, न ते सङ्गमेपीत्यस्य परत्वम् । 'नामरूपे व्याकरवाणी'ति श्रुते प्रपञ्चस्य द्विरूपत्वेन लीलाप्रपञ्चस्यापि तथात्वाद् गुणगानलक्षणनामात्मकभगवत्स्वरूपस्य परमानन्दरूपभावात्मकरमणलक्षणा लीला प्रिये दोषारोपादिदोषरहितात्र निरूप्यत इत्याहु ततः शब्दात्मिकेति ।

१ 'न तु तद्धानि' इति मूले नास्ति ।

सप्तमाध्यायव्यवस्थैषा । शब्दादिकाया अपि लीलायाः प्रवृत्तिनिवृत्तिभेदेन द्विरूपत्वेनोत्तरा सप्तमाध्याये निरूपिता । पूर्वस्याः सदोषत्वादत्रापि तत्पूर्वाध्याये वेदात्मकशेषरूपत्वेन बलदेवस्य तत्साहित्येन कृतलीलायां शङ्खचूडोक्त्या सदोषत्वं तद्वधोक्त्यात्र सापि निर्दुष्टेति ज्ञाप्यत इत्यर्थः । अत एवाध्यायद्वयेन निरूपणमिति भाव ।

यतो रूपं पञ्चात्मकमतस्तदानं पञ्चधातस्तन्निरूपणमपि तावद्भिरध्यायैः कृतमित्याहुः तत इति । पञ्चात्मके रूपे येनांशेन या लीला कृता ता ता लीलां क्रमेणाहुः आत्मनेति सार्धेन । 'यथेन्द्रियादिरूपत्वं शुद्धस्य ब्रह्मणस्तथा । आत्मत्वादिस्वरूपत्व मन्तव्यं श्रुतिवाक्यत. । यथेन्द्रियादिसङ्घात आत्मनो मुख्यता तथा । प्रकृतं स्वामिनीभावप्राधान्यं तत आदिमे । स एवोक्तः प्रभुर्यस्माद्रसरूप श्रुतेर्मत । आत्माधीनं यथा कार्यं सर्वमेवमिहापि हि । भावाधीनमतः प्रोक्तमात्मनेत्यादि सुष्ठु हि । अन्याप्राधान्यतः पूर्वं केवलेनेति तत्तथा । तत्तत्प्राधान्यतस्तत्तल्लीलेत्यग्रे तथोदितम् । मनःप्रभृतिसर्वस्व[1] तासु नास्ति हरे परम् । इति ज्ञापितमेतेन विप्रयोगदशासु वै' । यद्वा । आत्मना प्रथमेत्यादिनोक्त पञ्चविधत्वं प्रत्यध्यायोक्तलीलायामपि ज्ञेयम् । तथाहि । प्रियाभ्यः फलं दातुं तथा रूपप्राकट्य कृत्वा स्थित इति भगवत्पदेनात्मना लीलोक्ता । 'मन्मथ्क' 'कृष्णगृहीतमानसा' इत्यादिनाऽन्योन्यं चित्तव्यतिषङ्गो निरूपित इति मनसा । ततः 'स्वागतं व' इत्यादिकथनाद्वचसा[2] । तादृग्वचनश्रवणेपि प्राणानां स्थितिस्तु, प्राणरूपेण भगवानेव वाग्द्वारा प्रविष्ट इति प्राणैः सा । अत एव मूले 'प्रतिभाष्यमाण'मित्युक्तम् । बलं हि प्राणाना धर्मः, एते चालौकिका इति भगवद्वशीकरणलक्षणं बलं संपन्नमिति स्वामिनीप्राणरूपत्वं प्राणरूपत्व चेति तथा । तत इन्द्रियशरीरयो सेति स्पष्टम् । तिरोधानमपि कायिकमिति तथेति प्रथमाध्यायस्थितिः । तिरोधानदशायामेतासामात्मा भगवत्येव प्रविष्ट इति स एवात्मत्वेनैतासु स्थितः कार्यं कृतवानित्यात्मना सा । एवमेव मनःप्रभृतीन्द्रियान्तं ज्ञेयम् । 'नात्मागाराणि सस्मरु'रिति वाक्यादेहस्मृतिरहिताना पुन पुलिनागमनं स्वतो न सम्भवतीति शारीरी सा । तृतीयेऽध्याये व्रजोत्कर्षहेतुत्वं दर्शनाभावेन वधहेतुत्वं रक्षकत्वमलौकिकत्वे सति ब्रह्मप्रार्थनया प्राकट्य च स्वरूपमात्रस्यैवेत्यात्मना या लीला सा चतुर्भिरुक्ता । ततोग्रे [3]निकटागमनद्विविधरमणमुख्यरसदानानि प्रार्थितानि, तानि चोद्दीप्तभावपूर्वकाणि । भावाश्च मनोनिष्ठा इति तल्लीला चतुर्भिरुक्ता । तत एकेन प्राणस्थितिहेतुत्वेन कथास्वरूप निरूपितम् । तत्र वाक्प्राणरूपत्वं स्पष्टम् । ततोग्रे प्रहसितेक्षणादिकं चेन्द्रियकार्यमिति तल्लीलोक्ता । ज्ञानकर्मभेदेनेन्द्रियं द्विविधमिति

१.—सर्वं स्व मू पा ।

२. वाचा सेति मूले पाठ । ३.—गमनाद्विविधेति तु टिप्पण्यपोऽशुद्धः पाठो मूले नास्ति ।

श्रुतेरेतावत्सर्वतो भगवता कृतम्, न तु साधनबलेनैतास्वित्याहुः स्वजमिति । तर्हि नादेनाकारणं गमनबोधनादिकं चानुपपन्नमित्याशङ्क्य, तत्रोपपत्तिं वदन्तो भगवान् लीलां कुर्वन् शास्त्रमर्यादामपि प्रदर्शयतीत्याशयेनाहुः ते चेतसमर्पितात्मान इति सार्धेन । सर्वात्मभाववन्तस्थैव भक्ता भवन्ति, तदैवायं रसः प्राप्यो, नान्यथेत्यर्थः । एतेनैतास्वेवैवं रमणं कुतो नान्यास्विति शङ्कापास्ता । सोपि भगवत्कृत एव भवति, नान्यथेति ज्ञापनाय तदुपायरूपरिरंसाचन्द्रोदयगाननिषेधवचनान्युक्तानीत्याहुः तत्रोपायश्च रूप्यत इति । तत्र समर्पितात्मत्व इत्यर्थः । अन्तर्गृहगतकथयैतद्भावरहितानां नैतत्प्राप्तिरित्यत्र निदर्शनमप्युक्तमिति चकारार्थः । गानतिरोधानाभ्यामन्यापि सा मर्यादा ज्ञाप्यत इत्याहुः आत्मेति । लङर्थे लुङ् छान्दसः । रसमर्यादामग्रे स्वयमेव वदिष्यन्त्यन्त्यश्लोकद्वये । अन्तःप्रपत्त्यभावे बाह्येतस्तिरोधत्ते । तत्र हेतुरन्तःकरणसम्बन्धीति । यथा पतिपुत्रादिः शरीरसम्बन्धी, तथा हरिः सर्वभावप्रपत्त्येकलभ्य इति, सा चान्तःकरणधर्म इति तथा । तथा च हेत्वभावे कार्याभावो युक्त इति भावः । तिरोधानमपि मानजदुःखहरणार्थमेवेत्याहुः हरिश्च स इति । अत्र हरिपदस्यायं भावः । 'एवं गजेन्द्रमुपवर्णितनिर्विशेषं ब्रह्मादयो विविधलिङ्गभिदाभिमानाः । नैते यदोपससृपुर्निखिलात्मकत्वात्तत्राखिलामरमयो हरिराविरासी'दिति वाक्यार्थान्यैररक्षणे जाते स्वयमाविर्भूय रक्षितवान्, एवमन्वेषणादिसाधनानामसाधकत्वेतिदैन्ये[1] सति तन्निवारणाय स्वयमाविर्भूय सर्वं कृतवानिति । अथवा । अन्तःकरणसम्बन्धी सन् तत्र स्थितः सन् बाह्यतस्तिरोधत्त इत्यर्थः । यद्वा । मानस्यायं हि सहजो धर्मो यन्नायकतिरस्कारोऽवचनानीक्षणादिभिः, प्रकृते च तत्कार्यं स्वयमेव प्रभुः कृतवान् । न केवलमधुनैव, किन्तु सार्वदिकोयं व्यवस्थेत्याहुः सोऽन्तःकरणेति । सः पूर्वोक्तरसभावात्मक एव प्रभुः स मानात्मकः सन्नन्तःकरणसम्बन्धी चेत्तदा बहिस्तथेत्यर्थः । यद्वा । कायिकचेष्टया मानापनोदनं कुतो न कृतवानित्याशङ्क्य तत्र हेतुमाहुः स इति । अन्तर्ज्ञानादिकार्यकरणं येनेत्यन्तःकरण आत्मा तत्सम्बन्धी यतोऽतस्तथेत्यर्थः । आद्येष्वात्र आत्मनैवैतदात्मनि स्वानन्दं पूरितवानित्यन्तरेव च सोस्तीत्यन्तरेव प्रविश्य [2]तद्धर्मापनोदनं कृतवानित्युच्यते । यदा कायिकमानन्ददानं करिष्यति, तदा बहिरेव तथा करिष्यतीति भावः । अत एव गीतगोविन्दादिषु तथैव गीयते । हरिरिति पूर्ववत् ।

आद्यश्लोके सर्वास्वेव रात्रिष्वित्यादि । ननु तासां रात्रीणां नित्यत्वाद् दिवापि सत्वेन तेष्वप्येतद्रात्रिप्राकट्यं कृत्वा रमते, उत लौकिकीषु रात्रिष्वेव तथा कृत्वा
१०.२६.१. तथेति शङ्कानिरासायाहुः सर्वास्वेवेत्यादि । यावतीषु ता आरोपितवांस्तावतीषु

१.—मसाधनत्वेनातिदैन्ये मू. पा. । २. तद्धर्मापनोदं मू. पा. ।

सर्वासु रात्रिष्वेव लौकिकीष्वित्यर्थः । अन्यथैव 'शशाङ्कांशुविराजिता' इति श्लोकेन लौकिकीनां तासामतिदेशो न सङ्गच्छेत । दिवापि तथोक्तौ दोहनपयोधिश्रयणसंयावसिद्ध्यादिकं गोपानां दिवा गोचारणादिपरागमेतासु स्वपार्श्वस्थत्वेन माननं च न सङ्गच्छत इति भावः । पूर्णत्वादिति । रसशास्त्रीयाभिः सर्वाभिः कलाभिः पूर्णत्वादित्यर्थः । सकलकलापूर्णभगवन्मनःसम्बन्धिचन्द्रस्यापि सदा तथात्वानामु तत्प्राकट्यकरणेन तथावकरणमित्याशयेनाहुः पूर्णमेत्यादि । अन्यदा सदोषस्य जगदादेर्दोषनिवर्तकत्वं कमलादिलक्षणगुणाधायकत्वं च शरदो लोके दृश्यत इति तस्यामसाधारणो धर्मोऽस्तीति ज्ञायते । इहापि रसानुपयोगिवस्तुनिरासपूर्वकं भगवद्भावपोषिकाऽलौकिकी शारद्विभूतिरिति तामेव कृतवानित्याहुः ऋतुमपीति । पुंसां सदोषमार्गीणामन्यत्र न प्रवेश इत्यपि ज्ञापयितुं वसन्तादीनां प्राकट्यमकरणमिति हृदयम् । ननु रात्रीणां नित्यत्वेन तद्धर्माणामपि नित्यत्वात् तासां कान्तामकत्वेनत्वे स्वयंभावाच्च तत्करणोक्तिर्विवरणे कथमुपपद्यते । न च [1]मनस इत्येव वाच्यम् । तथात्राश्रुतेरिति चेत् । इत्थम् । अत्र हि वीक्षणस्य तथाकरणे हेतुत्वमुच्यते । तथा च सर्वविषयकापरोक्षनित्यज्ञानवतो नित्यरात्रिदर्शनस्यापि तथात्वेन तत्कार्यस्यापि तथात्वापत्तौ तत्समाधानाय वीक्षणे पूर्वस्माद्विशेषो वाच्यः । स चात्र विषयरूप एव वक्तुं युक्तः । स च विशेषणांश एव । पूर्वं तस्यानाविर्भावनादधुनैव तथाकरणाद्रसोद्दीपकां सामग्रीं प्रभुरेव [2]कृतवानिति सुस्पष्टमाचार्यैं कृत्वेति । यद्यपि विशेषणस्यापि नित्यत्वेनोक्तदूषणानुद्धारस्तथापि भक्तानामपि दर्शनयोग्यता तत्र सम्पादितेति तथा । नान्यथाभावेनेक्षणमेव विशेष इति ज्ञेयम् । अत एवोपसर्गो चेति । वस्तुतस्तु तल्लक्षणसम्बन्धिनी रात्रिर्निर्दिश्यत इति नानुपपत्तिः काचित् । यद्यपीत्यादिनाऽपिशब्दार्थ उक्तः । तथापि मर्यादेति । रसमर्यादेत्यर्थः । एवं कार्ये योगमायाया इति । भजनानन्ददानलक्षणे कार्ये इत्यर्थः । अन्यत्र स्थितं ममाणम् । वेदात्मानं सङ्कर्षणं देवक्या स्थितं रोहिण्यां योजितवती, स्वयमाविर्भूय मथुरायां स्थितमानन्दरूपं प्रभुं गोकुले, तथात्रापि पूर्वं गोपानां गृहेषु स्थिता कचोधुना भगवति योजयति, भगवति स्थितमानन्दं च तास्वित्यर्थः ।

अत्र कश्चिदाह । आनन्दस्य सुखरूपत्वादमूर्तस्यान्यत्र गमनासम्भवात्प्रियसङ्गनिमित्तकः स्वामिनीषु सुखविशेष उत्पन्न इत्येव वक्तुं युक्तम्, अतो योगमायाश्रयणनिमित्तकथनमनुपपन्नमिति । स वक्तव्यः । 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त' इत्यादिश्रुतिभ्य 'आनन्दमयोऽभ्यासा'दित्यादिन्यायेभ्यश्च धर्मिग्राहकप्रमाणभूतेभ्य आनन्दमयत्वं भगवत्स्वरूपे मन्तव्यम्, अनिच्छतापि त्वया । तथैव चिद्रूपस्य धर्मरूपभग-

---

१. रमेति टिप्पणपाठः । २. कृतवानिति पाठो मूले नास्ति ।

शब्दार्थज्ञानरूपत्वं 'प्रकाशाश्रयवद्वा तेजस्त्वा'दिति न्यायाद्धर्मरूपतापि । तथा च 'तदेजती'ति श्रुतेस्तस्य गतिरूपत्वमप्यङ्गीकार्यम् । अत एव व्यापकत्वेपि गतिलीलोपपद्यते, दामोदरलीलेव । वस्तुतस्तु स्वरूपमर्यादामव्यतिक्रम्य भक्तार्थे लीलां करोतीति नानुपपत्तिः काचित् । अत एव 'रसं ह्येवायं लब्ध्वानन्दी भवती'ति श्रुतिः । सर्वात्मभावलक्षणः स्थायिभावो रसस्तमेव लब्ध्वानन्दवान् भवति । तादृशे प्रभुः स्वरूपानन्दं ददातीति तथा लाभकथनेन भगवद्दत्त एव प्राप्यते, नान्यथेति सूच्यते । एवकारः सर्वत्रानुपज्यते । तथाहि । रसमेव लब्ध्वा तथा । तं लब्ध्वा तथा भवत्येव । तथा भूत्वा आनन्द्येव भवति, न तु लौकिकदुःख्यपीति च । अतः **प्रमाणातिरिक्तमार्ग** इति । प्रमाणमार्गातिरिक्तो मार्ग इत्यर्थः । यतोऽन्यत्र स्थितं प्रमाणमन्यत्रापि योजयत्यतोऽन्यभजनरहितं विवाहितपतिभजनं विदधच्छास्त्रं तत्त्यागपूर्वकं भगवत्सेवामेव विधत्त इत्यर्थस्तु स्वामिनीनां तथा भजनेन तेन च फलसिद्ध्या 'या मा भज'न्नितिवाक्येन भगवता प्रत्युपकृतित्वेन कथनात्फलरूपेण चाधुना ज्ञाप्यते । तस्य मार्गत्वं च । अन्यथोन्मार्गत्वमेव भवेत् । अस्त्वेवमेतदित्यादिना प्रतिपादितं च ताभिः । ईश्वरवाक्यस्याखिलप्रमाणाधिकबलवत्त्वेपि स्वामिनीवाक्यैर्दुर्बलत्वमपि प्रमाणातिरिक्तो मार्ग इति ज्ञेयम् । यद्वा । प्रभुप्राप्त्यर्थं गुरूपसत्तिस्तदुक्तकरणं च भक्तानां प्रमाणमार्गः । प्रकृते च स्वामिनीप्राप्त्यर्थं योगमायाश्रयणादिकं प्रभुः करोति करिष्यत्यपीति प्रमाणातिरिक्तो मार्गः, यतोऽन्यत्र प्रतिष्ठितमानन्दमन्यत्र योजयत्यत एतद्भावेन भजनरूपोऽत्युत्कटस्नेहजविरहभावेन सर्वत्यागपूर्वकं स्वदेहादिविस्मृतिपूर्वकं भगवदन्वेषणपरत्वलक्षणश्च भक्तिमार्ग इत्यर्थः । इदं च द्वितीयतृतीयाध्यायादिषु स्पष्टम् । एवं सत्यस्मिन्मार्गे स्वामिन्य एव गुरव इति ज्ञापितं भवति । स्वामिनीनां विप्रयोगभावे सौभाग्यमदादिर्हेतुः । तत्र च भगवद्धर्मप्रवेश[1] एव हेतुः । अन्यथा पादरजःप्रपन्नानामेतासां मदो मानश्च न स्यातामिति भावः । नन्वेवं 'शशांकांशुविराजिता निशा' इति वाक्याल्लौकिकीष्वपि रात्रिषु रमणमिति ज्ञायते । एवं सत्यलौकिकीत्वपरिग्रहे गौरवं विशेषाभावश्चेत्याशङ्क्य लौकिकीनामपि तासां स्वरूपमाहुः **याश्च रात्रय** इति । **निर्मिता** इतिपदात्सर्गादावेवैतदर्थमेव भगवता सृष्टाः काश्चन रात्रयो भगवत्येव स्थिता एतावत्पर्यन्तं, लीलासमये लौकिकीष्वेव रात्रिषु स्थापयित्वा तां कृतवानिति ज्ञाप्यते । लौकिकेन्दुप्रकाश्यत्वेन गीतगोविन्दाद्युक्तप्रकारेण लौकिकरीत्यैव रमणेन चैतासां लौकिकीत्वमुच्यते । [2]तासु विवक्षितेन्दुप्रकाश्यत्वेन नायकमानोक्त्या नायकाप्रणिपातोक्त्यैतन्माननायकान्तर्धाननायिकादैन्योक्त्यैतद्धेतुकतदाविर्भावे तदधीनत्वोक्त्या प्रश्नोत्तरे

1. भवद्धर्मप्रवेश मू. पा. । 2. तासुक्षिति पाठः पर मूले नास्ति ।

परोक्षभजनोक्तौ पूर्वमननुभवेपि प्रत्यक्षभावेपि तदनुभवतद्भाविनश्वामोत्र या भगवद्विचारितानु-पूर्वीकस्वरजायुवत्यनादिभिश्चालौकिकरीत्यैवालौकिकरसदानमिति ज्ञाप्यते । उक्तार्थेषु लौकिकवैलक्षण्यं स्पष्टम् । एव सति स्वरूपत एव चालौकिकत्वमितिविवेकः । एवं कथन उपपत्तिमाहुः अन्यथेति । साधारणीनां रात्रीणां तल्लीलाश्रयत्वे तासां सर्वत्रैव तुल्यत्वात् सर्वेषु देशेषु सर्वेषामेतदानन्दप्राकट्यं स्यादित्यर्थः । अन्यथेत्यस्यैव विवरणं साधारणीत्यादि । भूम्येकत्वेपि लीलाश्रयभूम्यधिष्ठानत्वेनास्या नानुपपत्तिरिति भावः । ननु सर्वज्ञस्य रात्रिदर्शनमपि सार्वदिकमिति यदधुना को विशेष इति चेत्तत्राहुः शरदि कृ-तानित्यादि । विशिष्टदर्शनं विशेष इत्यर्थः । ननु विशेषणस्यापि नित्यत्वात् तथेति चेत् । सत्यम् । यादृशी लीलोच्यते तादृश्या एव नित्यत्वादधुनैवोक्तविशेषणवैशिष्ट्याभिव्युक्तेपि न दोषः । एतद्यथा तथा विद्वन्मण्डने निरूपितमस्माभिः । ईश्वरस्यान्याश्रयणं हि लौकिकी रीतिः, तदुक्तत्वात्[1] तद्रीत्यापि रमणं सूच्यते । एवं सति मध्यस्थत्वेन तदा तस्या विशेषत उपयोग इति तदाश्रयणमुक्तमिति ज्ञेयम् । किञ्च । स्वाशक्ये ह्यर्थेऽन्याश्रयणं क्रियते । तथा च सर्वसमर्थस्यापि स्वानन्ददानसमये ईश्वरत्वादिधर्माज्ञान सम्पादयितुं रसपरवशत्वेन न कर्तुं शक्यं, गोपानां चैतल्लीलाविषयकाज्ञानं तथा, आगमनसमये निषेधोक्त्या तज्ज्ञानस्य कथनात् । [2]अत एतदादिकार्यसिद्ध्यर्थं योगमायाश्रयणमलौकिकरीत्या रमणेपीति ज्ञेयम् । अत एव 'मोहितास्तस्य मायया' 'मन्यमानाः स्वपार्श्वस्था'निति वक्ष्यति । अत एव रसोपयोगि यद्यत्कार्यं तत्तदा[3] तदा सम्पादयितुं शक्येयमिति स्वनिकट एव मूर्तिमत्यास्तस्याः स्थापनमिति ज्ञापनायोपेत्युपसर्गः । एतदेवोक्तं समीप एवाश्रित्येत्यनेन ।

१०-२९ २. तदोडुराज इत्यस्याभासो नूतने तस्मिन्नित्यारभ्य समज इत्यन्तः । अत्रेदं प्र-तिभाति । आश्रितयोगमायात्रैश्वर्यमर्यादामुल्लंघ्य भगवानधुना प्रवृत्त इति ज्ञायते । अन्यथा रसमर्यादोच्छित्त्येव । एवं सति यदवधि सर्वविकाररहित्येन नैवंविधं मनः प्रकटितमिति सर्वथैतादृशस्य तस्य नूतनत्वम् । लौकिकीं रीतिमनुसृतवतस्तद्दे-वतापेक्षापि घटते । लोके देवताधिष्ठितस्यैव कार्यक्षमत्वात्, अन्यथा नियामकाभावेन सामर्थ्या-भावेन चान्यैव यथापूर्वमेव भवेत्, न तु रसैकपरवश सदा । अत एव नगजेन्द्रलीलः इति वक्ष्यति । करिणीस्पर्शमात्रेण परवशत्वं तत्र प्रसिद्धम् । युक्तं चैतद्विभावादिकं विना न रसपोष इति । 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति'रिति वात्स्यायनसूत्रात् । वस्तुतस्तु 'रसो वै सः' इत्यादिश्रुतिभ्यो रसरूपत्वात्प्रभोः स यादृशस्तच्छास्त्रसिद्धोऽस्ति तादृशो निरूप्यत इति

१. तदुक्तत्वात्र मू. पा. । २ २. तदन्त इति पाठोऽधिकः ।
३. तत्तत्तदा मू. पा. ।

नानुपपत्तिः काचित्। अत एवैवंभूतस्यैव नित्यत्वमपि। एतद्विद्वन्मण्डने द्रष्टव्यम्। तस्मात्सुष्टूक्तमनधिष्ठितं चेत्यादि। ननु चन्द्रस्योदयकर्तृत्वं मूले प्रतीयत इति भगवतः सृष्टिकर्तृत्वोक्तिरत्र विरुद्धेति चेत्। न, अनवबोधात्। यदा मनश्चक्रे तदैव य उडुराजोर्थादुत्पादितः स उदगादिति मूलार्थस्य विवक्षितत्वात्। अन्यथा तदेति न वदेत्। सोप्युदगादित्येव वदेत्। किञ्चाग्रिमश्लोकोक्तचन्द्रदर्शनान्यथानुपपत्त्यैव चन्द्रोदयप्राप्तेरेतच्छ्लोकवैयर्थ्यापातः। एवं सति चिकीर्षितलीलाया वेदलोकयोरप्रतीतत्वेनापूर्वत्वात्त सामग्र्यप्यपूर्वैव सर्वा सम्पादितेति ज्ञापनाय तदेत्युक्तिपूर्वकं तदुदयवर्णनमिति ज्ञायते। अत एव भगवन्मनश्चन्द्रस्येत्यारभ्य कदाचिदपीत्यन्तो ग्रन्थो युज्यते। अन्यथा मूले पूर्णत्वादिधर्माः कण्ठोक्ता नेत्याचार्या अपि न वदेयुः। अत एव पूर्वश्लोके मनसोपि करणमुक्तं चक्रे इति पदेन। क्रीडायां मनस एव मुख्यत्वात्तस्य नूतनतया करणोक्त्यैव सर्वस्या अपि सामग्र्यास्तथात्वं ज्ञातं भविष्यतीत्यभिप्रायेण। एवं सति तादृशं चन्द्रं च प्रभुः ससृज इति हेतोरग्रे तदुदयमाहुः। शुक इत्याभासार्थो ज्ञेयः। तथापि क्रमेणैवेति। अन्यथा रजन्येवेति प्रभुर्न वदेदिति भावः। नन्वस्या राज्या नित्यत्वेनैकयैव चारितार्थ्ये बह्वीनां तासां परिग्रहः किमर्थ इति चेत्। अत्र वदामः। नायिकाविशेषेषु प्रतिपदादितिथिनियतगन्तव्यताकचन्द्रादिविशेषैरेव रसः प्रादुर्भवतीति वात्स्यायननयसिद्धत्वात्तदर्थमेवोक्तरूपाणां तासां परिग्रह इति। रात्रीणामलौकिकत्वेन प्राकृतनक्षत्राद्यस्त्वेप्येतद्रात्रिप्रकाशयोडूनां चाप्रसिद्धत्वेपि यदुडुपदोपादानं तत्त्वेतद्रात्रिष्वेव प्रकाशमानत्वेन [1]स्वामिनीनां मनांस्येवात्रोडुत्वेनाभिमतानीत्याहुः सोऽपि चन्द्र इत्यादिना। इन्दोर्नक्षत्रसजातीयत्वं 'नक्षत्राणामहं शशी'तिवाक्यात्सिद्धम्। एतन्मनस्तु तत्त्वोक्त्यैतच्चन्द्रसजातीयत्वं सूच्यते। तच्च भगवन्मनःसम्बन्धित्वम्। तत्त्वं चात्र भगवन्मनोंशत्वं स्वमनःप्रवृत्तिनिवृत्तितोषादिकार्यार्थमाविर्भावितत्वं च। प्राच्याः ककुभ इत्यत्र, प्रतिस्पर्धिन्यामिति। प्रतीच्या दिशो यर्थः। उत्तरसन्ध्यायामखिलद्विजोपास्यत्वेनेयमेव दिङ् मुख्येति मर्यादामार्गीयत्वं लक्ष्यते। रविश्च तथा। अतस्तेन तत्र रागसम्भवः। यत्रोक्तरूपेन्दुप्राकट्यं सा दिक्पुष्टिमार्गीयेति तस्या एतत्प्रतिस्पर्धिनीत्वम्। एतेन मर्यादामार्गे ताप एव, पुष्टिमार्गप्रवेशे तन्निवृत्तिरिति सूचितम्। प्रातः प्राच्या अपि तथाभूताया एवाधुनैवंभूतात्वकथनात् अधुना प्रभोरिन्दुत्वेन तद्देवतात्वेनाप्यस्यास्तस्याः सकाशादुत्कर्षः। पुष्टिमार्गोत्कर्षमेव प्रभुः करोति, नान्यत्रास्मादुत्कर्षं सहत इत्येतत्सर्वं हृदि कृत्वा तस्या मुखे न राग इत्याद्युक्तं प्रतिस्पर्धिनीत्वमप्युक्तमिति ज्ञेयम्। स चर्षणीनामित्यत्र। इदं ज्ञेयम्। चृष्[2] प्रजननैश्वर्ययोरिति पाठादयं धातुगविर्भावन ईशधात्वर्थे गमने च शक्तः। अथवेशस्य

---

१. स्वामिनीमनांस्ये—मु. पा। २. चृष् मु. पा.।

मात्र ऐश्वर्यं तत्र तथा । प्रकृते तु[1] सर्वसमाविर्भूतस्य परमाधिकारिमात्रसुखस्यैव याः शक्तयोऽधिकृतास्ता भगवदाविर्भावं ज्ञात्वा तादृशीराविर्भाव्य फलमिदं प्रतीयमानात् पर्यन्तमन्यभावेभ्यस्ता रक्षन्तीति चर्षणीशब्देनोच्यन्ते । यद्यपि शाब्दिकैरेतच्छब्दस्य गत्यर्थकत्वमेवोक्तं, तथापि गत्योरित्यनुस्यूता यदुद्देश्ययोर्निरुक्तं तत् गोपनार्थोत्र ग्राह्य इति ज्ञापनायैवमस्माभिस्तथोक्तम् । गमनार्थत्वे तु यत्र ता आविर्भाविताः तत्र गत्वा तं तत्कार्यमित्यनुभूतस्य तयोर्भवन्तीति तथा । तथा च स्वामिनीषु भगवद्भोगयोग्यास्वपि तद्विलम्बे दृष्ट्वेतदार्ति च चर्षणीनां परमसंतापशाच्छो शोजति । एवं सत्ययमिन्दुः प्रियसंगमाभावजदुःखं स्वामिनीनामपनयन् केवलानां तदपनयति, किन्तु चर्षणीसहितानामिति सूक्ष्मार्थः सम्पद्यते । स्वामिनीदुःखनिमित्तकस्तासां शोक इत्येतद्दुःखनिवारणेनैव तासामपि स निवर्तत इत्यमुख्यत्वात्सदभावं तासामुक्तः । एतदिन्दुस्वाभाव्यादेतदुदये संगमनिश्चयेन च तन्निवृत्तिः । इदमेवोक्तं चर्षणीसहितानां जीवानां येत्यादिना । अन्यपक्षे तु परमानन्दानुभवस्ताः शक्तयः स्वयं तदर्थिन्यो भगवद्भक्तेष्वेतदतिरिक्तेष्वितावकाशार्थं परिभ्रान्ताश्चर्षणीशब्देनोच्यन्ते । मुक्तौ तदभावं ज्ञात्वा तादृशेभ्यः स्वयमेव निवृत्ता भवन्ति । भगवतैव तादृश्य एव ताः सृष्टा इति तेषु न प्रवेश इति ज्ञापनाय न एमन्त इत्युक्तम् । अत एवाग्रे स्वत एव निवृत्ता भवन्तीत्युक्तं, न तु निवर्तिता इति । तथा चैतदुदये तच्छोकनिवृत्तिर्जातेति तथा । अस्मिन्पक्षे पुनश्चन्द्रपरामर्शस्य प्रयोजनाभावादेकस्मिन्वाक्ये वारद्वयं तत्कथनासम्भवात्पूर्वमप्रसिद्धत्वेनास्येन्दोः प्रसिद्धचर्यकत्वमपि तच्छब्दस्य न वक्तुं शक्यमित्यरुच्याप्रिमः पक्ष उक्त इति ज्ञेयम् ।

दृष्ट्वा कुमुद्वन्तमित्यस्याभासे, तस्य शब्दयोनित्वं निरूपयन्निति । वाचः

१०·२६·३. पूर्वरूपं हि मनस्तच्च समानाधिकरणतया एव गतयास्तया । प्रकृते च गान एतच्चन्द्रदर्शनस्य हेतुत्वोक्त्यापि गानसमानाधिकरणमनोधिष्ठातृत्वं तत्र ज्ञाप्यत इति भावः । न चैवं वनेपि तत्त्वापत्तिरिति वाच्यम्, विशेषणस्यैव तत्र प्रयोजन[3]कत्वेनोक्तेः । रमाननाभमित्यत्र, लक्ष्म्या अयं भ्रातेत्यादि । भगवान् रमणेच्छायां तद्रसपूरणार्थं मध्यानन्दं लक्ष्म्यात्मकनायिकारूपमाविर्भावितवान् । तस्यैव रमणस्थानत्वात् चन्द्रोपि तथैवायमाविर्भावित इत्यस्य तद्भ्रातृत्वमत एव समानाकारत्वमिति भावः । नवकुङ्कुमारुणमित्यत्र, नवपदस्य तात्पर्यमाहुः स्त्रियाहसमय इत्यादि । कन्दे गानस्य हेतुमाहुः यदि व्यक्तमित्यादि । यद्यपि स्वरूपविवक्षा न तच्छ्रवणनियम्यो, तथापि गीतस्यार्थः स्वरूपमेवेति, तच्चार्थसंयुक्तमेवेति गीतस्य व्यक्तत्वेऽर्थस्यापि तथात्वं

१. 'तु' इति नास्ति मूले । २. प्रतीयमाना इति पाठोऽपास्यः । ३. प्रयोजकत्वे—मू. पा. ।

स्यात्। तथा च 'तदनङ्गवर्धन'मितिवाक्यात्स्वरूपरसानुभवेच्छाया एवोद्भूतत्वेन तदनुभवेनैवागमनप्रतिबन्धः स्यादिति भावः, वामदृशामित्यत्र। यासां पुनर्दृष्टिरित्यादि। पुष्टिमार्गानुसारिस्वजनपरत्वमेवोत्तमत्वं दृष्टेः। अन्यथा चार्वादिपदान्यपहाय वामपदं न वदेदिति भावः।

निशम्य गीतमित्यत्र, यद्यपीति। उपक्रम एतत्सम्बन्धिरात्रिदर्शनस्यैव
१०-२६-४ रिरंसाहेतुत्वेनोक्तेरिति भावः। तथापीति। तदनङ्गवर्धनमितिवचनाद्
भगवदीयोनङ्गो यत्रास्ति तं तत्र वर्धयत्येवेयेतास्वपि स्थितः, स तेन तथा कृत इत्येता आयागता इत्यर्थः। अत एव वर्धकत्वमुक्तं, न तु जनकत्वमिति भावः। एतदेवोक्तमाह्वानं सदृशमित्यनेन। पूर्वापेक्षयाधुनात्युत्कटो जात इत्याशयेन नूतन उत्पन्नः काम इत्युक्तम्।

दुहन्त्यः इत्यस्याभासः। प्रसङ्गादित्यादि। अत्र पक्षद्वयं सम्भाव्यते। कुमारी-
१०-२६-५. णामेवाह्वानं मुख्यमित्येकः अविशेषेण तथेत्यपरः। तत्राद्ये प्रसङ्गादित्यादि।
द्वितीये तासामित्यादि। एवमग्रेपि। गुणशब्दोत्र सर्वत्र भावपरो ज्ञेयः। भाववैलक्षण्यज्ञापनाय तथोक्तिः। जातीत्यादि। धर्मपदं त्रिष्वप्यनुषज्यते।

दोहनाद्यपेक्षयाञ्जनस्यान्तरङ्गत्वादन्यस्मिन्मण्डने सत्यप्येतद्विना तेषां सौन्दर्या-
१० २६-६. जनकत्वादसम्पूर्णस्याशोभाजनकत्वाच्च मुख्यत्वमिति तत्त्यागोऽशक्य इति
तत्करणाद्विलम्बाधिकार इत्युक्तम्। ज्ञानमार्गशोधिका इति तु शाङ्करीत्यां बुभुत्सूनां बोधायोक्तम्।

काश्चित्कृष्णान्तिकमित्यत्र, तन्मध्येपीति। अन्यथा पूर्ववाक्ये काश्चिदित्युक्त-
१०-२६-७. त्वाद्दोहादित्यागस्य उक्तस्य सर्वसाधारणत्वादग्रे काश्चिदितिपदमसम्बद्धं
स्यादिति भावः॥

अन्तर्गृहगता इत्यस्याभासे, यासां[1] काल इत्यादि। नन्वासां भक्तत्वात्कालस्तथा
१०-२६-९ कर्तुं न शक्नोतीति चेत्। अत्रेदमाकूतम्। 'उक्तं पुरस्ता'दित्यस्य द्वितीय-
व्याख्यानानन्तरं 'यासां साक्षा' दित्यादिनोक्तप्रयोजनार्थं प्रतिबन्धोवश्यं कार्यः। भगवांस्तु भक्तानां स्वप्राप्तिप्रतिबन्धं न साक्षात्करोतीति वस्तुस्थितिः। अतोधिकारी 'काल' प्रभुकार्यं कृतवानिति नानुपपत्तिः काचित्।

उक्तं पुरस्तादित्यत्र, उक्तं निर्गलितार्थमाहुर्यथाशास्त्रमित्यादिना[2]। अन्यथा
१०-२६-१२. चैद्यस्यापि पक्षसमत्वेन नेदमुत्तरं स्यादिति भावः। एतेनाद्यश्लोकार्थ उक्तः।
भगवानित्यादिनाग्रिमाणाम। किञ्च। पूर्वं ज्ञानभक्त्योरपि हेतुत्वमङ्गीकृ-

---

१. येषां मू. पा.। २. यथाशास्त्रद्वयमित्यादिना मू. पा.।

योक्तम्, अधुना चाविर्भावनैव त अ यथासिद्धे इति मनगोर सर्वथा मुक्तिरित्याहु ज्ञानभक्तयोरित्यादिना ।

भगवतो नृपेयम, सर्वैश्वर्यसम्पन्न इत्याम्य निरपेक्ष इय तन प्र थन
१० २६ १४ भगशब्दार्थरत्व विवृत प्रकृतोपयोगि भवति ज्ञयम् ।

पाय श्रोगमि यत्र । न वतारसमये पूर्वोक्तभक्तनिमित्त पृथगाविर्भावाविर्ज्ञितोथवा तनैव तत्फलमा नमिति स दह निर्णयमाहु एकस्येति । उक्तस्यत्र तनैव
१० २६ १५ तत्फलसाधन न पृथक्त्वपक्षेयकस्यैवाविभावरणामयम्पन्न भवति । एकत्र विनियुक्तस्यान्यत्र विनियोगो न पायसिद्ध इत्याशङ्कानिरासाय 'निर्णायकन्यायमाहु' सयोगेत्यादि । यथा होम एव नियुक्ता जुह पर्णमयत्वगुणयोगा पापश्लोकश्रवणाभावमपि साधयति, न चेतदर्थं पृथक्सा त मयी क्रियते, यस्य पर्णमयी जुहूर्भवति न स पाप श्लोक शृणोती ति श्रुत्या होमार्थाया एव तन्मय्यास्तस्या फलफलमा यक र के, तथा प्रकृतेपि भूम्यादिक्लश यत्निमित्तकाविभावस्यैव तत्तद्भक्तयोगे तत्तत्फलमाधकत्वमिति न पृथक्तद पेक्षेत्यर्थ । अत्रेदमपि ज्ञयम । पुष्टिमर्यादाभेदेन द्विविधानामपि भक्ताना फलमाधन स्वशक्त्याकट्यपूर्वकमवतारेण पूर्णैकनैव स्वरूपेणैव[२] कर्तुं शक्यम् । तत्रापि केवल मर्यादामार्गस्थापनायाविभूतेन पुष्टिमार्गीयभक्तेष्टपूरण न क्रियते । एव केवलपुष्टिमार्गी येणाप्याविर्भावेन । अत एव दण्डकारण्यस्थर्षीणामिष्टपूर्तिर्न रामरूपेण कृता । श्रीमद्-गोकुलरूपेण च यमुनानीना ऽष्टिलीलानङ्गीकारात् । अग्रे मथुरादिषु प्रद्युम्नाद्यरूपेण लीलाकरणात्तत्तदनुरूप फलदानमिति । नित्य हरावियत्र स हि सर्वद खहरति । भावनाविषयत्वभावादेव न दु खम तमित्यर्थ । नित्यमित्यादिना तमर्थ विवृतम् । तथा स्फुरण उपपत्तिमाहु सर्वत्र भगवदावेशादिति । अतिविगाढभगवद्भावनाया देहेन्द्रियप्राणान्त करणजीवेष्वपि तदावेशात्तेषु तथा स्फूर्तौ तत्सम्बन्धिष्वपि तथैव भान मित्यर्थ । एतदेव जीव इत्यादिना विवृतम् । ननु प्रश्नोत्तर श्लोकाभ्यामेव सम्पन्नम्, अत नापि श्लोकेन स एवार्थ पर्यवस्यता यत कथन त्वयमित्याशङ्क्य तत्ता पर्यमाहु तादृशीमिति । एव बोधनार्थमित्यर्थ॰ ।

ता दृष्ट्व यत्र यास्त्रियदि । अ तर्गृहगता अनाकारिता एव नाद श्रुत्वोद्युक्ता इति प्रतिबन्धोभूदतिशङ्कानिरासायाहु या पूर्वोक्तास्ता अप्याहूता । तत्रो-
१० २६ १७ पपत्तिमाहु समागता इति । अ यथा तथा न स्यादितिभाव । गेहस्य देह सम्बन्धित्वात्तस्य नष्टत्वेननासा गृहाभावात्तत्र गमन वारितमिति न निवार्यते । दोपनिवा

• निर्णायक न्याय—मु. पा । २ स्वरूपेण मु प ।

रणार्थं प्रतिबन्ध इत्युक्तम् । यावद्भिर्गुणैर्भगवद्रमणं भवति तावद्गुणसम्पन्ना अन्यत्र विवाहतो रसशास्त्रोक्तरसविशेषोपयोगिगुणवत्यश्च याः समागतास्ता अपि यद्यपि न निवारयितुं योग्यास्तथापि स्थातुमशक्ताः सत्यः स्वतो नागताः किन्तु शब्दश्रवणे सति । तथा च तावानंशो निवारणीय इति शब्देनैव निवारणं कृतं, न तु हठात् । तदनङ्गीकारेण शब्दोपाधिकमागमनं चेत् स्यान्निवृत्तिरपि स्यादिति तदभावो ज्ञाप्यत इत्याहुर्या पुनरित्यादिना । एवं करणे हेतुमाहुरन्यशेषतयेति । एतेन भक्तिमार्गमर्यादा ज्ञापितेतिभाव । अपाकृता इति । अन्तर्बहिर्विसंवादो नागरीणां कदाचिद् भवेदपि, न त्वेतासाम् । व्रजसम्बन्धेनान्तरधर्मावरणासम्भवात्तथा चागमनं सर्वांशेनैव, न त्वन्यत्रापि केनाप्यंशेन हृदयं स्थापयितेतिभावः । एतासां निवर्तने यावत्स्वसामर्थ्यमुपयुज्यते तावत्पूर्णमत्र प्रकटीकृतवान्प्रभुरितिज्ञापनाय भगवानित्यादीनि प्रभुविशेषणानीति ज्ञेयम् । तेन त्यागिनीभावस्य महाचक्रवर्त्त्वं ध्वन्यते । तेन भक्तिमार्गोत्कर्ष एव भिष्यति । भावस्य भगवद्रूपत्वात्तदुत्कर्ष एवैवमपि पर्यवस्यतीति हृदयमाचार्याणाम् । नन्वत्र मोहने विशेष उक्तोन्यथा "मोहिता" इत्युक्तत्वेन पौनरुक्त्यं स्यात् । तथा च पूर्वस्मादाधिक्यस्य विशेषपदार्थत्वात्पूर्वस्य च भगवद्विषयकस्यैव तत्रोक्तत्वात्तद्गत एव विशेषो वक्तुं युक्तो न तु गृहादिविषयकस्य पूर्वमसत्त्वादित्यरुच्या पक्षान्तरमाहुः अथवेति । स्थूणानिखननन्यायेनेतिभावः । न च भगवद्विषयकमोहाद्विशेषो वक्तुं शक्यः, असम्भवात्, तथा सति गच्छेयुरित्याहुः अन्यथेति । ननु तच्छब्देन सर्वत्यागसर्वात्मभावाद्युक्तधर्मपरामर्शात्तस्य स्वत एव दृढत्वात्तथा सत्युभयविशेषणकथनप्रयोजनाभावाच्च नैतत्साधीय इति चेत् । सत्यम् । उक्तानुपपत्त्या प्रभुणा स्ववाक्यानां गमनार्थकत्वबोधनाच्चाय एव पक्षे तात्पर्यमस्तीति यद्यपि ज्ञायते तथापि स्वरूपस्य रसरूपत्वेन भावात्मकत्व यदुच्यते तत्तु तद्विरोधिवचनाविर्भावेनानुपपन्नमितिशङ्कानिरासाय तदविरोध्यर्थकत्वमप्युच्यते वाक्यानां तात्पर्यविषयत्वेन । एतदेवाहुरतोर्थत इत्यादिना । यतः स्थितावेव भगवत्तात्पर्यमतो हेतोरापाततः प्रतीयमानार्थप्रत्यायनान्निवारयन्नपि फलतः स्थित्यर्थकानीत्यप्युच्यन्त इत्यर्थः ।

भगवद्वाक्यसंख्यातात्पर्यमाहुः दशविधानामिति । सगुणनिर्गुणभेदेन दशविधानां तथा, नत्वेतासामिति भावः । एतासां वस्तुतो निर्गुणत्वेपि लीलारूपत्वेन प्रस-
१०-२६-१८. क्त्यभावेन तदभावोपि न वक्तुं शक्य इति तथा । तर्हि निषेधस्य कोपयोग. । क्षुब्धदध्नो नवनीतस्येव क्षोभकवाक्यैस्तथाभूताभ्यो हार्दप्रकटने प्रभुशुश्रूषार्त्तौ वाचनिक्या अपि प्रपत्ते सिद्धौ लोके सर्वात्मभावमार्गप्राकट्ये चोत्कटभावोद्दीपने रसपोषादिषु चेति बुध्यस्व । एतासु नायिकाभेदेन भावभेदो बोधनीयः, ते च कश्चिदेकरूपा , कश्चित्कदाचिन्मिश्राः,

कश्चित्कदाचिदुत्तरेणोपमर्दिताः, केचित्कश्चिच्चिर स्थिराः, केचित्किञ्चित्कालं, केचिदाशु नाशिन इत्येवरूपत्वं सत्त्वादिगुणेष्वस्तीति तद्दृष्टान्तेन बोधयितुं तावद्भिः श्लोकैरेना निवार्यन्त इत्याशयेनाहुः तमो रज इत्यादि। तथा सत्युपचारेण भावा एव तमआदिशब्दैरुच्यन्ते। तथा च तेषां भेदा यत्रैतादृश्यस्ता निरूप्यन्त इति सम्बन्धः। वस्तुतस्तु लीलामध्यस्थाः सत्त्वादयः प्राकृतेभ्यस्तेभ्यो भिन्ना एतासु सन्ति। यतः प्रभुसंगमविलम्बहेतोर्लयं कर्तुं प्रिये स्वसंगविलम्बासहिष्णुत्वहेतुभूतभावमु पादयितुमेतस्यैव पालनेन स्थैर्यं कर्तुं च समर्थाः। अत एवादौ तम एवोक्तं, ततो रजस्तत सत्त्वम्। एतदेवाहुः स्वान्तेति। स्वस्य तमआदेरन्त फलं लयादि। उक्तरीत्यैतद्गुणानां तत्र पर्यवसानात्तथा निरूप्यन्त इत्यर्थ.। प्रियं किमित्यत्र, अर्थादेतासामिति। स्वातिरिक्तस्य प्रश्नविषयीकरणादिति भावः। किञ्च। प्रियस्यानेकविधत्वे हि तेषां मध्ये किं करवाणीति प्रश्न संगच्छते। तेन तदनेकविधत्वं विवृण्वन्ति तत्प्रयोजनमित्यादिना। देशादिव्यवहितत्वमेवेशान् कामिते विशेषः। व इत्येकेनैव चारितार्थ्ये द्वितीयपदेपि तदुक्तेभिन्नविषयकत्व तस्यावगम्यत इत्याशयेन पक्षान्तरमाहुस्तत्रापीति। स्वामिनीष्वप्युक्तरूपसत्त्वादिभिस्तथात्वमस्तीत्येकैकविधाः प्रत्येकैकचरण[1] इत्यर्थः।

१०-२६ २० भ्रातर इत्यत्र, अदृष्टेत्यादिना प्रासंगिको लोकस्थित्या प्राप्तोर्थ उक्त।

१० २६-२१. दृष्टं वनमित्यत्राप्युक्ता गुणा पूर्वोक्ता ज्ञेयाः। स्थितिपक्षे गृहे न गन्तव्यमिति यदुक्तं तत्र हेतुमाहुर्यदि गृहगमनेत्यादि। सर्वं त्यक्त्वा वन प्रविष्टस्य तदपेक्षायामेव प्रायश्चित्तं कृत्वा तत्र गमनं स्मृतिवचनेन बोध्यते यत इत्यर्थः। प्रकृते तदभावान्न गन्तव्यमेवेति भावः।

१०-२६ २२. पतीन् सतीरित्यत्र, द्वितीयाबहुवचनान्यथानुपपत्त्याहुः पतिविशेषणं वेति। तथा च तेषामुपहासवचनमिदं भवति। यतो लोकव्यवस्थैतादृशीति तामुक्तवन्तः पूर्वजन्मनीत्यादिना। भवन्तश्चेति। जायमाना इत्यर्थः।

१०-२६-२४ भर्तुरित्यत्र, स्त्रीणामिति बहुवचनेन भर्तुरित्येकवचनेन च सर्वासां य एको भर्ता तत्सेवाविधानाद् भगवत एव तथात्वाद् भजनमेव[2] विहितं क्रियत इत्याशयेन स्थितिपक्षार्थमाहुः स्वभावतो जीवानामित्यादिना। अत्र बन्धुप्रजाशब्दाभ्यां तत्सखीभावपरम्परे उच्येते।

---

१ प्रत्येकैकचरण मू पा। २. तथात्वात्तद्भजनमेव मू. पा.।

दुःशील इत्यादिना क्रमेण यशऐश्वर्यवीर्यज्ञानवैराग्यश्रीविरुद्धा धर्मा उक्ता इत्याशयेनाहुः षड्दोषः स इतीति । स्थितिपक्षे स्वतोपि धर्मी दुष्ट इति पातकसम्बन्धोक्त्या ज्ञाप्यते । कदाचित्याज्यत्वेन *नित्यमभजनीय* इत्यपि तथा ।

१०-२६-२५

अस्वर्ग्यमित्यत्र, उपपतिसम्बन्धे दोषोक्त्या प्रभोश्च सहजपतित्वेन स्पष्ट स्थितिपक्षः । कुलसम्बन्धाभिमानवतीनामुक्त्या तत्र[1] तदभावादपि तथा ।

१०-२६-२६

प्रेष्ठं प्रियेतरमिवेत्यत्र, शानजर्थानुपपत्त्या पक्षान्तरमाहुः अथवा तस्यामित्यादि । भाषणेनैव सर्वतिरोधानमुक्तमिति पुनरपि तथैव चेद् भाषणं स्यान्न स्यादेव विशेषाभावादतः पूर्वविलक्षणमेतद्वाच्यम् । ततो[2] जीवन्मुक्तिसामर्थ्यं चात्र जातम्, अन्यथैतन्न स्यादिति वैलक्षण्यमेव निरूपितं तस्यामप्यवस्थायामित्यादिना । अत एव प्रतिभाषणमुक्तं मूले । औदासीन्यपूर्वरूपपूर्वभाषणविरोधिसहासभाषणाभिप्रायेण । तदर्थविनिवर्तितेत्यत्र, यदि त्यक्तोऽपीति । भगवदर्थं सर्वत्यागो भगवतोक्तः, पूर्वं त्यक्तार्थो परिग्रहोपि, यतः शुकादयोपि तथा चरन्ति, अधुना गृहपरिग्रहं वदति, एवं सति भगवदुक्तमिति गृहं चेद् ग्राह्यं, तदा तदविशेषात्सर्वत्यागपूर्वकं भगवानेव कुतो न ग्राह्यः, गृहस्यैव ग्रहणे विनिगमकाभावादित्यर्थः ।

१० २६ ३०

देवो यथेत्यत्र, अनङ्गीकार इति । अन्यत्र रागोत्पत्त्या विवाहिते रागाभाव उचित इत्यर्थः । यद्वा । द्वितीयस्यानङ्गीकार उचितः, न तु भर्तुरभजनमित्यर्थः । अनेन दृष्टान्तेन स्वस्य सर्वत्यागपूर्वकं भगवद्भजनेप्युपपत्तिरुक्तेति ज्ञापनायैवमुक्तमाचार्यैः । अन्यथा मूले प्रभुकर्तृकभजने दृष्टान्तोक्त्या विरोध स्यादिति ज्ञेयम् । स्वाप्ययेति आविष्कृतमिति भावार्थरूपतान्तम् । तथा च सुषुप्तिमपेक्ष्य तत्साक्षिरूपस्य भगवतः[3] सम्पत्तिर्ब्रह्मसम्पत्तिर्मोक्ष इति यावत् । तद्दानार्थं वा भगवत स्वाविष्करणमित्यर्थः । केचित्तु स्वयंप्रकाशब्रह्मस्वरूपज्ञानातिरिक्तज्ञानाभावकथनम्, श्रुतौ तु तयोरन्यतरापेक्षम्, तत्र विनिगमकमाहाविष्कृतं हीति । हि यस्माद्धेतोस्तत्तत्प्रकरण एव तदुक्तमित्यर्थ इति वदन्ति । एवमपि सति ब्रह्मस्वरूपाविर्भावस्यैवोक्तज्ञानाभावे निमित्तत्वान्न पूर्वस्माद्विशेषः । प्रथमवचनश्रवणानन्तरं चित्तवैयग्र्यममूदित्यग्रिमवाक्यानां व्युत्क्रमेणोत्तरदानमिति ज्ञेयम् ।

१०-२६-३१.

अस्त्वेवमेतदित्यत्र, एवमित्यस्य विवृतिः सर्वरूपेति । पत्यादिसर्वसेवारूपेत्यर्थः । एवमुक्तौ हेतुमाहुः अन्यत्रेत्यादिना । पत्यादिसेवाविधेर्भगवत्सेवाविधायकत्वोक्त्या त्वमेव सेव्य इति पक्षेप्युपपत्तिरुक्तेति ज्ञेयम् ।

१०-२६-३२.

---

१ —मुक्त्यात्र मू पा । २. यतो मू पा । ३ भगवत. । मू. पा. ।

कुर्वन्ति हीत्यत्र, स्नेहेन हीत्यादि । नियाया स्नेहसमानविषयत्वस्यो स-
गित्वादात्मन एव निरुपधिस्नेहविषय आह भगवान् इत्यर्थेन च तद्गामित्वात्
१० २६ ३३ त्वय्येव रतिं कुर्वन्तीत्यर्थः । अत्रोपाधिस्नेहकथनस्यायं हेतुः । भगवता हि
स्वातिरिक्ते स्वात्मौपाधिकी प्रीतिर्नास्त्येति पक्षमाश्रित्योक्तम् । स्वामि यत्तु नादिरीत्या
प्रतिवादिमतमङ्गीकृत्य[1] प्रोक्त्या तत्पक्षं निराकुर्वन्तीति न कश्चिद्दोषः । नित्यमिव इत्यत्र,
अन्यथा जारसेवापीत्यादि । ननु धर्मे वै विहितत्वस्य प्रयोजकत्वादत्र तदभावात् तथेति
चेत् । उच्यते । प्राग्ज मनि विवाहिते पुंसि जीवति पुरुषान्तरेण विवाहे दोषाकथनात्तत्र
जन्मावच्छेदकमिति वाच्यम् । एवं सत्येतत्समानयोगक्षेमत्वादितरस्यापि तथात्वं सुवचम् ।
न च तत्र पतित्वाभावान्न तथेति वाच्यम् । 'स वै पतिः स्यादकुतोभयः स्वयं' 'जीवच्छवं
भजति कान्तमतिर्विमूढा । या ते पदाब्जमकरन्दमजिघ्रती स्त्री'त्यादिवाक्यैः कालभयवति
पतित्वाभावेनोभयोस्तुल्यत्वात् । एवं सति पतिभजनं विदधच्छास्त्रं हरिसेवामेव विधत्ते ।
प्रभोर्दुरापत्वेन व्यवहारनियमार्थं परं तथा स्मृत्यादिषु कथनमिति भावः । अत एव वाग्दत्तापि
कन्या ततः श्रोत्रियः सुपात्रे तस्मै दीयते न पूर्वस्मै । वरदेश्वरेति सम्बोधनेन
व्यञ्जितमर्थमाहुरतो वय क्रिया इत्यादिना ।

सिञ्चाङ्ग इत्यत्र । अत्र सिञ्चनस्यावश्यकत्वे हेतुरुत्तरार्धेनोच्यते । तत्रापि याम इति
वर्तमानप्रयोगेण स्वजीवनस्य क्षणमात्रमपि तद्विलम्बासहिष्णुत्वं ज्ञाप्यते ।
१० २६ ३५ एवं सत्येतत्कालीन जीवनमुक्तिश्च प्रियकृतस्वसम्भाषणजनितमेवेत्यन्यथा
नुपपत्त्या कल्प्यते । यद्यप्युत्तरदानसमये न तदस्ति, तथापि, पूर्ववचनानामुत्तरदानार्थमेव
हृदि स्थापितत्वात्तदनन्तरं तदभावे सति चेन्मामाश्रुभादानमतो भाषणमपि वा न भवे-
त्तदोक्तैर रीतिर्भविष्यतीति हृदि कृत्वा पितुश्चरणरक्तं वयमित्यारभ्य वक्तव्यमित्यन्तम् ।
नो चेद्वयमित्यत्र, हरेणैव दग्ध इत्यादि । विरहाग्निपदमनुक्त्वा विरहपदं यदुक्त-
वत्यस्तज्ज्ञापितं भावविशेषमाहुः स विपरीत इत्यादि । अयमग्निः पूर्वोक्तः । तथा सति
पुनरुक्तिर्न स्यात् । तथा च पूर्वस्मादस्य कठिनत्वं वाच्यम् । तदाहुर्नामृत्युपत्या । हर-
दग्धः कामोऽप्यनरस्थोप्यग्निः । उत्तामृतेन जीवेदपि । अनेन तु दग्धः क्षणेनैव भस्मसाद्भवति
पदार्थः, पुनर्जीवनाशारहितश्च । उक्तरूपदाहकर्तृत्वाचकपदस्थवर्णवैपरीत्येनैतद्वाचकपदस्थ-
वर्णयोस्तद्वाच्ये तद्विपरीतधर्मोऽपि लभ्यते । सोऽस्माभिरुक्तोऽनेन नित्यादिना । एवकारोप्यर्थे ।
तथा चोक्तरूपदाहकर्त्रा हरेणापि दग्धो यत्र कामोऽधुनापि न जीवति, तत्रोक्तरूपेण दग्धाः
कथं पुनर्जीवेयुरिति भावः । पूर्वं सिञ्चनेन[2] जीवनकर्तृत्वस्य तस्योपि तद्विपरीतो धर्म उक्त इति

१—मत्यङ्गीकृत्य मू पा । २ सेचनेन मू पा ।

प्रभुत्वरूपमेवात्र स्वहःपदेनोच्यते । तत्स्वत एव समर्थं, तत्रापि कोटिकन्दर्पाधिकलावण्येन विभावानुभावादिसामग्र्या च विशिष्टे किं किं न कुर्यात् । एतदेवोक्तं **तत्रापि विशिष्टो विरह** इत्यनेन । लोकप्रसिद्धमर्थमाहुरे**कान्ताभावे**ति । ननूक्तरूपत्वे कदाचिदपि सुखदत्वं न स्यादित्याशंक्य श्लिष्टार्थकोयं प्रयोग इत्याशयेनाहुरनेन **त्वये**त्यादिना । स्वरूपस्यैव विरहत्वमित्यर्थः । [illegible] भाव । ततः काष्ठात् । [illegible] ते । तेन सोपधिस्नेहे स्वनैवंभाव इति भावः सूच्यते ।

यर्ह्यम्बुजाक्षेत्यत्र, तद्विशेषणोक्तितात्पर्यमाहु**रस्माभिर्विचारित**मित्यादि । 'भगवान्
१०-२९-२९. ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया । तदध्यवस्यत् कूटस्थो रतिरात्मन् यतो भवे'दितिवचनादर्थं विचार्य निर्दोषपूर्णगुण एव सेव्यः । स च भगवानेव । स च निर्दोषेणैव सेवितुं शक्य इति निश्चित्याधिदैविकाध्यात्मिकदोषानप्यपहाय त वत्र इति तथा । **अरण्यजने**त्यत्र । ननु पाञ्चन्यस्यागोत्यैवान्यसंगस्यागोप्युक्त एवेति **तेनापी**ति ग्रन्थो न युक्त इत्यत आहुः **संगाभाव एवे**ति । पूर्वं दोषाभाव उक्तोऽधुना प्रीतिहेतुर्गुण उच्यते इति न तथेति भावः । अत एव मूले प्रीतिरुक्ता । अन्यपदार्थमाहुः **सर्वथे**ति । **तद्धर्मे**ति । भगवद्भावप्राकट्यादित्यर्थः । **सर्वदैव स्वप्न** इति । पूर्वमपि रमणपक्षे तस्य गोप्यत्वादेवमुक्तमिति ज्ञेयम् ।

वीक्ष्यालकेत्यत्र, **चतुर्विधो मोक्ष** इत्यादिना पुरुषार्थत्रयविवरणम् । अत्रालका-
१०-२९ ३९. वृतादिपदैर्मोक्षादिनिराकरणोक्तेरयमाशय । मूले हि प्रभोरङ्गान्येवोक्तानि दासीभवनहेतुभूतेक्षणविषयत्वेन । तथा च दृशा वीक्ष्येत्येतावतैव चारितार्थ्येपि यत्प्रत्यङ्गनिरूपणं, तत्रापि भूषणानां, न साभिप्रायमिति स निरूप्यत इति । **सारूप्यमिवे**ति । सारूप्यमुक्तिमिवेत्यर्थः । अत्रालिसारूप्यवदलकैः सारूप्यमुक्तिमन्तो भक्ता लक्ष्यन्ते । केशा बद्धा अपि भवन्ति, न त्वलकाः । इतोपि तथा । 'मत्सेवया प्रतीतं च' 'सालोक्यसार्ष्टि-सामीप्ये'त्यादिवाक्यैश्च तासां चतुर्विधानामपि दास्यान्न्यूनत्वं सिद्धम् । तत्रैतद्रसप्राप्त्यभावा-देतस्य च ततोधिकत्वादि तद्वरणम् । अत एवात्रापावरणरूपत्वमेवोक्तम् । नह्यन्त स्थितिं विना परितः स्थितिमात्रेण रसपानमलीनां सम्भवति । मुखस्याम्बुजत्वमप्येतेषां रसपानाभावज्ञापनायैव नोक्तम् । किञ्च, कमलं हि न पेयमपि तु तत्स्थो रसस्तथा न तदास्यं[1] किन्तु स्वयमेव रसात्मकमित्यपि ज्ञापयितुं तत्त्वं नोक्तमिति ज्ञेयम् । बहु-भिरावरणात्महारस्त्वं व्यज्यते । किञ्च । लीलया नादस्य वा श्रवणेन पूर्वं जनितो यो

1. दास्यं मू. पा. ।

भावः स एतद्दर्शनेन पुष्टः क्रियते । प्रचुरतर्लयो विविधरसभावोत्पत्तिश्चेति स्थितिन्यो-त्पत्तिकर्तृवाचकरूपगोत्मकनाम्ना सूच्यते । अतो युक्तं दासीभवनमिति भावः । रसेषु-रसिका यादिनोक्ताधिकारवतीना दये दास्ये सुख स्वाधीनं भवतीति तन्त्रोपभूतानामनङ्गीकारः सर्वत्र । गण्डस्थलेत्यत्र, स्थले हीति । एतज्ज्ञापनायैव स्थलपदम्, अन्यथा नोक्तं स्यादिति भावः । भुजदण्डयुगमित्यत्र, उभयत्रेति । इन्द्रादीनां भयदैरपि दैवै-र्भगवच्छासनमनुल्लङ्घ्यमित्यैहिकानिष्टनिवर्तकः । देवानामपि तत्तथा । यज्ञाकरणे द्विजा-न्दण्डयत्येव यनुल्लङ्घ्याज्ञत्वेन मुक्तिहेतुभूतशुद्धिजनकहविर्दानेन पारलौकिकसुखप्रद इत्यर्थः । हविर्दानेन परलोकसाधने विशेषमाहुः तत इति । भगवत्क्रियाशक्तिरूपवैदिकक्रिया-सम्बन्धहविर्भोगादित्यर्थः । सर्वथा अन्तःकरणस्थानामपीत्यर्थः । (भुजदण्डावित्यनुक्त्वा द्वित्वसंख्यावाचिपदमेकवचनान्तं यदुक्तं तत्राय भावः । द्वयोः पृथक् प्रतीतौ ह्यपेक्षाबुद्धिः । तया च द्वित्वम् । प्रकृते चाश्लेषदशायामुभयासुभयोरेकवत् प्रतीतिः । सा च न स्वाश्लेष-समये सम्भवति, किन्त्वस्याः । तथा च तादृग्दर्शनं भावोद्बोधकं भवत्येवेति । तथापि द्वयपदमनुक्त्वा युगपद यदुक्तं तेन युगस्वभावो यथा न निवर्तयितुं शक्यः केनापि, तथा भुजदण्डयोरप्येकवचनसूचितार्थलक्षणः स्वभावो न मर्यादाशास्त्रादिभिर्निवर्तयितुं शक्यो भवति च । तथैवेति ज्ञाप्यते । तेनास्माकं दासीभवनमावश्यकमिति ।)

का स्त्र्यङ्ग ते इत्यत्र, भगवत्साक्षात्कारे सति मोहासम्भवमाशङ्क्याहुः तेषां चलमिति । मर्यादामार्गीयभगवद्धर्मस्यापि पुष्टिमार्गीयास्ते बलिष्ठा इति भावः ।

१० २६ ४० आर्यचरितादित्यत्र । नन्वार्या हि श्रेष्ठाः, ते च भक्ता एवेति तच्चरितमेव सर्वत्यागपूर्वकं भगवद्भजनमिति कथमेतत् कथनं युज्यत इत्याशङ्कानिरासायार्यपदार्थमाहुः प्रमाणमार्गविवेकिन इति । ननु विभाडितभजनं हि प्रमाणमार्गे, भगवान् सर्वात्मक इति 'गोपीनां तत्पतीनां चे'त्यग्रे वक्ष्यमाणत्वाच्च तत्र हीयते, अधिकं परं सम्पद्यत इति नैवापपत्तिरित्यत आहुः प्रमाणे हीत्यादि । तन्मार्गे हि पतित्वादयो धर्मा देहनिष्ठा एव । अतस्तद्भजनेनोपस्थितस्तद्भजनविषयो न भवति । 'यावद्वचनं हि वाचनिक'मिति न्यायात् । एवं सत्ययं मार्गो वस्तुविचारं न सहते । न च विहितत्वेनैवोत्तमता, निषिद्धत्वेनैवाधमतेति वाच्यम् । 'शुद्ध्यशुद्धी विधीयेते समानेष्वपि वस्तुषु'ति भगवद्वाक्यविरोधात् । न चैतद्विरोधपरिहारात्तत्र कर्तव्यमिति वाच्यम्, प्रमेयमार्गस्य स्वतन्त्रत्वेनैतस्माद् बलिष्ठत्वेन चैतद्विरोधस्याप्रयोजकत्वात् । अन्यथा प्रेममार्गोच्छेदापत्तिः । एतदेवोक्तं प्रमाणे हीत्यारभ्य न दूषणमित्यन्तेन ग्रन्थेन । ननु प्रमाणमार्गीयाणां प्रमेयमार्गीयाणां च मिथो भेदात् प्र-माणमार्गो न प्रमेयमार्गीयं विषयीकरोति, यागविधिर्यतिमिव, अतो न विरोध इति चेत् ।

स्यादेवं यदि प्रमेयमार्गेपि विधिः स्यात्, यत्याश्रम इव। तथा सत्यधिकारिविशेषणमहिम्नैवान्यस्याप्राप्तेरविरोधः स्यात्। प्रकृते च प्रभ्वनुग्रहैकलभ्यत्वेन विध्यभावाद्वर्णाश्रमविशेषाधिकारेण प्रवृत्तं वाक्यं न संकुचितुमर्हति। बाधकाभावात्। अतस्ततोन्यथाकरणे विरोधो दुर्निवारः। प्रमेयमार्गप्रामाण्यं तु 'धर्मव्यतिक्रमो दृष्ट' इत्यादिना 'यः श्रुत्वा तत्परो भवे'दित्यन्तेन शुकवाक्येनैव वक्ष्यत इति सर्वमनवद्यम्।

व्यक्तं भवानित्यत्र, ननु यथार्तौ सत्यामपीयदवधि तत्र स्थितम्, तथा-
१०-२९-४१. धुनापि स्थेयमित्याशङ्कानिरासायाधुनातिहरत्वोक्तितात्पर्यमाहुः इदानीं यथार्तिरिति।

इति विक्लवितमित्यत्र। अत्र षड्भिः श्लोकैः रमणं स्वकार्यसहितं निरूप्यते।
१०-२९-४२. तत्र संख्यातात्पर्यमाहुः षड्गुणैश्वर्येति। अत्रायं भावः। भागवते हि परमकाष्ठापन्नं वस्तु भगवच्छब्देनोच्यते। तस्य च षड्गुणवत्त्वमर्थः। प्रकृते च रमणमुच्यते। तच्च विविधभावसाध्यम्। ते च निर्विकारे ब्रह्मणि न सम्भवन्तीति मायया प्राकृतगुणसम्बन्धादेतत्कृतमिति कश्चिद् बहिर्मुखः शङ्केत, तन्निरासो रमणनिरूपकश्लोकसंख्ययैव रमणस्वरूपनिरूपणेन क्रियत इति। एतदेवाहुः षड्गुणैश्वर्येत्यादिना। षड्गुणे यो भगवत ऐश्वर्यभावः स्वामिभावः। रमणे यदा यस्य गुणस्योपयोगस्तदा तत्प्राकट्यकरणेन रेम इत्यर्थः। न तु मायाद्यधीनत्वेनेति भावः। अत एव स्वयं पदम्। अन्त्येन श्लोकेन तिरोधानोक्त्या विप्रलम्भोपि निरूपितो भवतीति पूर्णो रसोत्र निरूपितो भवतीत्याहुः स्वरूपेणापीति। विशेषतो लक्षणानि स्वप्ने वाच्यानीति भावः। वाक्यार्थानाहुः सामान्येत्यादि। विशेषरमणं बाह्याभ्यन्तरभेदेन द्विविधमिति। द्वितीयेन बाह्यं तदुक्तमित्याहुः विशेष इति। तृतीयेनान्तरम्। अजातस्मरकेलिजातस्मरकेलिभेदेन द्विविधा विलासा इति द्वाभ्यां तदुक्तिः। ननु नायिकामानापनोदनं चाटुकारिरक्त्वैवं कथं कृतवानित्यत आहुस्तात्पर्यं नायं लौकिकेति। एतच्च श्लोकविवृतौ स्फुटीभविष्यतीति तथा।[1] तदैव स्वरूपमेवेत्यारभ्य वचः स्फुटमित्यन्तग्रन्थस्यायं भावः। प्राकृतपुरुषस्येव स्त्रीप्रेक्षणादिभिस्तदा सञ्जातः कामश्चेत्स्यात्, तज्जनितश्चाङ्गादिविकारः स्यात्, तदा प्राकृतस्येव तन्नाशोपि स्यात्। न चैवम्, किन्तु 'रसो वै स' इत्यादिश्रुतिभिः स्वरूपमेव रसात्मकमिति रसशास्त्रसिद्धा यावन्तो भेदास्तत्सर्वरूपं स्वरूपमेवेति तादृशमेव पुरुषोत्तमस्वरूपमिति नानुपपत्तिः काचिदिति। यथा दैत्यान्प्रति वीररूपेणैवाविर्भावः, तेषां तथैवाधिकारात्, तथात्रैवमाविर्भाव इति हृदयम्। हासस्य मोहकत्वेनाधुना तत्प्रयोजनाभावमाशङ्क्य

१. स्फुटीभविष्यति। तथा तदैव मू. पा.।

तदाहु तासां यथे यादि । हासे प्रकर्षोयमेव । सत्याङ्गीकार एव हास्यसम्भव इति तथा । अन्यथाक्तरूपेण सम साम्याभावाद्रसो न स्यात् । सत्यत्वभावादेव न स्वस्माद्भिन्नतया गणना । सा तु मर्यादायामङ्गीकारे भवति । तथा सत्येवमूतानामपि मर्यादाया पातने भक्तिमार्गमर्यादानाशः स्यात । तदेतदुक्त नाशनार्थं न यन्तेन । उक्तागतेनदुक्तनापात् । उक्तनापदर्शनेनैव तदुद्धरणार्थं दया । तथा च हासनैव तापनाश सूचितो भवति । अन्यथा रसाभासहतुत्वेन ता न वदेत् । अथवा । मूल सदय रेम इति सम्ब ध । इद हि रमणममृतरूपेमादावुक्त सामा यन्त्य च । अतोत्र न पूर्णरसदान, कि त्वपे । तेन न भगवत्समान सामर्थ्यमधुनास्ती यभिरक्रियाशक्त्याविर्भावन नायिकानामुपमर्दन रसनाशः स्यादिति, तदभावाय दयोक्ता । यद्यप्येव रस पुष्टो न भवति, तथापि रसाभासभावा भासैर्मु यो रस. पोष्यत इत द रमणमतिमरमपोपायोपयु यत । अत एवाभासे तापापनोदनार्थं सामा यनोगमाद्दे युरमाचार्य ।

([1]प्रिया सर्वोपि सेवेत्यत्र, भगवतो भक्ता चास्मिंश्च लौकिककामाभाव माहुः प्रिया सर्वोपीति । अयमर्थः । लोके रससम्बन्धिनी क्रिया लौकिककामविषयिण्येव प्रसिद्धेति भगवच्चेष्टायाश्च तत्सजातीयत्वा कामापि लौकिक एव भविष्यतीति कस्य चित्त तस्याशङ्का वारयितुमाहु पर काम इति । लौकिक कामो न विद्यत इत्यर्थः । ननु भगवान् पुरुषोत्तम इत्यस्तु नाम लौकिककामाभाव, एतासा लौकिकत्वात्तत्त्वमस्त्विति चेत्त आहुः तासा कामस्येति । अयमर्थ । यदि भक्ताना लौकिक कामः स्यात्तर्ह्यलौकिकेन भगवत्कामेन पूर्णा न स्यात् तयो परस्परमेकजातीयत्वभावात्, विजातीयेन विजातीयस्य पूरणासम्भवात् । अतो भगवत्कामेनैव तासा कामस्य पूर्तेर्भगवत्तुल्यत्व तासामपीति ज्ञापनायोक्त तासत्वयेति । यथा भगवानप्रकृत लौकिककामरहितस्तथैवेत्यर्थः । अन्यथा भगवत पूर्णरसास्वादो न स्यात्, पूनाधिकत्वेन भावैजात्यात् । ननु कामो न विद्यत इति कथनाद्भगवति तत्सम्बन्धाद् भक्तेषु गोमयविषयकामाभाव एवास्त्विति चेत् । न । पञ्चमाध्यायोक्तकारिकाविरोधात् । तत्र लौकिकनिषेधपूर्वकमलौकिकस्य भगवति निरूपितत्वात् । तथा हि । 'अत्रैव लोके प्रकटमाविर्देवित्युत्तमम् । कामाय मुक्तयुक्तः भुक्ते न चापर' इति । अत्र कामपरस्य अलौकिकत्वानतवतिशयस्य प्रकाशोक्त तत्कथयालौकिकस्यैव तस्य निषेधः, न त्वलौकिकस्यापि, अतो भगवद्भाग्यास्वपि तथैव, अन्यथा भगवतो भोक्तृत्वमेव न स्यात् । तस्मात् सुष्ठूक्त तास्तथेति । विपक्षे बाधकमाहुः

---

[1] 'अत्र कामिवाच्य ... पाण्डुलमन ... श्रीगोकुलनाथानां ... लौकिकोयमिति ... ।

कामेनेति। प्राकृतेनेति शेषः। तादृशस्य संसारजननावश्यकत्वात्, प्राकृतेषु सर्वत्रैव तथा दर्शनात्। अन्नत्यभक्तेषु संसाराभावात्प्राकृततदभावो निःसन्दिग्ध इति ज्ञापनायोक्तं **न संशय** इति। प्राकृतताभावे हेत्वन्तरमाहुः **अतो न कापीति**। यतोऽस्य भावस्यालौकिकत्वम्, अत एव मर्यादामार्गीयमोक्षेच्छूनामपि प्रवृत्तिर्न बाधितेत्यर्थः। मोक्षमार्गे कामाभाववतामेवाधिकारात्। तथा च श्रुतिः 'श्रोत्रियस्य चाकामहतस्ये'ति। तस्माद्यस्य भावस्य प्राकृतत्वं स्यात्, तदा तत्कृतलीलाया अपि तथात्वात्तच्छ्रवणे लौकिककाव्यादिवत् कामोद्बोधात्तेषामेतल्लीलाश्रवणस्य विपरीतफलकत्वात् प्रवृत्तिर्न स्यादित्यर्थः। चकाराद् भक्तिमार्गीयापि मर्यादा न भग्नेत्यर्थः। तस्मादस्य भावस्यालौकिकत्वात्तेषामेतल्लीलाश्रवणे फलमुखां प्रवृत्तिमाहुः **अत एतच्छ्रुताविति**। एतल्लीलाश्रवणेन लोकः सर्वोऽपि साधारणोऽपि लौकिककामरहितो भवेत्। नन्वेतादृक्श्रवणमात्रेण कथं लौकिकतदभाव इति चेत्तत्राहुः **भगवच्चरितं सर्वमिति**। वस्तुस्वभावादेवेत्यर्थः। यद्वस्तु यादृशं भवति तत्स्वनिष्ठमपि तादृशं करोति। एतल्लीलाया लौकिककामराहित्यादलौकिकत्वप्रतिपादकत्वादेतत्परोऽपि लौकिकतद्रहितः सन्नलौकिकनिर्हेतुकभगवद्भावयुक्तो भवतीत्यर्थः। श्रवणं तु लीलातात्पर्यावधारणपूर्वकं, न तु यथाकथञ्चित्। अतः **कामस्येति**। यत इयं लीला लौकिककामरहिता, अत एतच्छ्रवणेन लौकिककाव्यश्रवणवन्न लौकिकतदुद्बोधः। ततः कारणात् 'कामं हृद्रोगमाश्वपहिनोत्यचिरेण धीर' इति शुकवचनं स्फुटं स्फुटार्थमित्यर्थः।)

अतो न कापीति। मोक्षफला मर्यादा, कामे सति न मोक्षः, तदभाव एव सः इति लक्षणापि न भग्नेति सम्बन्धः। [1]तथा च श्रुतिः मोक्षरूपब्रह्मानन्दप्राप्तौ 'श्रोत्रियस्य चाकामहतस्ये'ति[1]। तत्रोपपत्तिमाहुः **अत एतच्छ्रुताविति**। ननु कामलीलाश्रवणेन लौकिकभावोत्पत्तिर्लौकिकस्यावश्यं भवतीति विपरीतं प्रयोजनं स्यादित्यत आहुः **भगवच्चरितमित्येकं** श्लोकम्। वस्तुस्वभावादेवाद्भुतकर्मत्वाच्च प्रभोरेतच्छ्रवणे तदुद्बोधो नेत्यर्थः। यतो न भवत्यत एव शुक एतल्लीलाश्रवणादिफलं कामाभावमेव 'काममपहिनोती'ति प्रकटमेवाह। यद्यपि हृद्रोगमपहिनोतीत्येवमेव वाच्यम्, तावतैव चारितार्थ्यात्, तथाप्युक्तलीलास्वरूपं ज्ञापयितुं स्फुटमाहेत्यर्थः।

उदारहासद्विजकुन्देत्यत्र, **कुन्दत्वं स्नेहस्येति**। काममात्रपर्यवसायी स्नेह इति ज्ञापनार्थमित्यर्थः। कुन्दानां रसमात्रोपयोगित्वादिति भावः। अयमत्र
१०-२६-४२. भावः। स्वामिनीनां सदा निरुपधिस्नेह एव चेत्स्यात्तदा खण्डितादिभावासम्भवेन पूर्णरसभोग उभयत्रापि न सम्भवतीति निरुपधि तासामाच्छाद्य कामोपाधिकत्वं सम्पादितवान्, नैतावता भक्तिमार्गे हीनता। आद्यप्रवृत्तेर्निरुपाधिकत्वाद् भगवता स्वानन्ददा-

---

१...१ इदं मूले नास्ति।

टि० ११

नार्थे स्वयमेतदभावजननादिति । तर्हि कामनिवृत्तौ तन्निवृत्त्यापत्तिरित्याशङ्कानिरासो दीधितिनिरूपणेन कृतः । स्नेहरूपदन्तेषु दामिरचरोत्तरमेकरूपेण प्रकाशमानत्वमेव । एतमेवार्थं परोक्षेणाहुः तथा सतीत्यादिना । ननु भगवानेतत्प्रार्थनया रमते, न तु स्वयं विनैव प्रार्थनाम् । तथा सति स्वामिनोऽपि यदवधि यावान्भाव सम्पादितोऽस्ति तत्पूरणमेवोचितम्, न [1]त्वधिक(संपादन)म, प्रयोजनाभावात्, तावतैव श्रोतॄणां कामदोषनिवृत्तिसंभवादुदारहासादिकरण कुत इत्याशयेन यद्यपीत्यादिनाशङ्क्यात्र भगवदिरसाया एवोपकान्तत्वात्तदनुरूपसर्वसामग्रीसम्पादनमावश्यकम् । अत एव न पूर्णमनोरथ इवौदासीन्येनैतत्सन्तोषार्थमेव रमते । तथा सति रमणस्वरूपाभावेनैतत्सन्तोषासम्भवप्रसंगः, किन्तु लौकिकनायकवद्विकारयुक्त । एतज्ज्ञापनायैव मूले दृष्टान्तोपयुक्त इति तत्समाधानमाहुस्तथा पीत्यादिना । कलङ्कवत्त्वोक्त्या प्रकृते विकारभावत्व सूच्यते । स यथा पूर्णोऽप्यपूर्णो भवति, पुनः क्रमेण पूर्णोऽपि, न तु सदा पूर्ण एव, तथात्रापीति ज्ञाप्यत इति भावः । **पन्थातिरिक्ताः गत्वा इति** । स्वामिनीनामुडुस्थानीयत्वात्तेषामेवात्र स्वोक्त्यावरणस्य[2] च बहिः परित स्थितिनियमेनात्रापि बाह्या एव लीला उक्ता भवन्तीत्यर्थः ।

मालामित्यत्र । प्रकरणाद्रसपोषार्थं गामवेत्य चरणमपि तदर्थमेवेत्याशयेनाहुः

१०-२६ ४५ **एषा हि गतिरिति ॥ इति षड्विंशोऽध्यायः ॥**

सप्तविंशाध्यायार्थनिरूपणाय पूर्वाध्यायोक्तानर्धानतात्पर्यवर्णने, **पुष्टो यथा-**
न्तरित्यादि । अत्रायं भावः । संगमे स्वामिनीभिरमार्थं नवो नवः प्रयत्नो
१० २७-०. भाव्यते, न तु पूर्वानुभूतो रस पोष्यते । सर्वेषां तेषां स्वतन्त्रत्वात् । संयोगे यथा यथा रसानुभवाधिक्यं, तथा तथा विप्रयोगे दुःखाधिक्यमित्यनुभवसिद्धम् । एवं भावे संस्कारमात्रशेषस्य पूर्वरमस्योपमर्दकाग्रिमसंगमरसाभावेनान्तरेवाग्निपुष्टो भवति तथा, यथा पूर्वानुभूतलीलास्वरूपा मक्ता देहेन्द्रियप्राणान्तःकरणात्मानो भवन्ति । किमुत । अत एवाभावहमित्यादिरूप ज्ञानं तथैव क्रिया च भवतः । एतदनन्तरं जाते संगमे पूर्वसंगमादधिकरसवस्फूर्तिर्भवत एव । अन्यथा संगमत्वाविशेषेण तदनुपपत्तेरिति दिक् । यद्यपि संगमोत्तरकालीनविप्रयोगमात्र एवैतादृशत्वं सम्भवतीति नान्तःप्रवेशापेक्षा तथाप्येतद्विप्रयोगस्यातिविषमत्वेन क्षणमात्रेणैवान्यथास्फरण एतद्रसदानं नोपपद्यत इति रसात्मकत्वात्स्वरूपस्य स्वयमेव प्रविष्ट इत्याहुस्तदर्थ **भगवानिति** । **चत्वारोऽत्रेति** प्रियप्राप्तिसाधनानुष्ठानरूप तद्रसस्वभावप्राप्त गुणगानं चतुर्थोऽर्थः । **रसासक्तिरिति** । रसासक्त्यादित्रयमस्मिन्नध्याय उच्यते । एता हि रसासक्त्यैवान्वेषणपराः, अन्यथा गृहानेव

१. त्वधिक सम्पादनम् मू. पा. । २ —तेषाम वरस्वोक्त्यावरणस्य मू. पा. ।

गच्छेयुः । एवं सति यदैव बहिः संवेदनं तदैवान्वेषणमिति तदुक्त्या रसासक्तिरेवोक्ता भवतीति तथा । अग्रे स्पष्टम् । उक्तार्थत्रयनिरूपणे प्रकारविशेषमाहुः उद्देशत इत्यादि । आद्यैस्त्रिभिस्त्रयाणामुद्देशः कृतः । अन्वेषणं रसासक्तेर्लक्षणमसाधारणो धर्मोनुमापक इति यावत् । लीलया एतदन्तःस्थित्यनुमापक एतासु तदाविर्भाव । गर्वाभावज्ञापकं सपत्नीभाग्याभिनन्दनादिकम् । अन्वेषणफलं च पददर्शनम् । लीलावेशफलं प्रियाधीनत्वस्वानधीनत्वदर्शनेपि प्रिये दोषारोपाभावपूर्वको 'रेमे तथा चे'त्यादिनोक्तो भावः । गर्वाभावफलमितरविस्मृतिपूर्वकं तत्प्राप्त्यर्थकः प्रयत्न.[1] ।

१० २७-१. करिण्य इवेत्यत्र, तथात्र काल इति । अवतारसम्पूर्तिकाल इत्यर्थः ।

गत्यानुरागे यत्र, अतःस्मितेन मन्दहासेनेति । अन्यथा प्रकृष्टोदारहासस्यैव
१० २७ २. पूर्वमुक्तत्वादधुना स्मित न वदेदिति भावः ।

गतिस्मितेत्यत्र, भगवति स्वधर्मानिति । स्वगतौ प्रियगतिभावना जातेति
तथा । भगवद्धर्मेष्विति । भगवत एतासां च मिथो वैलक्षण्यं गत्यादिषु
१०-२७ ३. सहजम । अधुना तु भगवद्गत्यादिवदेव गत्यादि, संस्थानविशेषोपि तथा, न
तु प्राग्वत् । तथा च तद्भावापन्ना मूर्तिर्जातेत्यर्थः ।

गायन्त्य उच्चैरित्यत्र, प्रथमतो मिश्रभावादिति । सुप्तप्रबुद्धन्यायेन
बहिःसंवेदनासंवेदनाभ्यां संगमविरहविषयकसमूहालम्बनज्ञानं जनितमिति
१०-२७ ४ तथेत्यर्थ । ननु प्रभोरानन्दरूपत्वेन तद्भावेषु सत्सु सदानन्द एवोचितो, न तु वक्ष्यमाणावस्थेत्याशङ्काभावाय तस्याः स्वरूपमाहुः शब्दो हि धूमवदिति । अत्रेदमाकूतम् । एतावत्कालपर्यन्तं भगवता स्वरूपानन्दो न प्रकटित । तस्य स्वरूपात्मकत्वेन तत्प्राकट्यं विना तदनुभवासम्भवात् । 'तथा परमहंसाना'मिति[2] वाक्यात् । यादृशेन भक्तियोगेन तत्प्राप्तिस्तादृक्प्रकटनायाधुनैव पुरुषोत्तमावतारात् प्रभुप्राकट्यानर्थक्यापत्तिभिया श्रुत्याद्युक्तसाधनसाध्यत्वं स्वरूपानन्दस्यैतत्साधनभक्तियोगस्य च न वक्तुं शक्यम् । अत एव 'कुन्तीभि पूर्णसाधनवतामप्ययं दुर्लभ इति ज्ञापनायैवाधिकारिविशेषणान्युक्तानि । एवं सति स्वरूपस्य रसात्मकत्वेन अत्रत्या भावाः सर्वे रसात्मका एवेति मन्तव्यम् । अन्यथैतच्छ्रवणमात्रेणापि स्नेहोत्पत्तिर्न स्यात् । एवं सति तद्वार्तानभिज्ञस्य तवेयमाशङ्का कण्टकवेधदृष्टान्तेन कामिनीकुचकुम्भे नखवेधस्यापि दुःखहेतुत्वसाधनमनुहरतीत्यलमुक्तया ।

---

१. तत्प्राप्त्यर्थकप्रयत्न मू. पा.

२. तथा परमहंसानां मुनीनाममलात्मनाम् ।
भक्तियोगवितानार्थं कथं पश्येमहि स्त्रिय ॥ भा. १-८-२०

एवं सति नायकत्वेन विरोधोऽपि । स यथार्द्रचर्मनिष्ठमपि रसं नाग्नेः प्रकटीकृतत्वादनेन प्रतिबन्धात्तत्सामर्थ्यं पुनरेव जनयति, तथायं भगवानपि बहिःसंवेदनेन न सर्वं तदा ¹तिरोधानास्फूर्तिरिति नायिकात्वेन न दशा तत्र जात । यदि सर्वदानावे तिरोधानास्फूर्तिरिति यावानंशस्तस्य नाशः गोत्रादिसम्बन्धात् । कन्यर्थेऽपि पूर्वत एव दृष्टं क्षणमात्रेण सर्वं सम्यगनुभवेदय । तथा सर्वस्यापि सुखं गानस्य शब्द एव । एव संयधीपत्निदारतुल्यता सिध्यति । तदेतदुक्तं प्रादाध्यन्तरयोगेन दर्शनेन । यथा स पूर्वमेकरूप एव भवति, ततोऽनेकधा, तथोत्तरमनरं विविधमवनमनाद गानम् । विचित्र भवन्त्याहुः विराजत इति । यथाऽगर्वादिधृतस्य निर्गन्तः शोभा, तथाप्यपि शब्दस्य गानस्य तमिति ज्ञापनाय विराजत इत्युक्तम् । अतोऽत्रेति । यतो हेतोर्भगवान्समागतः, सदागता एव न भावाः, अतो हेतोरन्तरादिनभावादिद स्वामिनीनां ज्ञानमुत्पन्नमित्यर्थः । एतदेव स्फुटयन्ति धर्मिधर्माणामिति । एते भावाः स्वामिभावस्य स्वामिनीभावा इति धर्मिणः श्रीकृष्णस्य तद्धर्माणां विहारादीनां जीवत्वमविच्छेदे हेतुः नष्ट इत्यर्थः । इष्टानां जीवतद्धर्मयोग्य सत्त्वादर्शनेऽपि ताभ्यां युक्तं शक्तिनि भावः । अथवा । यथा प्रियदर्शनादि-स्तथैवेदं गानमपीत्याहुः यथा भगवत इति । धर्मिविषयाणामाश्रयः भगवद्धर्मः सोऽभिन्नः । अत एव तदा स्वागमनवस्तुना न समीपागमनम्, तस्य स्वधर्मत्वात् । भगवान् कौतुकार्थमेव गुप्तचिन्तितोऽस्ति रसपरवशश्च । अतोऽस्मदागतिनागमिष्यतीति ज्ञात्वा जगुरित्यर्थः । अस्मिन् पक्षे बहिःसंवेदनमेवास्ति, परं तद्दर्शनजा या तापो या नष्टा करणमिति ज्ञेयम् । सर्वथा बहिःसंवेदन हि निवर्तयितुमिति । तत्र हेतुमाहुः कृत्रिमत्वादिति । आगति भगवद्भावस्य कृत्रिमत्वात्तिरोधानमावश्यकम् । तद्धेतुर्विचित्रमावर्तनीता विधो मिलनं तदाहुः । यतो हेतोर्मिलितास्ततो हेतो स्वतोऽन्यतश्च विशेषविज्ञानात्तयेति योजना । यद्वा । भगवद्भावापन्नाऽपरा सखी स आश्लेषादिक करोतीति स्वतो मिलनम् । तदा यामास्वयं भगवत्त्वमुद्वचभावान् तद्भावानुत्पन्नकरणाऽन्या विशेषविज्ञानमभूत् । अन्ययापि भगवद्भावापन्नयाऽन्यया सख्या रज्ञानेन मिलनमन्यतो मिलनम् । तत्रापि पूर्ववत्तथा । नन्वग्रे पूतनासुपानकरणदशापन्नप्रभुभावापन्नैव पूतनायन्या एव स्तनमपिबदिति यथा, तथात्रापि कुतो न । तथा सति विशेषविज्ञानासम्भव इत्यत आहुः कृत्रिमत्वादिति । अग्रे लीला-विर्भावस्य वक्तव्यत्वात्तादृशी लीला तादृश्येवाविर्भवतीति सर्वमुपपद्यते । प्रकृते तु प्रियादर्शने सत्यु कटभावेन प्रियभावस्फूर्त्या स्वस्मिन्नपि तत्त्वेन भानमिति कृत्रिमत्वमस्य । एवं सत्यनेनैव भावेन यथोक्तन्यायेनायज्ञानं तदा तिरोभावस्फूर्तिरित्यर्थः । बहिःसंवेदने सत्यपि

१. तिरोधानस्फूर्तिरिति मू. पा ।

मादकद्रव्यस्वभावादुन्मत्तो विवेकरहितो भवति, एवं विरहभावस्वभावजवैकल्यात्तथेत्याशयेन तत्रापि न सर्वात्मनेत्याद्युक्तम् ।

आकाशवदन्तरमित्यत्र[1], शुको हीत्याद्याभासमारभ्यायमपीत्यन्तम् । अत्रायं भावः । 'तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः । न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहे'ति भगवद्वाक्यात् भक्तिमार्गे ज्ञानं प्रतिबन्धकमिति मन्तव्यम् । युक्तं चैतत् । आत्मत्वेन भगवज्ज्ञाने तद्दिदृक्षादिजनितार्त्यसम्भवेन प्रभुप्रादुर्भावासम्भवात्सर्वस्वनाश एव यतः । एवं सति यत्र कालादिनियन्तृत्वज्ञानात्मकप्रतिबन्धके सत्यपि कंसादिभयज्ञानरूपः स्नेहकार्यं एव देवक्यां जातः, तत्र प्रतिबन्धरहितानां स्नेहमात्रकार्यसम्भव इति किं वक्तव्यमिति कैमुतिकन्यायः सूच्यते । किञ्च । तत्र देवकीधर्मरूपं ज्ञानं प्रतिबन्धकत्वेनोक्तम्, अत्र तु विशेषणेन भगवद्धर्मस्तथोक्तः । एवं सति यत्रायमेव न प्रतिबन्धकः, तत्रान्यस्य का वार्तेत्यपि ज्ञापनायेदं विशेषणम् । तथा च हेतुसत्त्वेऽप्युक्तज्ञानाभावेन भक्त्युद्रेकः सूच्यते । एतदेवोक्तं तासामज्ञानकथनार्थमित्यनेन । शुकस्यैवं ज्ञानाभावे त्वेतत्कथनेऽप्यशक्तिः स्यात्, जीवनं वा न स्यादिति शुकज्ञानोक्तितात्पर्यं वेदितव्यम् । अपरञ्च । सर्वेष्वित्यादिपदमनुक्त्वा नपुंसकलिंगभूतपददानेन प्रभौ च पुरुषत्वोक्त्या यथा षण्ढस्य पुरुषनैकट्ये रसोत्पत्तिर्न, किन्तु स्त्रीणामेव, तथा प्रभुसान्निध्येऽपि भूतानां रसानुत्पत्तिः, एतासां तदुत्पत्तिश्च युक्तेति ज्ञाप्यते । तेनैतासामेव प्रभुरसाभिज्ञत्वमित्युक्तं भवति । एतावानपरं विशेषो, बहिःसम्बन्धे विलक्षणो भाव उत्पद्यते, अन्तरेव सम्बन्धे तु विलक्षण इति । कात्यायनीस्वरूपनिरूपणप्रस्तावे कथितं स्त्रीत्वमत्र विवक्षितमतो न शङ्का कापि । अपरञ्च । भगवति दृष्ट एवासां बहिरिदमन्तरिदमिति ज्ञानम्, अधुना तदभावेन तयोरप्यभावादप्यन्तरननुसन्धानमुचितम् । परन्तु प्राप्तिरपेक्षितेति यत्र कुत्रचित्प्रश्न इत्याशयेन बाह्याभ्यन्तरेत्यारभ्य पृच्छन्तीत्यन्तेनोक्तम् । सर्वत्रैव विद्यमानमित्याद्यविशेषणतात्पर्यम् । 'पुरि हृदयाकाशे शेत' इति व्युत्पत्त्या आत्मनीत्यादिद्वितीयविशेषणस्य । यद्वा । प्रकरणाद्भक्तिमार्गीद् भगवता ये बहिर्भाविता जीवास्ते बहिर्भूतपदेनोच्यन्ते । तथा च तेष्वेवाकाशवन्निराकार इवाप्रत्यक्षतयैव सन्त तत्राप्यन्तरमेव न तु कदाचिदपि बहिःप्राकट्येन । वस्तुतस्तु भक्तिमार्गीयेषु पुरुषत्वेन साकारं बहिःप्रकटं भर्तृरूपमन्तो बहिर्विचयनमेवोचितम् । न हि स्त्रीणां स्वभर्तुरन्तरन्वेषणमन्तःस्थितिज्ञानं वा स्वास्थ्यहेतुः पुरुषार्थाय वा भवतीति मूलार्थः ।

नन्दसूनुर्गत इत्यत्र, प्रभुपुत्र इति न ज्ञात इति । चोरत्वेन न ज्ञात

1.—मित्यस्य मू. पा. ।

इत्यर्थः । प्रभुपुत्रो यतो न चौर्यं करोतीति भावः । प्रेमहासावलोकनै-
१० २७ ५ रित्यत्र, तमो रज इत्यादि । यस्य यादृशं मनस्तस्य तादृश्यैव रीत्या
तद्भरतीति भावः ।

तुलस्यास्तदुभयमिति । पुष्पकृतः फलकृतश्च यो [1]त्रिधिविनियोगस्तदुभयं
१० २७ ६ नास्तीत्यर्थः ।

कच्चित्तुलसीत्यत्र, सा चेत्यादि । पूर्वं हि भक्तत्वेन निष्कामा निरन्तरं चर-
णारविन्दमेव सेवमाना स्थिता, लक्ष्म्यादीनामयत एवैषा पूजासाधनम् यथा
१० २७ ७ सपत्नीत्वं ज्ञात्वा तथा लक्ष्म्यादयो न कुर्युः । तथा सति नायिकात्वे यो
रसः स नानुभूतो भवतीत्यस्मदातिमज्ञात्वा तृष्णीं स्थितेति मत्वा तथाहुरित्यर्थः । अस्मदा-
द्यपेक्षयेति । अवस्थानिरूपकस्तदेत्याविभावज्ञापनार्थमुक्तम्, अन्यथा सपत्नीत्वं ज्ञात्वापि
नेमां पृच्छेयुरिति भावः ।

बाहुं प्रियांस इत्यत्र, समतया गमनेनेत्यादि । यद्यपि चरणचिह्नादर्शनेपि
भगवद्भावस्वभावादेव तल्लीलास्फूर्तिः सम्भवति, अत एवाग्रिमे तुलसिकासम्ब-
१० २७ १२ न्धि वाक्यं, तदनुसारेणाग्रे गमनाभावश्च, तथाप्यधुना प्रियदर्शनवत्ता ज्ञापिता.
प्रियः शीघ्रं प्राप्स्यत इति ज्ञात्वा प्रश्नपरा इति, तत्रापि मत्ततया तस्यास्तत्पादयनरहिता इति
चिह्नदर्शनेपि स मार्गेण न गताः । किञ्च । यथा सहभूताया अपि स्वामिपादाश्चरणचिह्नादर्शनं
पूर्वं पश्चाच्च दर्शनं तथैवाद्येऽन्येषां पददर्शनं, नाग्रे । तीक्ष्णभावत्वात् पदचिह्नानां
दर्शितत्वात्तस्य च तावतैव गात । अग्रे तु भगवदवशात्स्वयमेव पश्यत इत्याशयेनाचा-
र्यैरेवमुक्तम् । पदचिह्नं यत्र पत्राशिनग्रासणयनेनैव गृहीतपदत्वं ज्ञायते, तेनाञ्जसा तत्पो-
डनेन च तत्सम्भवात् । मदस्य सङ्गाभावस्तु नानुभूयते । तेषां च समदानामपि सङ्गे
मर्यादामार्गीयभक्तिरसजनित एव मदो भवितुमर्हतीति तुलसीसम्बन्धकथनम् । अनवसरेपि
गमनं मदाधिक्याय । एवं रसासक्तस्यैतदनुसन्धानासम्भवात् स्वामिन्न दुर्लभं नानन्ती
नरप्रणामं चेदनुसन्धास्यत्यस्मिन्नपि समये तदाश्रयणेपि कदाचिदनुसन्धास्यतीत्याशयेन प्रश्नं
चक्रे । अन्यथाऽलीनां तत्रापि नायिकानरप्रणयभिन्नदर्शनप्रश्नोऽनुपपन्नः स्यादिति भावः ।

लीला भगवतस्तास्ता इत्यग्रे, भवत्यातिमत्ता इत्यादि । एतासां प्रिये
१० २७ १८ स्नेहसाम्येपि क्वचिद् भगवद्भावः क्वचित्पूतनादिभाव इति तुमाहुः भवत्येत्यादि ।
नायिकाभेदेन हि भावभेदः । एकस्या अपि समयान्तरहेतुभेदेनापि तथा । एवं
सति भगवल्लीलानुसन्धिनां मध्ये यस्यां यदा यादृग्रूपस्य यस्य स्मृतिस्तस्यास्तदा तद्भाव

[1] विधिर्वा विनियोग इति पाठः । द्विविधविनियोगः स्यादपि ।

कत्वं विशुद्धभावत्वाज्जलादिसम्बन्धिस्फटिकस्येवेति प्रघट्टकार्थः । तथा च भगवन्मात्रज्ञानमतिमत्त्वम् । तत्सम्बन्धिनामपि ज्ञानमीषन्मत्त्वम् । लीलासम्बन्धिनां येषां ये भावास्तदात्मकतायां ते भावा अपि स्वत एव भवन्तीति ज्ञापनाय रोपत इत्यादिना तदुद्देशः कृतः । भावेषु दृष्टान्तेन वैजात्यज्ञापनाय सत्त्वायुक्ति । ननु तथापि भगवज्ज्ञानं विहाय पूतनादिज्ञानं यत्र, तत्र ततोऽन्यूनभावता गम्यते, तत्र हेतुरपि वक्तुं न शक्य इत्यरुच्या पक्षान्तरमाहुः **अतो न न्यूनभाव** इति । हि यस्माद्धेतोः शकटादिभिराविष्टा अतो न न्यूनतेत्यर्थः । अत्रैवं ज्ञेयम् । अत्र तापलीलाभगवतामन्योन्योपमर्दकभावेनाविर्भाव इति पूर्वमुक्तम् । सपदि तु लीलाया आविर्भाव एतामूच्यते । सा च भगवत्कृतितत्सम्बन्ध्यात्मिका विशिष्टा, न त्वन्यतरमात्ररूपा । तथा च यदंशो यत्राविर्भूतस्तत्र स एवांश उच्यते, अन्यथा पूतनासुपयःपानसामयिकदशापन्नभगवत्स्वरूपभावापन्नैव पूतनायन्त्याः स्तनं कथं पिबेत् । पूतनायन्ती च तस्यामेव पूतनावत् कथमाचरेत । अतो न क्वापि कुतश्चिन्न्यूनतेति सारम् । अस्मिन्पक्ष एका लीला यत्राविर्भूता तत्र न द्वितीयेति सिध्यति । तथा सति चिरं विलासोयं न स्यादिति पक्षान्तरमाहुर्भगवद्भावापन्नायाः सकाशात् पूतनोलूखलादिभावापन्ना उत्कृष्टा इति ज्ञापनाय सर्वत्रेति । अत्युत्कटविरहभावेनातिदीनतया कथञ्चिच्चरणसम्बन्धं वाञ्छन्त्यो यत्र तत्सम्बन्धः पूर्वमनुभूतोस्ति तद्वदाचरन्ति । मयि चेन्न चरणं स्थापयति, तदा पूतनोलूखलादिबुद्ध्यापि वा स्थापयत्विति भावेन अत्यार्त्यैव सर्वत्र भगवद्बुद्धिः । अतस्तस्य प्रकर्षेण सिद्ध्यर्थं तथेत्यर्थः । पुनरिति पदादेकस्या लीलायामनुकृतायामप्युत्कटत्यार्त्या पुनरुलूखलादिभावोपि भवतीति ज्ञाप्यते । एवं सति भावप्राचुर्यादत्रोत्कर्षः सिद्ध इति भावः ।

कस्याश्चित्पूतनायन्त्या इत्यत्र, **अन्या अहं कृष्ण** इत्युक्तवतीति ।
१०-२७-१५. यद्यप्यत्रोक्तिप्रयोजनं नास्ति, पूतनासुपयः[1]पानदशायामुक्तिप्राकट्याभावाच्च नैवं सम्भवति, तथापि यदा तदा पूतना मां गृह्णात्वन्यथा तु कार्यं न भविष्यतीति भगवदिच्छा स्थिता, तथा कृष्णत्वेनेयं मां जानात्विति कृष्णायन्त्या अपि तदेच्छासीदिति ज्ञापनपरा तदुक्तिरिति ज्ञेयम् । **तस्यास्त्वित्यादि** । अत्र मुख्योपपत्तिर्भावनयैवाविर्भूतेत्यादिना पूर्वमेवाचार्यैरुक्तेति सर्वमवदातम् ।

तत्रैकोवाचेत्यत्र, विरहेण दावाग्नि दग्धवतीत्यादि । अत्रेदमाकूतम् ।
१०-२७-२२. भगवता यदेयं लीला कृता, तदा पूर्वं गोपैर्दावाग्निर्दग्धः, ततः प्रार्थितः प्रभुः, अत्र कथं तद्वैपरीत्यमुच्यत इति शङ्कानेन निरस्यते । अतिविगाढभावत्या एव भगवद्भावो भवति । तादृश्या एव च हृदये विरहाग्निः प्रकटो भवतीति सैव

---

१. पूतनासुपानदशायामुक्तिप्राकट्याभावाच्च ग. पा. ।

स्वामिनी त[1] दृष्टवती । तदेतदुक्तं विरहेणेत्यादिना । तदा पूर्वं ततः पालनमेव कृतमित्यधुनापि स्वामिन्या रक्षैव सम्पन्नेति भाव । अथवैतस्या एवैतल्लीलाभावनाभूदिति सेवोक्तवतीत्याहुर्भावनया वेति ।

याताया नन्दसूनुनेत्यत्र, प्रभो सहभावोक्त्या गौणत्वेन सूचितमर्थमाहुः

१० २७ २७ तयैव मायेणेति ।

भगवान्हरिरीश्वर इत्यत्र, वैलक्षण्यज्ञापनार्थमिति । तादृश कर्म स्वकृतमिति स्वदोषज्ञाने मत्सर्यज दु ख न भवतीति तथेत्यर्थः । तुल्यफलत्वेनेति ।

१० २७ २८ यादृक्कर्म तादृगेव फलमिति तुल्यफलक कर्म भवति । तथा च यथास्मास्वपि कर्मवैलक्षण्येप्यस्मान् भक्तिमार्गेङ्गीकृतवानिति सा च तुल्येति तुल्य फल कृतवान्, तथा चेत्तामप्यङ्गीकुर्यात्तदास्मत्तुल्यैव भवेत् । [2]तस्यामाराधनबललक्षण धर्माधिकमस्तीति तां त मार्गे पुनरङ्गीकृतवानित्यर्थ । [3]गोविन्दपदतात्पर्यनिरूपणे साधारणेन्द्रोपीति । यद्यपि 'इति गोगोकुलपतिं गोविन्दमभिषिच्य चे'ति वाक्यात् साधारण्येन सर्वस्यैव गोकुलस्येन्द्र, न तु विशेषेणैकस्य कस्यचित् । अतस्तादृशस्यास्मदपेक्षया विशेषेणैकस्य भोगोनुचित, तथापीश्वरत्वात्तथोपपद्यत इति भाव ।

धन्या अहो इत्यस्याभासे, स्वभाग्याभिनन्दनमपीति । चरणसम्बन्धादे

१० २७ २९ न्ना धन्य योषया स्वस्यापि तथात्वात्तथात्वमायातीति तथा ।

रेमे तया चात्मरत इत्यत्र, पुरुषत्वात्कामस्येत्यादि । यथा प्राकृत कामी महानपि केवल स्वार्थपर सन्त्स्वय यदि सुखी भवति तदा स्वस्नेहेपि

१० २७ ३४ दुःखिनं नानुसंधत्ते तथा । यथात्माराम इत्यलक्षण स्वधर्ममप्यतिक्रान्तवांस्तथाऽस्मदुःखमप्यविचार्य स्वार्थमेवैतां सम्पाद्योद्भटभाव स्वयं तादृश्यैव तया च रेम इत्यर्थ इत्याशयेनोक्त पुरुषत्वादित्यादि । तथा च स्वधर्माविचारकस्य परधर्माविचारे किमाश्चर्यमिति भाव । एव तया रत इत्यस्य स्वार्थपरत्वमर्थः पर्यवस्यति यतो न पौनरुक्त्यमिति ज्ञेयम् । एव सकामत्वेपि न निष्कामताक्षतिरिति ज्ञापनायात्माराम इत्युक्तिरित्याशयेनाहुर्निष्काम एवेत्यादि । प्रकारान्तरेणाप्यपौनरुक्त्यमित्याशयेनात्मरत वे प्रकारान्तरेणाहुः रसाधारत्वायेति । अत्रेदमाकूतम् । रसात्मकत्वाद्भगवतस्तस्य च स्थायिभावात्मकत्वात्तमेतस्या प्रकटीकृत्य रेमे । अत एवैतद्भानुभवासम्भवात् । न तु प्राकृतभावे सतीति । यद्वा । आत्मरत इत्यत्रामपदं स्वामिनीवाचकम् । तथा चात्मारामोऽपि तयात्म-

१ 'त इति मूलपाठे नास्ति । २ आराधनलक्षणमिति तु मूलपाठ ।

३ 'गोविन्दे'त्यारभ्य भाव इत्यन्त क्वचिन्नास्ति ।

रतः कुतो रेमे । यत्राद्विशेषरमणं विविधबन्धादिविशिष्टमुच्यते । तथा सति नखदशनादिकार्यसम्भवेनात्मत्ववशङ्का स्यात्, तन्निरासायाहुरखण्डित इति । यथा तस्याः रतोऽप्यात्माराम एव तथा दशनादिभिः खण्डितोऽप्यखण्डित एवेत्यर्थः । कामिनां दर्शयन्दैन्यमित्यत्र, कामिनस्त्विवारभ्य एवं रेमे इत्यन्तम् । अत्रायमर्थः । पूर्णात्मारामत्वेऽप्यात्मा तादृशोऽपि सन्यन्नायिकाधीनत्वमेव भजते तेन रसात्मको रसवांश्च भगवानेव, अन्ये तु कामिनो रसाभासिनो मलपूर्णे वस्तु यासक्त्या बीभत्सरसपूर्णा भ्रान्ताः सन्तस्तादृशीष्वेव दैन्यमात्रं फलं लभन्त इति ज्ञाप्यते । किञ्च । आत्मारामोऽपि यद्रसपरवशस्तत्रैव रसभावशेन मानादिकं भवति, अन्यासु तु रसाभावान्न स मानः, किन्तु दौष्ट्यप्रकटनमेवेति । एतेन त्मारामस्यापि प्रभोर्यत्र रतिस्तत्रैव रसो नान्यास्विति फलितम् ।

गां गोपीमित्यत्र, बहिःप्रियसम्बन्धेऽन्तरायहेतुत्वेन माने दोषत्वोक्तिर्निवृत्ताविति ज्ञेयम् । समानरसत्वेप्येतासां तदा मानोऽभूदित्यत्र । तत्राप्यधुना सोऽभूत्, तत्र

१० २७ ३५ हेतुमाहुः स्वगत्यधुक्तकरणादिति । नायिकानां हि प्रकृतिः सदा मानिनीत्वम् । प्रकृते चैवंविध नायकाधीनत्वमेवाङ्गीकृतमिति स्वस्यापि नायिकाप्रकृतेर्या गती रीतिस्तस्यामयुक्तकरणान्नायकाधीनत्वेन स्थितेर्नायिकाप्रवृत्तिनिवृत्तिहेतुत्वेनाधिकारिण इवाधिकारिणो ये, आदिपदात्प्रौढा भावास्ते पूर्वभावान्कोमलान्नाशयामासुरित्यर्थः । 'स्वयं स्वयुक्ते'ति पाठे स्वयंपदं स्वामिनीपरम् । शेषं पूर्ववत् । ननु पूर्वमेवास्या अपि स्वामिन्यो मानः कुतो नाभूत्, रसप्राप्तेस्तुल्यत्वादिति चेत्, उच्यते । भगवान् हि भक्तेभ्यो भजनानन्दं दातुं लीलां करोति, स्वस्य तद्रसानुभवार्थं च । तथा च बह्वीष्वपि प्रियासु सतीष्वेकस्याः पृथङ्नयनेन विशेषरमणे यो रसः स न सम्भूय रमणे । स च स्वरूपात्मक एवेति तत्स्वरूपं प्रकटीकृतवानिति न काप्यनुपपत्तिः । पूर्वं मानाभावे स्वामिनीभिरेव हेतुरुक्तोऽनयाराधित इत्यादिना ।

ततो गत्वेत्यस्याभासे, दोषाभावेनैवेत्यादिना इमात्वक्तुस्तात्पर्यमुच्यते ।

१० २७ ३७ शक्तौ सत्यामपि प्राकृतकामिवत्कामाधीनत्वेन स्ववशवजानेमाशक्तिव्यापत्ते स्वस्कन्धेनापि नेष्यतीति ज्ञानं भ्रमः । यथा भगवद्रमणे दोषभावासम्भवाद्भगवद्भावात्मकावेव सौभाग्यमदमानाविति 'तासां तत्सौभगमद'मित्यत्र निरूपितम्, तथा प्रकृतेऽपि प्रियाधीनत्वभावेनात्र रसो दत्त इति स एव भावोऽत्राजनि, न तु दोषरूपः । स एव हित्वा गोपीरित्यनेनोक्तः । [१]एवं सत्यत्र विप्रयोगात्मकरसानुभवे पूर्णरसदानं न भविष्यतीति ज्ञात्वा प्रभुः सयोगरसदित्सासंकोचमकरोत् । अयमेव भावः क्रियाशक्ति-

१ ततो भोगाध्यानेत्यादिप्रश्नानामयमाहुः एव सतीत्यादि ।

संकोचप्रकाशको न पारयेहं चलितुमित्यनेनोक्तः । अन्यथाऽनृतवादित्वं स्यात् । न हि भगवन्तं प्रति तदीयानामेव सम्भवति । स स्वतिपूर्णरसाविर्भावेन स्वस्मरूपः सात्त्विकभावो भवितुमर्हति । इमत्व समर्यादात्वम् । तथा चोक्तरीत्या निरवधिरसदानुरक्तसंकोचेच्छा रसमार्यादिकी न भवतीति तद्भावोदयोस्त्वमुपदेनोक्तः । रजस्तमोऽधिष्ठात्रोरपि तज्ज भाव दूरीकृत्य अप्रतदाते मत्रापि पूर्णरसदानार्थमेव तद्भावजनन स्वतिरोधानं चेति ज्ञापनाय क्लेशत्वपदोक्तिः । एवं सति पर्यवसानतो रसमार्यादिकीत्वमप्युक्तेच्छाया ज्ञायते । [1]प्रिया तिम धृता तमजानन्ती पूर्ववदेव प्रियः करिष्यतीति ज्ञात्वा 'नय मा'मिति क्रियाशक्तिं प्रार्थितवती । परन्तु यत्र ते मन इत्यत्रादाप्युक्तेर्भगवन्मन उक्तकार्येरतीति पूर्ववत्क्रियोद्गमस्याशक्यत्वादुभयो[2]: प्रभुरन्यस्यमेवोपदिष्टवान् प्रियायाः स्वस्कन्धारोहणम्, न तु स्वस्य । अग्रिमरसदित्सया प्रभुः स्वहार्दं न ज्ञापयतीति प्रिया प्रियस्कन्धमेव बुद्ध्वा तथैव कर्तुमुद्यताभूत् । तदा प्रभुस्तथाकरोत् ।

एतत्सर्वं हृदि कृत्वाचार्यैरुक्तमेषा हि नृत्यमित्यादि । नटो हि नृत्यचेष्टया स्वान्तस्थं रसं द्रष्टारमनुभावयति । एतद्धर्मसाम्येनात्रापि नृत्यपदप्रयोगः कृतः ।
१०-२७-३८ एतदेव विवृत स्वान्तरित्यादिना । पूर्वं प्रभुणा सर्वमा तदधीनत्वेन रसो दत्तः । सोऽन्ताप्रियाया अस्ती यधुना स्वयं तं रसं प्रियमनुभावयितुं चाकृती प्रकटमति । तथाशक्यम्, भक्तस्नेहेनैव तद्वशीभूतस्तथा रमते, न तु यथापि । प्रकृते हि 'न पारयेह'मित्यादिस्नेहरीतिविरुद्धम् । यद्रसमार्गाविरुद्धमिति तथा नर्तुमुचितं भवतीत्युच्यते, तत्र साधीमः । तथा सति रसस्वामा येन प्रिया तन्स्थरसच्युते किं प्रियमनुभावयेत्, अग्रिमरसदानप्रतिबन्धश्च[3] भवेत् । इदमेवोक्तं तद्भूमावित्यादिना । एतदर्थस्तु । तत् उक्ताभिनयनम् । भूमौ स्वान्तर्लक्षणस्थानं त्याजयित्वा बहिःस्वप्रौढ्या तत्प्रकटने न सम्भवतीति शेषः । तत्र हेतुरूर्ध्वभावेत्यादि । स्वान्तर्गतो हि रसामृताब्धिरुचरोचर भावतरङ्गाननुभावयति । इदमेवोर्ध्वभावत्वम् । स एव बहिः प्रकटितो रसत्वादेव बहिर्भवति । [4]अतोयमेवोर्ध्वभावाभाव । च्युतः स्वरूपत एव नष्टो भवेदिति यावत् । अलौकिकरसाभिनयनम् । विरहेणार्त्यादिप्रकटनं तत्, लौकिको या स्त्राधिक्यज्ञापनं भूमौ पदस्थापनम् । तस्मिन्सति तन्न सम्भवतीत्यर्थः । अशक्ता चेदिति । 'यत्र ते मन' इति प्रौढ्या, न तु प्रार्थनरीत्या, सख्येन कथं वदेदित्यर्थः ।

(एवं सति भङ्ग्यन्तरेणाप्येतद्व्याकृतिः सम्भवति । तथा हि । भगवता अस्यै प्रियायै पूर्णः स्वरसो दत्त इति भगवन्निष्ठा भावा सर्वे हृदि स्फुरद्रूपा[5] जाताः । तथा

---

१ एषा हि नृत्यमित्यादिग्रन्थेनार्थमाहु प्रियेत्यादि । २ मयोरविप्रयोगयोरित्यर्थः ।
३. प्रतिबन्धश्च मू पा । ४ अयमेवो—मू पा । ५ स्फुरिता मू पा ।

च सर्वत आधिक्यमपि स्वस्मिन् स्फुरितम् । तदुक्तं हित्वा गोपीरित्यादिना । एवं सति द्वितीयरसलीलाचिकीर्षा यदाभूत्सापि हृदि स्फुरिता । तामविपह्य मन्यमानापि न कातरा जाता, किन्तु पूर्वरसगर्विण्या दृढा सती प्रियमब्रवीत् । एतदेव दशापदेनोक्तम् । दुष्टगुणव्याप्तयोरप्यमृतं ददाति । अह त्वेतद्गुणैरेव पूर्णेति अवश्यं सुखमेव *दास्यति, न दुःखमित्यभिप्रायज्ञापनाय* **केशवपदम्** *। ततो भोगस्थानादग्रे वनसम्ब*न्धिनमुत्कृष्टं देशं स्वयं स्वेच्छया गता, न तु प्रियेण नीता । [1]गत्वाऽब्रवीदित्युक्त्या प्रियनैकट्यं ज्ञाप्यते । तेन तदधीन एव प्रियस्तत्संगे गत इति ज्ञापितं भवति । अथवा । वनमित्युद्देशो नाममात्रम् । वस्तुतस्तु महारसनिधानम् । तेन रसोद्दीपकमित्युक्तं भवति । एतादृशे वने मद्वियोगेन मां विचिन्वन् यदि प्रियो भवति, तदा कीदृशो रसः स्यादित्याशयेनाब्रवीत् । [2]अत एव दशात्वमुक्तम् । पूर्वरसातिमदात्तथा चेत्करिष्यतीति तदाह चलितुं स्पन्दितुमपि न *पारये । जीवनमेव न संपत्स्यत इति भावः । एवं चेत् किं कर्तव्यमित्याकाङ्क्षायामाह* **नयेति** । यत्र स्वान्तर्धाने ते मनस्तत्रान्तर्धाने मां नय, तिरोहितां मां कुरु, त्वं मा तथा भवेत्यर्थः । प्रियस्त्विदमत्यशक्यमित्याशयेनोत्तरयति **स्कन्धेत्यादिना** । यथा स्वस्कन्धारोहणमशक्यम्, तथा मत्तोऽन्तर्धानं भवत्या । न हि पूर्णज्ञानशक्तेरविषयः कोपि भवितुं शक्नोति । यद्यपि विरुद्धसर्वधर्माश्रयत्वेन रसात्मकत्वेन च जानन्नेवाजानन्नपि भवितुं शक्नोतीत्येवमुत्तरं *न सम्भवति, तथाप्यत्रातिप्रीतिविषयत्वेन तं धर्मं प्रकटयितुं न पारय इति भगवदाशयज्ञापनाय प्रियापदमुक्तम् । उत्तरदानमप्यत एव । अन्यथा त्वेवमुक्तस्तूष्णीं तिष्ठेत्तिरो*धीयेतैव वा । प्रियात्वान्ममाशक्यं भवत्यास्तिरोधानम्, तत्सामर्थ्याभावाद्भवत्याः [3]स्वतस्तिरोधानं [4]तथेति भाव । एवं सति प्रियया प्रार्थितं देयं यद्यपि, तथापि प्रियात्वेन स्वाशक्यमिति लक्षणो यो हेतुस्ततो हेतोः स्वयमेव तथाऽकरोदित्याह **ततश्चेति** । एवं करणे प्रभुनिष्ठं हेतुमाह **कृष्ण इति** । अस्यां दशायां हृदि प्रकटः सन्नेवानन्दात्मकनन्दरसपोषको यत इत्यर्थः ।) इति सप्तविंशोध्यायः ॥

अष्टाविंशोध्यायार्थोक्तौ, स्वभावादपराधत इति । तदवस्थाया एव स्वभावो यद्गुणगानमेव भवत्येव । अतस्तत्स्वभावादेव गानं चक्रुरिति सम्बन्धः ।

१०·२८०. पक्षान्तरमाहुरपराधत इति । भक्तेभ्योपि स्वस्मिन्नाधिक्यज्ञानलक्षणमपराधं प्राप्यास्मान्यदि प्रार्थयिष्यति, तदा रस दास्याम इति मानलक्षणा कृताऽवज्ञा याभिस्तादृश्यो यतोऽतः स्तोत्रं चक्रुरित्यर्थः । अनजयाऽप्रसादे स्तोत्रेण प्रसादो भविष्यतीति तथेति भावः । यद्वा । स्वभावाद्रसस्वभावाद्योपराध इत्यपि पूर्ववत् । स्तोत्रमिति गानविशेषणम् । तथा च

---

१. 'गत्वा' इति नास्ति मूलपाठे । २. अतो दृशात्वमुक्तम् । मू. पा. ।
३. भगवतः । ४. स्वस्कन्धारोहणतुल्यमित्यर्थः ।

स्तोत्ररूपं गानं चक्रुरित्यर्थः । अग्रे गुणकथनं भाववैज्ञापनार्थमिति ज्ञेयम् । गूढाभिसंधिना पक्षान्तरमाहुः अथवेति । प्रार्थनाश्च ता आद्याश्च प्रार्थनाद्या याः प्रथमद्वितीयतृतीयपञ्चमषष्ठसप्तमाष्टमश्लोकैः कृता, अन्ते त्रयोदशचतुर्दशाभ्यां च सान्निध्यात् कुमारिकाभिः कृता, अन्ये तु प्रौढाभिरुक्ताः श्लोकाः । चतुर्थ्यो गुणातीतभावापन्नाः कोमलभावा इति यावत् । अतस्तथा श्लोकसङ्घ इत्यर्थः । ननु 'तदागमनकाङ्क्षया जगु'रिति वचः सायथा माननापराधाद्गत', तथा स्तोत्रेण संतुष्टः आगमिष्यतीति भावो लक्ष्यते, एवं सति दोषारोपादेरनुपपत्तिरित्याशङ्क्य गूढाभिसन्धिमुद्घाटयन्तः स्तुतिस्वरूपमाहुः तत्तदिति । स्तुतिर्हि यथाधिकारं भवति । एतासामेतादृश एवाधिकारो येन कुहककितवेत्यादिवचनानामपि स्तुतित्वम् । अन्यथाग्रे तथानुवदिष्यन्तस्तदागमनकाङ्क्षया जगुरिति न वदेत् । न ह्येवं ब्रह्मादिभिरपि वक्तुं शक्यम् । तथा च स्वस्वभावोद्गिरणे तच्छ्रवणेन प्रभोः परमसंतोष इति तासां भाव एव निरूप्यत इत्यर्थः । विपक्षे बाधकमाहुः अन्यथेति । यद्यस्तुतिवदत्रापि स्तुतित्वमेव स्यात्, न भावमात्रनिरूपणम्, तदोपालम्भादिप्रकारैरनेकरूपता स्तुतौ न सम्भवतीति सा नोच्यतेत्यर्थः ।

सुरतनाथेत्यत्र, (सुरत सम्भोग इत्यादेरयमर्थः । रतं लौकिकभोगशब्दवाच्यम् । तत्तु सृष्टिमारभ्य प्रवर्तते । तत्र न भगवदाज्ञापेक्षा । [1]सृष्टिस्थानयो[ः] प्रत्यक्षत्वात्तस्य । एवं सति सुष्ठु अलौकिकं शोभनरूपं यत् रतं तत्
१०२८२
सम्यग्भोगशब्दवाच्यम् । तदस्मास्वेव त्वदाज्ञयैवेति यावत्, तथैव प्रवर्तते । यतो जगत् लौकिकं न त्यजति, नश्यत्येव, न तु स्थिरम् । अतो यदलौकिकं स्वरूपानन्दरूपं तत्र प्रकटीभवितुं नार्हति । एतादृशस्य तस्य भवानेव नाथः । प्रवर्तको रक्षकश्च । एवं सति स रसश्चेत् त्वय्येव निरुद्धस्तिष्ठेत्, तदा स्वर्गौकिका अपि भक्ता [2]शून्यहृदया भवेयुरिति [3]स्वदिच्छाज्ञाता स्वां प्रार्थयित्वा 'नादृशोर्वय प्रकटीकृता', यत्र प्रतिबन्धनिवृत्तिः । अत एवाग्रे निखासार्थिन' इति वक्ष्यते । कामो भगवदीयः । मनसः पूर्वरूपत्वात् वाग्[4]रूपत्वात् 'मनधन' इत्युक्त्वा 'जगौ कल वामदृशां मनोहरम्' 'तां दृष्ट्वान्तिक'मित्यादिकं च वाग्रूपमलौकिकभावप्रवर्तकं स्वभिप्रायस्य ज्ञापनेनाज्ञापदमुक्तम् । 'मैवं विभोर्हती'त्यादिवाचां भगवज्ज्ञापकत्वात्तासामप्यानारूपत्वमित्याशय । तैरेव वचनैः प्रतिबन्धनिवृत्तिरपि ।) अतो प्रमाणेति । अयमत्र भावः । 'ब्रह्मादयो बहुतिथं यदपाङ्गमोक्षकामा' इत्यत्र भगवद्भजनकामाः सन्तः साक्षात्तत्कटाक्षमासाद्य श्रियापाङ्गा भावोद्गारिणो निरन्तरं प्रियसङ्गत्वेन तद्भावात्मकत्वं प्राप्ता इति तत्सम्बन्धे तदनुभावेन कदाचित्स भावोपि

१ सृष्टिसमये लीनत्वादिति पाठः । २ शून्यहृदया इति पाठः । ३ स्वहृदय इति स्यात् । ४ वेणुरूपत्वादिति ।

भवेदित्याशया तत्कामास्तपश्चरन्तीति निरूपितम् । प्रकृते च स्वयं प्रभुः प्रकट इति तु मार्गप्रकटनार्थं द्वारभूता वयं तेन प्रकटिता इति । अत्र सुरतशब्देन सुष्ठु भगवता समं रतं येनेति भगवद्भाव एवोच्यते, न तु सम्भोगः, तस्यापामरमनुवर्तमानत्वेन त्वदधीनेत्यादिना नाथत्वविवरणं यत्तदनुपपत्तेः । एतं मार्गप्राकट्येन ब्रह्मणो न कोपि भावः सिद्ध इत्यरुच्या पक्षान्तरमाहुः कामेन चेति । भगवदीयभावरूपेणेति ज्ञेयम् । स्वामिनीदर्शने हि भगवतो भाव उद्दिक्तः सन् कामकार्यं करोत्यतस्तेनैव स्वार्थं वयं प्रकटीकृता इत्यर्थः ।

सख उदेपिवानित्यत्र, पूर्वमपि सखा यथेच्छमित्यादि । 'सुपर्णावेतौ सयुजौ सखाया'विति श्रुतेरन्तर्यामी जीवस्य सखा भवति । प्रकृते च स्वरमणेच्छा-
१० २८ ४ मनतिक्रम्य तदनुरूपमेवास्मान् प्रेरयसीत्यर्थः । अत एवास्माकं नायिकाभाव एव सार्वदिक इति भावः । एतादृशस्यागमनं नायिकायै स्वसमर्पणार्थमेव भवतीति तदेव कर्तुमुचितमिति भाव इत्याशयेनाहुः आगतस्येत्यादि ।

दिनपरिक्षय इत्यत्र, विभ्रमपदतात्पर्योक्तौ, ज्ञानं वा भवेदिति । भक्त्यात्मकत्वात्
१० २८ १२ मुखस्य स्नेहरसानुभव एव स्यादित्यर्थः ।

प्रणतकामदमित्यत्र, अथवा यल्लोक इत्यादि । लौकिककामखण्डनैश्वर्य
१० २८ १३ स्वकामदानालङ्करणापद्दूरीकरणात्मकं पञ्चविधमुपकारं करोति तच्चरणपङ्कजं तापनिवारणात्मकमेकमेवोपकारमस्माकं करोत्वित्यर्थः । पद्मजैरर्चितमिति चरणपद्मजैर्नखैस्तथेत्यर्थः । लोके तेषां सयोगिद्रव्यत्वेपि भगवन्नखानां सच्चिदानन्दरूपत्वेन स्वरूपात्मकत्वेन तथा वक्तुमशक्यं यद्यपि, तथापि स्वस्याधुना चरणसम्बन्धे यादृशी अदेव तत्सम्बन्धि तदेव पूर्णसाधनमित्याशयेन तथोक्तम् । अस्मिन्पक्षे उपपत्तिमाहुरन्यथेति । उक्तारुच्यैव पक्षान्तरमाहुस्तत्तुल्यं चेति । तैरतिशोभा । अतस्तैश्चरणपद्मं पूजितमिव भवतीत्यर्थः । ध्वजादिचिह्नानि चोक्तरूपाणि ज्ञेयानि ।

रहसि संविदमित्यत्र, गुणत्रयसहितमिति । मधुरान्यगुणत्रयस्वबुधमनोज्ञत्वलक्षणं गुणत्रयं ज्ञेयम् । रहसि संविदो ज्ञानानि येन वाक्येन तत्तथा ।
१० २८ १७ वाक्यनिरूपणं सति यादृशं तदस्ति तादृशमेव प्राप्यत इति गुणत्रयसहित-मित्युक्तम् । अथवा । कारणत्रयस्यैव विशेषणमिदम् । कारणादेशो वाक्यमित्यादिना कृतं । कामेत्यादिना गुणानां बन्धादिबोधकत्वेन वाक्यं कामोद्बोधकम् । हास्यमानन्दस्य । श्रीधामत्वेन रसाधिकारिणो योग्यं ते ।

एतावन्निरूपणेन भगवत्प्राप्तौ भक्तकृतसाधनस्य यावती पराकाष्ठास्ति तावद्युक्ता
जाता, भगवता च भक्तानां स्नेहपरीक्षायां क्रियमाणायां यावती तस्याः
१० २८ १९ पराकाष्ठा, साप्युक्ता जातेत्युपसंहरति 'एवं साधनेति । अत्र यावत्ताव
दित्यव्ययपदे । तथा चाङ्गीकृतया साधनपरीक्षयोर्यावत्स्वरूपं तावद्रूपस्ताभ्यो निरूपित
इत्यर्थः'। इत्यष्टाविंशोऽध्यायः ॥

एकोनत्रिंशाध्याये तासामाविर्भूदित्यत्राभावे, ब्रह्मा विष्णुरित्यादि ।
अत्रेदमाकृतम् । आद्यब्रह्मकल्पे भगवानेव चतुर्मुखो ब्रह्माभूत्, तपश्च पूर्वं
१० २९ २ कृतवान् । स वाच्यवाचकतया 'भगवान् ब्रह्मरूपधृक् नामरूपक्रिया धत्त'
इति वाक्यात्' छन्दांसि यद्विदु'रिति वाक्याच्छन्दःसृष्टिमर्थसृष्टिं च कृतवान् । तदेवानुप्रविश्य
सर्वं कार्यं' कृतवान्, स्वयं रजोरूपश्च । प्रकृते च पूर्वं रजोरूपमानरूपेणाविर्भूतः,
ततस्तापरूपेण, ततो विविधगानप्रलापरूपेण, ततो विविधलीलारूपेण । विष्णुश्च
विक्षेपरहितं शुद्धसत्त्वं भक्तो यथा यस्य पालनं भवति तथा पाति । प्रकृते च सम्भो-
गवचनश्रवणानन्तरं स्वापराधहेतुकं गमनं प्रियस्य ज्ञात्वा चित्तविक्षेपं त्यक्त्वा पुनः
स्वस्थानस्थिताः स्वजीवनार्थं स्वं स्वं भावं प्रकटीकृतवत्य इति तादृग्भावरूपेण प्रकटः ।
'यदरोदीत्तद्रुद्रस्य रुद्रत्व'मिति श्रुतेः स्पष्टं रुद्रत्वम् । 'देवाः स्वधनमग्नौ निधाय संग्रामाय
युद्धाय गताः', तदाग्निस्तद् गृहीत्वा पलायितः, तदा देवा बलात् स्वकीयं धनमगृह्णन्, स तदा
'दुःखेनारोदी'दिति श्रुतावुपाख्यानम् । प्रकृते चाद्य रस एव प्रभुः' स्वामिनीभ्यो
दत्तवान् स्वभोगार्थम् । स्वामिन्यस्तु मानेन स्वस्मिन्नेव तं रसं निरुद्धवत्य, तदा मानेऽपहृते-
ऽतिदैन्यमाविष्कृतवत्य इति रुद्रत्वमुच्यते । यथा स सर्वनिरासकस्तथायं भावोऽखिल-
शास्त्रोक्तसाधनवर्गनिरासकः । यतः साधनचतुष्टयान्वितदनुदयो भगवदनाविर्भावश्च, एत-
दुदये तन्मूर्तिनाशः प्रभोराविर्भावश्च । 'कृषिर्भूवाचकः' इति वाक्यात्कृष्णशब्दवाच्यता
यद्यपि सदैवास्ति, तथाप्येतद्भावोदयानन्तरोत्तरक्षणे यदि नाविर्भूयात् भक्तानां तदा देहा-
दिसत्तैव न स्यात् दैन्येनाशुपमर्दस्वभावेन प्राचीनसर्वनाशात् । अतः स्वयमाविर्भूय
स्वस्वरूपस्य सत्यमानन्दं च तत्र स्थापयतास्याविर्भूतस्य कृष्णतेति । स्मयमानमुखाम्बुज
इत्यत्र, स्मयमानाभ्यां चेष्टितं । न हेतादृशोऽन्योऽस्ति यस्य त्वादृशा भक्ता इति
स्मयः । अत एवैताभिर्मां प्रार्थयिष्यति तदाऽपरस्या अपि मद्भक्ताये रसं दास्ये,
यथा तु मुक्तिमर्थयति मानं । अत एवाम्बुजमुक्तम् । तद्धि रविकिरणसम्बन्धादेव
विकसितं सरसं प्रकटयति । भक्तिप्रार्थनैव तत्स्थानीयेति भावः । भक्तानां दोष इति ।

१ 'कार्यं' इति नास्ति मूलपाठे ।

विचारे क्रियमाणे भगवद्रसपानानन्तरमेव तादृग्भावोत्पत्तेस्तस्यैव स धर्म इति निर्धायत इत्यर्थः । **अथवा व्यापिवैकुण्ठेत्यादि** । 'मयाऽपरोक्षं भजते'तिवाक्यात् श्रीकृष्णस्त्वेतासामेव निकटे स्थितः । एवं सति 'तं विलोक्यागत'मिति यदागमनकथनम्, तेन येन रूपेण तत्रास्थितिः पूर्वम्, तेन रूपेणागमनमित्यवश्य वाच्यम्, तत्र स्थितस्यैव आगमनासम्भवात् । अतो येन रूपेणागमनं, तद्रूपमुक्तं **व्यापिवैकुण्ठेत्यादिना** । व्यापिवैकुण्ठे हि पुरुषोत्तम एव, नांशः; व्रजे तु 'श्रयत इन्दिरे'ति वाक्याल्लक्ष्म्याः कदाचिदपि नावसरः । इदानीमेतन्मानापनोदनं तदार्तिनाशनं चैकदैव करिष्यन् लक्ष्म्या रमणं येन रूपेण करोति,तेन रूपेण,कृत्वा तत्स्वरूपस्य एतदभिन्नत्वात् तान् धर्मान् प्रकटीकृत्य,प्रकट इत्याशयेनागमनमुक्तम् । एवं सत्येतेषां धर्माणां पूर्वमसत्वात् तद्विशिष्टस्यापि तथात्वात्तादृशस्यागमनमुक्तं भवतीति भावः । **ननु कन्दर्पेणेति** । पूतनोक्तेरिदमाकूतं जायते । पूतनया हि परपक्षनिरासः क्रियते । दुःखिता तु सा न तं कर्तुं समर्था, किन्तु सुखिता । स्वामिनीभिरपि सर्वात्मभावविरुद्धा सर्वे भावा निरस्ताः । तथा च सर्वात्मभाववत्सु भक्तेषु दुःखसम्भवे मर्यादामार्गीया भक्ता अप्यस्मिन्मार्गे दुःखसम्भावनात्हितान्मोक्षादप्याधिक्यं न ज्ञास्यन्तीत्येतन्मार्गप्रवृत्तिर्न भविष्यतीति ज्ञात्वा कुतोऽतिरोधानं न कृतवानिति । तथा च कन्दर्पशब्दः सर्वात्मभावपरः । एतासां कामभावोऽपि सर्वात्मभावात्मक एवेति ज्ञापनाय कन्दर्पपदप्रयोगः । **स्वपूतना खिन्नेति** । भविष्यतीति शेषः । यद्वा । दैन्येनाविर्भूतो न तु हेत्वन्तरेणेतीममर्थं स्फुटं कर्तुमत्रापि लौकिकरीतिं जानतो भ्रान्तस्याशङ्कामनुवदन्ति **ननु कन्दर्पेणेत्यादिना** । साक्षादित्यनेनाद्यपक्षे समाधानमेवं ज्ञेयम् । अस्मिन्मार्गे मोक्षादाधिक्यज्ञानाभाव किं रसवार्ताभिज्ञस्यापाद्यते, उत तदनभिज्ञस्य । तत्रान्त्ये ओमिति ब्रूमः । आद्ये तु विवरणोक्ताध्यात्मिकमन्मथरसस्यैव यत्र विप्रयोगे महारसत्वमुच्यते तत्र तस्यापि तद्रूपस्य विप्रयोगे महारसत्वेन ज्ञाने का शङ्का नामेति द्वितीयपक्षसमाधानं विवरणे स्फुटम् ।

काचित्कराम्बुजमित्यत्र, **पूर्वमनेकविधा अपीति** । अनाविर्भावे चित्तविक्षेपादनेकविधत्वं पूर्वाध्याय उपपादितं वचनरीत्या । अधुना तु प्रभुर्भग-
१०-२९-४. शब्दार्थं प्रकटीकृत्य स्वयमाविर्भूत इति ता अप्याविर्भूतस्वरूपैकनिष्ठा इति तदात्मिका जाता इत्यर्थः । एवं सति स्वरूपस्य रसात्मकत्वेन तद्धर्माणामपि तथात्वात् भ्रुकुटिबन्धनादिभावा अप्युपपद्यन्त इति भाव । **निर्गुणाश्च शिष्टा इति** । चकारात्समस्तसजातीयभाव उच्यते ।

१० २९-५. **चन्दनरूपितमि**त्यत्र, **एवं सामग्रीत्यादि** । एतास्वनुग्रहविशेषो ज्ञापित इति भावः ।

एका भ्रुकुटिमाबध्येत्यत्र, तादृशभावस्येत्यादि । पूर्वं मानमात्रं निरूपितम्,
१० २९ ६ अधुना तु शतधापि मानापनोदनार्थं यत्ने कृते मानमहं न त्यक्ष्यामीति[1] गाढमानो निरूप्यते । तथा हि । कालविलम्बेन हि मानः शिथिलो भवति, व्यभिचारित्वेनाचिरस्थायित्वात् । तथा चायं मानस्तथा यथा न भवति । [2]गाढता तादृश्यैवास्य सार्वदिकी भवति । तथा कृतिरेव कालनियमनम् । प्रियवचनादिभिर्मानमवश्यं त्यजतीति नायिकास्वभावः, स मा भवतु, मानस्वभाव एव मम तिष्ठत्विति प्रयत्नस्तन्नियमनं स्वभावनियमनं नान्येन भवतीति सरम्भ उक्तः । मानस्य प्रियसंगमविलम्बहेतुत्वेन दुःखदत्वात् किमित्येवकरणमित्याशङ्क्यैतद्विचारानुदय तत्र हेतुत्वेन वक्तुमेतद्धेतुमाह विद्धेति मूले । पूर्वानुभूतसंगमसुखस्मरणे तल्लोभात् कदाचिन्मानत्यागः स्यादिति तदभावाय दंशः । एवमप्यन्तर्हृदि प्रियस्थितेरावश्यकत्वान्मानस्यापि तत्रैव सत्त्वात् कदाचिदस्य तस्मिन् लयः स्याच्चेत्तदापि मानशैथिल्यं भवेदिति तदभावाय ज्ञाने कौटिल्यम् । निर्दोषभावे हि धर्मिणो मुक्तिः, तस्यातथात्वे तत्सम्बन्धायत्र धर्मिणोऽपि न मुक्तिस्तत्र तस्य कथं सा भवेदिति भावः । प्रमाणनिराकरणार्थमिति । 'सर्वस्येशानः' 'य आत्मानमन्तरो यमयती'त्यादिश्रुतिभ्य ईशितृत्वनियामकत्वादिधर्मवत आज्ञोल्लङ्घनं तदग्रे स्तब्धत्वादिकं प्रभुत्वान्तःकरणं मानान्निवर्तयितुं यतते, अन्तःकरणं च न निवर्तत इति प्रमाणविरुद्धत्वान्न सम्भवति, तच्च प्रमाणबलनिराकरणे सम्भवतीति तदननमेव कृतं भवतीत्यर्थः । यतो लौकिकी भक्तिरिति । लोकरीत्यनुसारी स्नेह इत्यर्थः ।

१० २९ ७ अपराऽनिमिषद्दिग्भ्यामित्यत्र, एषा हीत्यादि । गतदोषा विस्मृतपूर्वदुःखेत्यर्थः ।

तं काचिन्नेत्ररन्ध्रेणेत्यत्र, पूर्वं लौकिकी यारभ्य दृष्टिभेदः स्यादित्यन्तम् ।
१० २९ ८ एका भ्रुकुटिमित्यनेन लौकिकसरूपभाववती निरूपिता । तद्यथा तथोपपादितम् । भक्तिमार्गे हि स्नेहवशाद् बहिर्मुखारविन्ददर्शने तेनैव विस्मृतसर्वा तदन्यन्नापेक्षते, सा त्वपरेत्यनेन निरूपिता । योगे हि ध्याने प्रत्येकमङ्गं पृथक् चिन्त्यते, धारणाया तैः समुदितमेकत्वेन स्वरूपं चिन्त्यते । परस्परसम्बन्धास्मरणपूर्वकमेकाङ्गस्मरणस्यानुचितत्वेनापराधरूपत्वात् । प्रकृते तु स्वरूपस्य रसात्मकत्वेन भावात्मकत्वादेकैकस्यैवाङ्गस्य स्वामिनीभावविषयत्वे तत्र परस्परं भेदापत्तिः स्यात्, सा च अनेन भावेनापास्यते । इदमेवोक्तमन्यथा दृष्टिभेदः स्यादित्यनेन । दृष्टिकृतो भेदः स्वरूपे स्यादित्यर्थः ।

१ त्यक्ष्य इति मू. पा. । २ गाढतास्यैवास्य इति पाठ., गाढतादृश्यैव' ... ।

न च विषयत्वेन स्वरूपस्य भावाद् भेदो वाच्य, एतन्नियमाभावात्, सर्वं ज्ञानप्रमेयमित्यादौ व्यभिचारात्। ईश्वरज्ञानस्य सर्वविषयकत्वेन स्वविषयकत्वस्यापि सर्ववादिसम्मतत्वेन प्रकृते च स्वयप्रकाशचिद्रूपत्वात् स्वरूपस्य न काप्यनुपपत्तिः। एतेषा भावाना व्यभिचारिभावत्वे तु न स्वरूपभेदकत्व स्यात्। स्थायिभावत्वेन तद्भेदकत्वमावश्यकमिति तत्समाधानमावश्यकमिति भाव। **स्वकीयो वा भाग इति।** प्रभुरेताभ्य प्रत्येकमाविर्भूय रस ददातीति सर्वासा भागरूपो भवति। तथा च यदर्थमभिर्भूत यद्रूप तत् तस्या भागरूपमिति तथा। एतेन पितृधने पुत्राणामिव प्रभुस्वरूपे स्वामिनीनामेव स्वत्वमिति ज्ञापितं भवति।

सर्वास्ता. केशवालोकेत्यत्र, क्षुद्रगुणक्षोभयुक्तानामिति। एतासा भगवतश्च गुणाः सर्वे महान्तः। परोक्षभजनस्याज्ञान क्षुद्रो गुण एतासामिति हृदयम्।
१० २९.९ **मुक्ता एव ता इत्यादि।** तदात्यार्तित प्राणेन्द्रियान्तःकरणजीवा भगवत्येव प्रविष्टास्तत्सम्बन्धेन च परमानदं प्राप्नुवन्त इति पुनर्बहिरनुसन्धानमेतादृशीनामसम्भावितमित्यर्थः। **एवमन्यापीति।** एतास्तु न लौकिक्यो, नापि प्रसिद्धमुक्तिमार्गीया, किन्तु वह्निं प्रियसंगमाभिलाषवत्य, भगवांश्च एतन्मनोरथं पूरयत्येवेति तथैव संपत्स्यत इत्यर्थं।

१० २९.१० **ताभिर्विधूतेत्यत्र,** प्राकृतीनामिति। प्राकृतीव इत्यर्थः।

श्रुतयो यथेत्यत्र, श्रुतयो हीत्यारभ्य युक्तिं वेत्यन्तम्। अत्राय भाव।
श्रुतिष्वत्यंशद्वयम्। भगवत्स्वरूपानुभूति, अन्येषा तत्सम्पत्तौ साधनत्व च।
१० २९.१३ तत्र स्वशक्त्यैव चेत्तदनुभवो जातो भवेत्तदा 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सहे'ति न वदेयु। भगवदनुग्रहेणानुभवैकनैयत्याभावे श्रुतिना वाग्रूपवादेव कथने[1] वदद्व्याघातश्च स्यात्[2]। अतः श्रुतीना पूर्वं तदप्राप्तिः, सतत तद्गुणवर्णनेन तदनुग्रहात्पश्चादनुभवो भगवदानन्दस्येति तथोक्तिरिति[3] मन्तव्यम्। एतदेवोक्तं श्रुतयो जाता इत्यनेन ग्रन्थेन। अपरञ्च। 'त त्वौपनिषदं पुरुष पृच्छामी'त्यादिश्रुतिभ्योऽन्येषा भगवज्ज्ञान श्रवणादिभिरेव भवतीति निश्चितम्। तच्च श्रुतीनां वाग्रूपत्वा यतो वाचो निवर्तन्त' इत्यादिश्रुतिभ्योऽसम्भावितम्। एव सत्युभयविरोधपरिहाराय श्रुयुक्त[4] भगवद्धर्मश्रवणेन[5] तत्कृत्या च भगवदनुग्रहे भक्तौ जाताया स्वयमेव

१ वाङ्निवृत्तिकथनं विद्धरवक्त्थने। २ तद्बोधकप्रमाणान्तराभावात्। ३. श्रुत्यर्थापत्त्या। ४ सर्वभावेन भजनम्। ५ यो मामेवमसम्मूढो जानाति पुरुषोत्तमम्। स सर्वविद् भजति मां सर्वभावेन भारत॥

तदानन्दानुभवयोग्यता भवतीति वाच्यम् । तदेतदुक्तं सर्वं चेत्यारभ्य युक्ति वेत्यन्तेन ग्रन्थेन । एवं सति प्रवृत्तेऽशब्दयशोधनार्थमयं दृष्टान्तः । तेन माधुर्यं यत्रयेण निरूपितस्नेहेन वशीकृतेन प्रभुणा कृ वैतासां मनोरथान्तप्राप्तिः । अन्येषामपि कृतपुण्यपुञ्जानामेतदुक्तिश्रवण-कीर्तनादिना एतद्भावानुसारेण भवनेन च भगवदानन्दानुभावो भविष्यतीति युक्तं भवतीति । ननु सर्वथा वागविषयत्वे त्वेव [1]कथनमपि न सम्भवति, अनेनैव प्रकारेण तथा[2]त्वस्य प्राप्ते । किञ्च । भगवदानन्दानुभवहेतुत्वेन हि गुणवर्णनं श्रुतीनां पूर्वमुक्तं तदप्येवं[3] बाधितं भवेत् । तथा सत्येव[4] निरूपणमपि बाधितम्, अतो निषेधमुखेनैव वागविषयत्वं, न विधिमुखेनेत्यस्या श्रुतेस्तात्पर्यमिति[5] चेत् । तत्राहुः श्रुतिश्च तत्प्रतिपादिकेत्यादि । [6]प्रतिपादनं हि तद्बोधकवाक्यकथनम्, [7]बोधश्च न शक्तिग्रहं विना । लोके तद्वाचकशब्दाप्रसिद्ध्या सोऽपि न सम्भवति, अतस्तदर्थबोधो भगवदिच्छयैवेत्यर्थः । अत एव भगवतोक्तं 'मतोऽस्मि लोके वेदे च प्रथितः' इति । गुरुपुरुषोत्तमाभावाय तदिच्छा । यदप्युक्तं सर्वथा वागविषयत्वेत्यादि, तत्राप्युच्यते । जीवानां सर्वपुरुषार्थसिद्ध्यर्थं हि भगवान् वेदमाविश्चकार । तत्र येन रूपेण[8] साधनात्मकेन च पुरुषार्थो यादृशाधिकारिणः सिध्यति, तद्रूपं तं पुरुषार्थं तमधिकारिणं च श्रुतिर्निरूपितवती मोक्षपर्यन्तम् । एवं करणे सन्तुष्टो भगवान् यद्रूपं प्रकटीकृत्य यमानन्दं दत्तवान्, तद्रूपं स आनन्दश्च पूर्वं न ज्ञातो, अधुनापि मनोवागविषय इत्येतादृशमपि फलात्मकं भवतीति ज्ञापनाय चाहुः 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चने'ति । अत्र पूर्वार्धमानन्दस्य विशेषणम् । तथा चैतस्मात्पूर्वं 'रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवती'त्यादिना यद् भगवत्स्वरूपं निरूपितं, तत्सर्वं भावैकलभ्यम्, न त्वन्यथेति ज्ञापयितुं सर्वात्मभावस्य निर्वचनमशक्यमिति तद्व्यञ्जकं धर्ममाहोत्तरार्धेन । एतादृशमानन्दं यो विद्वान् ज्ञातवान् वा स कुतश्चन लोकाद्वेदात् किं बहुना परीक्षार्थं साक्षाद् भगवदुक्तोद्धवनाम्नामादि-दशाया तदतिक्रमादपि न बिभेतीत्यर्थः । मोक्षसाधनस्य स्वकृतिसाध्यत्वेन तत्र श्रवणादीनि साधनान्युक्तानि, अत्र तु भगवदनुग्रहैकलभ्यत्वेन स्वकृत्यसाध्यत्वादनुवाद एव कृत इति । स्वैरुत्तरीयैरित्यस्याभासे, आचाररसेसम्बन्धादित्यादि । स्वामिन्यो

---

१ निरूप्य भगवदर्थं कथयन्ति, इति कथनम् । २ वागगोचरत्वद्वारा भगवत्स्वरूपे बाधितत्वस्य । ३ भगवत्स्वरूपस्य सर्वथा वाङ्मनसागोचरत्वे । ४ दृष्टान्ते मनोरथान्तप्राप्तिनिरूपणम् । ५ ननु पूर्वं सर्वथा वागविषयत्वानन्त्यविवक्षया बाधितत्वे । तथा च प्रतिमन्त्रे दृष्टान्त इति व्यवहाय विरन्तव्यम्, न तु मनोरथान्तप्राप्ति यथाचित् प्रकृत्य तत्र दृष्टान्तादन्यत्र यत्नोऽयम् । ६. समाधानं व्युत्पत्ति । ७. वाक्यतत्त्वबोध । ८ साधनात्मकेन । ९. फलरूपत्वस्वानुभवात् पूर्वम् ।

हि सर्वेशो स्वसम्बन्धमेव प्रियस्यापेक्षन्ते, तदभावस्नाभाव्यात् । प्रभुश्च तदर्थमेवाधुना प्रकट इति न तदन्यस्य तत्सम्बन्धयोग्यतापि । अत एवाग्रे वक्ष्यति· **कल्पितासन्न** इतीति भावः ।

स ईश्वर इत्यत्र, **येषां जलक्रीडायामि**त्यादि । जलक्रीडानन्तरं येषामार्द्रता न तिष्ठतीत्यर्थः । **योगेश्वरान्तर्हृदी**त्यस्याभासे, **अपवित्रे**त्यादि । लोके वेदे

१०-२९-१४. च पवित्रत्वेन यादृशं वस्तु नोपादेयं तादृशमप्येतत्सम्बन्धियोगेश्वरान्तर्हृदयादपि भगवत उपादेयं यत्र, तत्र लोकादिषूपादेयत्वेन प्रसिद्धं यादृशं तादृशस्य एतत्सम्बन्धिनो वस्तुनः का वार्तेति ज्ञापयितुमेवं कथनमिति ज्ञेयम् ।

सभाजयित्वेत्यस्याभासे, **स्वान्तःकरणदोषे**त्यादि । दोषस्यैव विवरणं **स्वकृ-**

१०-२९-१५. **तघ्नतामि**त्यादिनोच्यते । परोक्षं भजता प्रभुणा तादृशो रसो दत्त इति तदज्ञानं स्वकृतघ्नता । प्रभौ दोषाभावात्तदारोप एव तत्र सम्भवति । स च गृह्यमाणस्य स्मर्यमाणस्य वा वस्तुनः सम्भवति । स्वामिनीनां तु प्रियातिरिक्तधर्मास्फूर्तिनियमेन स्वनिष्ठस्यैव एतस्यायमारोप इति भाव । यद्यप्ययमपि रसमध्यपात्येवेति न दोषत्वं वक्तुमुचितम्, तथापि भगवति दोषाभावस्य शास्त्रसिद्धत्वादारोपस्य च भ्रमत्वनियमाच्छास्त्ररीतिमवलम्ब्य तथोक्तम् । अग्रेपि दोषपदं यत्र तत्रेदमेव तात्पर्यं ज्ञेयम् । **विभ्र-मद्भ्रुवे**त्यत्र, **भ्रूर्यम** इत्यादि । यमयति नियमयतीति यम, काल । तथा च कालविलम्बेन स भावः कदाचिन्नश्येतेति तदभावाय तस्यैव भावस्य नियमन सदा स्थितिं तादृशी भ्रूः करोतीति तथा । अथवा । फलस्यैव नियमनमत्राभिप्रेतम् । एतदेवाहुः **यावत्प्रसादेति** । तत्रैवानङ्गभाव एवाशेषस्वरूपानन्ददाता, नान्यत्रेत्यर्थः । **ईषत्कुपिता** इत्यत्र, **साधनैर्निवर्तित** इत्यत्रापि दोषपद पूर्ववज्ज्ञेयम् । काचित्कराम्बुजमित्यादिनोक्तस्वकृतकराम्बुजधारणादीनि साधनानि । ननु स्वरूपेणानिवर्तितो दोषो वचनेन कथं निवर्तिष्यते । तस्मात्तस्य दुर्बलत्वात्तदुपपादितमाद्येऽध्याय इति चेत् । अत्राय भाव । 'रसो वै स' इत्यादिश्रुतिभिर्भावात्मको हि भगवान् । स चाधुना दोषात्मको, रसस्वरूपस्यैव तथात्वात् । स्वामिनीभावाविर्भावमूलकारण वेणुनादात्मकः शब्दः इति निर्दोषपूर्णगुणरूपभावाविर्भावोपि वाग्रूपशब्देन भविष्यतीति किमनुपपन्नम् । किञ्च । यथा वीक्षणेन यो रसः स न स्पर्शादिना । सम्भाषणेन च य, स नेक्षणादिनेति तत्तद्रसस्वभावः । तथास्मांस्त्यक्त्वा गतः कथमिति भावस्तादृग्वचनैरेवेति शिशिरय निजहृदयम् । आद्येऽध्यायेप्येवमेव ज्ञेयम् । अत सुष्ठूक्तं **साधनैर्निवर्तित** इत्यादि । ननु भजनाभजननिर्णयस्य प्रभुविषयकत्वयोद्देश्ये सति साधारण्येन प्रश्ने को हेतुरिति चेत्, उच्यते । भगवद्विषयकप्रश्नस्यैवाद्य क्रियमाणे

वयमेतादृश्यो भक्तास्त्वमेतादृशीरस्मान्कथं त्यजसीति हि प्रश्नः स्यात्। स च नायिकोत्तमानां स्त्रीरत्नानामग्रे भगवता स्तुयानां स्वामिनीनां मुखाम्बुजान्न निःसर्तुमर्हति, किन्तु ग्राम्याणां रसाभासयुक्तानामेव स्यात्। न हि विकचशारदसरोरुहात् तिन्तिणीरसस्पन्दः सम्भवति। अतो व्याजेन प्रश्ने भावगोपनेन महाग्रस इति मुख्यरमणाभावादेव तथोक्तिरिति बुध्यस्व। भगवांस्तु जीवेभ्यः स्वस्य वैलक्षण्यं वक्तुं तत्स्वरूपज्ञानं विना ततो वैलक्षण्यं ज्ञातं न भविष्यतीति तत्स्वरूपमुक्त्वा स्वस्वरूपमुक्तवान्। अन्यथा स्वामिनीतात्पर्यविषयः स्वयमेवेति तान्न निरूपयेत्।

भजतोऽनुभजन्त्येक इत्यत्र, **तेषां त्रयाणा**मित्यादि। भजनानुसारेण भजनकर्ता
१०.२९.१६. प्रथमः, अभजतो भजनकर्ता द्वितीयः, उभयाभजनकर्ता तृतीय। द्वितीयो
यमभजन्तं भजते स एकः प्रतियोगी। तृतीयो यं भजन्तं न भजते स
द्वितीयः प्रतियोगीति ज्ञेयम्।

भजन्त्यभजतो ये वा इत्यत्र, **धर्मस्तेपक्षे**त्यादि। धर्मार्थं यो भजते तस्य
धर्म एव मुख्य इति भजनीयस्तच्छेपः। एवं सति भजनकर्तु पातकादि-
१०.२९.१८. सम्भवे तद्दोषो निवर्तनीय एव, कृतघ्नतापरिहारार्थे यर्थः। ननु पुण्येनैव
पापनिवृत्तिरित्यस्य तत्र नोपयोग इत्यत आहुः **तदीय एवे**ति। धर्मशेषीय एव धर्मो भजनद्वारा भक्तेषु गच्छतीत्यर्थः। ननु विहितत्वात्तद्भजनस्यापूर्व एव धर्मस्तेनोत्पद्यत इति चेत्। नैवम्। तादृक्फलसाधकत्वेन तद्भजनविधाने भजनीयनिष्ठतादृग्धर्मवत्त्वस्यैव प्रयोजकत्वात्, 'तेजस्कामोऽग्निमेव तेजस्वन्तं स्वेन भागधेयेनोपधावती'त्यादिश्रुतिभ्यस्तथा निर्णयात्। अन्यथा तेजस्वन्तमिति न वदेत्। न चामूर्तत्वं बाधकमिति वाच्यम्, अलौकिकस्यार्थस्य लोकरीत्या निर्णेतुमयुक्तत्वात्। 'अलौकिकास्तु ये भावा न तांस्तर्केण योजये'दिति श्रुतेश्चेति दिक्। निषेधस्य प्राप्तिपूर्वकत्वनियमेनात्र चापवादनिषेधोक्तेर्यत्र धर्मापवादसम्भावना स एवात्र धर्मः परिगृहीतः, यत्र न तत्सम्भावना न सोऽत्र विवक्षित इत्याशयेनाहुः **तत्र धर्मे** पत्रे यादि। नित्यं कर्म कर्तव्यत्वेनैव यत्र क्रियते तत्र तदेव प्रधानम्। यत्र देवताराधनेनैव धर्मस्तत्र सा प्रधानम्। न चोक्तेषु धर्माभावादविवक्षितत्वमिति वाच्यम्। भगवता हि निर्णयः क्रियते। स च सन्दिग्धे कर्तुमुचितः, उक्तेषु सन्देहाभावादत्राविवक्षितत्वात्।

भजतोपि न वै केचिदित्यत्र, **ये दयाधर्माधिकारिण** इत्यादि। धर्मार्थं
भजत्सु धर्मं सम्पादयितुमधिकारिणः समर्थास्तान् ये न भजन्ति ते त्वधमा
१०.२९.१९. इत्यर्थः। अकृतज्ञत्वादिदोषवत्त्वेन त एवाग्रे वाच्याः। लौकिकमेव निमित्तं

भजने येषां ते लौकिकनिमित्तास्तान् ये न भजन्ति ते उत्तमा इत्याहुः ये **लौकिकनिमित्ता** इति । त एव आत्मारामत्वादिधर्मवत्त्वेनाग्रे वाच्याः ।

न पारयेहमित्यस्याभासे, **भक्तिमार्गविरोध**मित्यादि । ननु 'नाहं तु सख्य' इत्यादिना साधनमार्गीयभक्तविषयकमभजनमुक्तम्, प्रकृते च परोक्षभजनमुक्तम्, अनुवृत्तिवृत्त्यर्थं परोक्षभजने च हेतुत्वेनैवं मदर्थेत्याद्युक्तम् ।
१०-२९-२१.
तथा चैतद्भजनानुरूपमेव स्वभजनमुचितम्, न तु कामपि मर्यादां स्थापयित्वा । तथा सति भक्तिमार्गविरोधापत्तिः । एतादृशीनां दुःखदर्शनमपि स्वस्य तद्विरुद्धमिति प्राप्त उच्यते । अत्र स्वामिनीभजनानुरूपं न भजनमिति हि तत्राशङ्का । तत्तु प्रावाहिकधर्मरूपम् । एतदेव भगवताप्युक्तं मत्तयस्फलार्थिनो यादृशं भजनं तत्फलं दत्वा ततो विमुच्य[1] इत्याशयेन 'ये यथा मा'मित्यादि । अत्र यथातथेति पदाभ्यां भजनप्रकारयोरप्येकरूपत्वमुच्यते । प्रकृते च दास्यं प्रकारः । स च भक्तधर्म एव, नत्वीश्वरे सम्भवति । कदाचित्क्रियमाणमप्यनुकरणवद् भवति । न हि महाराजः कदाचित्संतोषेण स्वसेवकाङ्गमर्दनं कुर्वन् दासो भवति । तथा प्रकृतेपि रसवशात् मानिनीपदपद्मपरागानुरागं कुर्वन्नपि पतिरेव, न त्वन्यथा भवतीति न प्रत्युपकृतिसम्भवो भजनानुरूपं भजनं वा । एवं सति प्रत्युपकृत्यपेक्षया तदभावेन दोषारोपो न कार्यः, अशक्यत्वादित्युक्तं भवति । नन्वेवं सति सुतरां परोक्षभजनमनुपपन्नम् । न ह्यप्रत्युपकार्यभजनासु दुःखहेतुकृतिः सम्भवतीति चेत् । अत्र ब्रूमः । रसात्मकः प्रभुरित्यविवादम् । स च संयोगविप्रयोगभेदेन द्विविधः । तत्रान्यतराभावे त्वसम्पूर्ण एव सः स्यात्, अतः सम्पूर्णं रसं दत्वा तदुत्तरकालीनदोषारोपात्मकव्यभिचारिभावोत्पत्तौ सच्छान्तिर्वचनैः कृता, तस्याग्रिमरसानुभवविरोधित्वादिति न किञ्चिदनुपपन्नम् । एतेनैतादृशीषु दुःखदर्शनं स्वस्य भक्तिमार्गविरुद्धमित्यपि निरस्तम् । एवं सतीश्वरत्वमेवाशक्तौ हेतुरित्याशयेन प्रभुराहेत्याहुः **भक्तिमार्गविरोधं परिहर्तुमिति** । नन्वेतेन स्वस्येश्वरत्वमेवोक्तं भवति, न त्वेतत्स्तुतिरिति चेत् । अत्रायं भावः । यद्यपीश्वरत्वेनोक्तरीत्या प्रत्युपकारकरणं न सम्भवत्येव, तथापि तर्कितमुच्यते, यदि कथञ्चिन्मयि दास्यमापद्येत, तथापि निरन्तरं दास्यकरणेपि कदाप्यनृणो न भवामीति प्रभुणा निरवद्युत्कर्ष उक्त इति का वाच्या स्तुतिरेतदग्रे । अन्यथा 'विबुधायुषापी'ति न वदेत्, 'स्वसाधुकृत्यं न पारये' इत्येतावतैव चारितार्थ्यात् । नन्विदमितरभक्तसाधारणमिव भाति । तथा हि । चतुर्वर्गार्थिषु तद्दानस्य प्रत्युपकृतिरूपत्वेपि प्राप्तात्यन्तिकभक्तियोगेषु सेवातिरिक्तानपेक्षणात्तस्याश्च स्वतन्त्रपुरुषार्थत्वात्किं वा प्रत्युपकृतित्वं

1. विमुच्यते मू. पा. ।

भजेत । प्रकृतेपि दास्यातिरिक्तानपेक्षणान्न प्रत्युपकृतिः सम्भवतीति कोऽत्र विशेष इति चेत् । अत्रेदं प्रतिभाति । न ह्यपेक्षितत्वेन प्रत्युपकृतिर्व सम्भवति, स्वाप कृत्वाऽधिकप्रेप्सोरधिक कृपा स्वपरप्रेप्सोश्चार्थे व्यभिचारात् । अत स्वरूपतः पूर्वकृत्यनुरूपत्व मृग्यम् । तत्रापेक्षानपेक्षे अप्रयोजिके । स्वामिनो भजनानुरूप भजनमीश्वरेऽपि न सम्भवति, किं पुनर्नरे । यच्चोक्तं प्राणायन्तिकेत्यादि, तत्राप्युच्यते । ते हि पूर्वं सकामत्वेन नियकर्तव्यत्वज्ञानेन वा प्रवृत्ता मध्ये भगवदनुग्रहेण सेवारसानुभवे जाते यावेभ्यो त्यक्तवन्तः स्वार्थं, न तु तदर्थं तथा । एवं सत्युत्तरोत्तर तादृक्सेवासम्पादनेन तदेकसाध्यसुखदानमेव प्रत्युपकृतिस्तेषु । अत्र तु 'त्वदुपासनाशाः' 'एव मदर्थोज्झितलोकवेदे'त्यादिवाक्यैस्तन्नान्तः पूर्वमेव त्यागः । प्रभौ सहजस्नेहाऽत तत्सुखे स्वोपयोग मत्वा तत्प्रतिबन्धक दुर्गीकृत्य स्व निवेदितवत्यः । अत एव 'यत्ते सुजाते'त्याद्युपपद्यते । अत एवैव मदर्थोज्झितेत्यत्र स्वत्यागोऽप्युक्तः । स्वार्थमन्यत्यागो लौकिकानामलौकिकानां च पुंसा सम्भवति, न तु यथाकथञ्चिदपि स्वत्यागः । अत्र स्वपदेनात्मोच्यते । तथा च स्वात्मत्वेन स्नेहविषयत्वाभाव एवैतत्त्यागः, भगवदुपयुक्तत्वेनैव तस्य देहादेश्च स्नेह-विषयत्वात् । एवं सति भगवद्धर्मात्मा प्रियो, न स्वात्मार्थं भगवानित्यागतम् । खण्डनादिष्वपि स्वसम्बन्धसुखानपेक्षितत्वेव दुःखे माने च हेतु । तथा च भगव-त्सुखसम्पादने केन प्रत्युपकृत भवेत् । न धनसाधनसम्पादनमेव प्रत्युपकृतिरस्त्विति वाच्यम्, अत्र भावस्यैव साधनरूपत्वात् तस्य पूर्वकृतापन्नत्वात्मदेकरूपत्वेन नियत्वेना-साध्यत्वाच्च । किञ्च । भावसत्त्वेनैव यद भवति तत्र न भगवत्कृत्यपेक्षा, 'यदो कुर्वन्ति मां भक्त्ये'ति वचनात् । अन्यच्च । 'गोप्यो मत्वा म स्वहृदयं ता'मुपगम्य सवाक्यारसारात्युक्तानां तेषां 'पश्यन्ति ते मे' इत्यनेन स्वरूपरसानुभवमुक्त्वा एतादृशानामपि 'भक्तिरनिच्छतो मे गतिमण्वीं प्रयुङ्क्ते' इति श्रीविदुरेणोक्तम् । इदं तु रसमार्गीयाह्लादकार इति न कदाचिदपि तदिच्छानुरूपा इति सम्भवन्, तस्य रसस्य तद्दशायामेव । अतएव । स धर्ममार्गोऽन्य धर्ममार्गे इव येभ्य इयान् विशेष इति कथं वदाम, खद्योतेभ्य इव तरणे । अतः सुकृतं न पारय इति । यद्यपि गेहश्रृङ्खलाभ्यदस्य भावस्वभावकार्यं तासां च भगवदनुग्रहैकसाध्यत्वात् तदश्रृङ्खलात्यागेऽपि भगवतैव कृतो भवनान्ति नैन्दुत्कर्ष आयाति, तथा यशो च यत्र भावा दत्ता, नायेभ्य इयेनदुःखं । अत एवैतस्यैव प्रत्युपकृतत्त्वपच सम्बन्धोत्कम् । तर्हि 'न पारय' इत्युक्तवान् । प्रत्युत एतादृग्भावदानरि प्रत्युपकृतत्वमन्तरेऽपि यत्र स्वतन्त्रा इति चेत् । अत्रेदं प्रतिभाति । पूर्णानन्दशक्तिपूर्णस्यापि प्रभोरत्यर्थं दाने तद्रूपत्वाभाव एवेति निश्चयः । न हि सर्वसामर्थ्यवत्त्वेन

द्वितीयमीश्वर कर्तुं समर्थ । अत एव प्रभुणोक्तं 'न शक्य तेऽनुसंख्यातुमनन्तत्वान्मयापि ही'ति, तथा प्रकृतेपि केवलभावस्य रसात्मकत्वेन भगवदात्मकत्वात्तदनुरूपस्वभावादशक्तिरेव निष्प्रत्यूहेति मन्तव्यम, अन्यथा ईश्वरत्वमेव न स्यात्, श्रुत्युक्तरूपाभावादिति बुध्यस्व। वैपरीत्यापत्तिरिति दूषणं यदुक्तम, तत्रोच्यते । कर्मज्ञाने साधनमार्गीयभक्तिं च जीवार्थं कृतवान् भगवान्, फलमार्गीयभक्तिमार्गं तु स्वार्थमाविश्चकार। अन्यथा रसात्मकस्वस्वरूपानन्दानुभवो न स्यात्, 'तस्मादेकाकी न रमत' इति श्रुते । तथा च भावदानादेरपि स्वार्थत्वान्नोक्तदूषणम् । नन्वेवमपि 'न पारय' इति नोपपन्नमिति चेत् । न, अस्यानन्दस्य स्वरूपात्मकत्वेप्येताभ्य एव तदनुभवादनुभूतस्य च वस्तुन एवैतादृशत्वेनैव कथनस्य तत्स्वरूपनिरूपकत्वात् । यथा 'विस्मापनं स्वस्य च सौभगर्द्धे'रित्यत्र वस्तुस्वरूपनिरूपणम्, तथात्रापीति सर्वमनवद्यम् । अत्र पूर्वार्धेनैवैतत्स्तुतिसंपत्तावप्युत्तरार्धकथनस्य तात्पर्यमाहुः अतो मयीत्यादिना । अत्रोपकृतेरेव प्रत्युपकृतिरूपत्वोक्त्या तदभिन्नतदपेक्षायां सोपाधिभजन कार्यं भवति, तथा च भजन एव तत्सम्भवात् । एतदेवोक्तं नो चेदित्यनेन । तच्च भवतीष्वसम्भावितमशक्यत्वादित्याहुः न ह्यशक्यमित्यनेन । प्रत्युपकृत्यशक्यत्वं भगवन्निष्ठोपि हेतुरिति ज्ञेयम । इत्येकोनत्रिंशोध्यायः ॥

त्रिंशत्तमाध्यायार्थकथने, त्रिंशत्तमे हरिरित्यादि । इतिशब्दो हेतुवाची। लीलां चक्रे इति । लोके प्रकटामिति शेषः । तथा सत्ययं वाक्यार्थ ।

१०-३०० यद्यप्यतिगोप्यत्वादियं लीला न वक्तुमुचिता, तथापि प्रभुर्लोके प्रकटां लीलां चक्र इति हेतोरीर्यत इति, अन्यथा रासलीलेर्यत इत्येव वदेयु । सा च 'यथा मदच्युद् द्विरदः करेणुभि'रित्यन्तेन ग्रन्थेनोक्ता । एतदमेतिदेशेन कामशास्त्रोक्तरीत्यापि सोक्तेत्याहु कामकलामपीति । इन्द्रो विषयभोगेऽभियुक्त इति तन्नामग्रहणम् । वस्तुतस्तु ब्रह्मादीनामपि दुर्लभेव । कामकृता सा हि लोकानुसारिणी भवति । एवं सति यत्र सापीन्द्रादिदुर्लभा, तत्र पूर्वोक्तलीलायास्तथात्वे किं वाच्यमिति भावः । लीलोक्तिप्रस्तावे फलश्रुतिरसंगतेत्याशङ्क्य तत्तात्पर्यमाहुः अस्या इति । लोके कामकथा तदुद्बोधिका दृष्टेति तच्छङ्कया वैराग्यार्थी कदाचिन्न शृणुयात्, तथा भक्त्यर्थ्यपि, मातृणां रहस्यवार्ता न श्रोतुमुचिता, तथा सति चित्तवैषम्येतिमहा दोषः स्यादिति शङ्कया, न शृणुयात्। एव सति विपर्ययेनानिशिष्यते । तथा सति तु हीनाधिकारिविषयत्वेनोत्तमत्व न स्यादित्येतत्सर्वपरिहाराय फलश्रुतिरित्यर्थः । विषयिणं पूर्वं विषयत्वेन श्रवणेपि तत्स्वभावादेव दोषनिवृत्तिपूर्वकं परमपुरुषार्थप्राप्तिरिति भाव । अन्ते प्रश्नोत्तरयोस्तात्पर्यमाहुः लौकिकपपीति । सर्वथा प्रपन्ना दृष्ट्वाऽदेयमपि स्वल्पानन्द ददत्वानिति तु वक्तुरिष्टं ।

विरुद्धत्वज्ञान एवेत्यर्थः । प्रकृते भगवद्वचनानुभावात्पूर्वसान्निध्यानुभवोऽधुना सम्पन्न इति नानुभवविरोधोऽतो न सन्देह इति भावः ।

गोपिमण्डलमण्डित इत्यत्र, **उत्तरोत्तरेति** । उत्तरोत्तरक्षणसम्बन्धिभिरित्यर्थः ।

१०-३०-३. **पूर्वपूर्वेति** । पूर्वपूर्वक्षणसम्बन्धीत्यर्थः ।

जगुर्गन्धर्वपतय इत्यत्र, **अन्यथा भगवद्धस्तेत्यादि** । अत्रायं भावः ।

१०-३०-९. यथा भगवल्लीलामात्रोपयोगिनो नटा इव विश्वावसुप्रभृतयः, तथा भगवद्हस्तदतादिमात्रोपयोगिक्रियाशक्तिमन्त इन्द्रादयो दिक्पालेभ्यो भिन्नाः सन्ति, ते त्वेतद्भुजदण्डमात्रावलम्बाः, तयो रसरूपत्वेन रसात्मकक्रियाशक्तिप्रधानानामेव तत्र स्थितेरुचितत्वात् । अत सुष्ठूक्तं भगवद्धस्तेत्यादि ।

काचित्समं मुकुन्देनेत्यत्राभासः । उत्पन्नस्य नादस्येत्यादि । अत्रायं

१०-३०-१०. भावः । अयं नादो न लौकिकः, पूर्वसिद्धो वा, किन्त्वलौकिकोऽपूर्वः । स च भगवतोऽन्यभावनिवृत्तिपूर्वकं स्वमात्रविषयकभावोपत्त्यर्थं प्रत्येकं कृतः । अयं च स्वामिनीनामुक्तभावानुरूपभगवद्विषयकभावविशेषो यतो रसानुभावको भवति । मूलकारणत्वात्स्वामिनीगानस्य तथात्वम् । इदमेवामृतमपायम् । सा च भगवन्नादेनेति तथा कृत । अपरञ्च । स्वामिन्याः स्वरजात्युन्नयने प्राधान्योक्त्या प्रभोस्तत्सहभावोक्त्या ततः सकाशादस्य माधुर्यं लक्ष्यते । अन्यथा प्रभोस्तारनादेनाभ्यामिभवे रसाभास एतद्वैयर्थ्यं च स्यात् । साम्ये तूभयोः स्वातन्त्र्येण करणात्परस्परानुगुणत्वेन च मिथो रसानुपयोगित्वप्रसंगः । स्वयं नादस्वरूपमज्ञात्वा भगवन्नादं श्रुत्वा[1] तत्स्वरूपनादकरणेपि तथा । अतो भगवद्विचारितानुपूर्वीं स्वयं ज्ञात्वा तथैवोन्नीतवतीति ज्ञेयम् । पूर्णरसोदयो भगवति जात इत्यपि ज्ञापनाय तदधीनत्वमपि ज्ञापयितुमेवं कथनम्, नायिकाप्राधान्यस्य एतद्रसस्वभावरूपत्वात् । एवं सति तारनादसाध्यजगत्पूरणं मधुरेण न भवति । अन्यधर्मनिवृत्तौ ह्येतेन पूरणं भवति । तदर्थमेतत्स्वरूपे रसाभिज्ञा निरूपिका एवेति । यथा 'तं त्वौपनिषदं पुरुष'मिति श्रुतेस्तदुक्तमेव भगवत्स्वरूपम्, तथैव निरूपितधर्मवदेव पुरुषोत्तमस्वरूपम्, नान्यधर्मविशिष्टमित्येतज्ज्ञानस्यौपनिषज्ज्ञानस्वरूपत्वादेतच्छ्रवणेन भगवति प्राकृतधर्मराहित्यज्ञानं स्वस्मिंश्च तत्सम्बन्धिनोनान्यधर्मराहित्यं तज्ज्ञानं च भवति । तदनन्तरं भगवदानन्दानुभवो भवति । एतदनुगानकार्यम् । एवं सत्येनेन जगत्पूरणं भवत्येवेति सर्वमवदातम् ।

---

१. [illegible]-मू प. ।

काचिद्रासपरिश्रान्ते त्यत्र, भगवतः स्थिरत्वायेति । कदाचित् प्रभुर्गदामवष्टभ्य तिष्ठति चलति वा । यथैनस्तत्स्थाणस्खलनं न भवति, तथा तद्गृहीतस्कन्ध
१० ३० ११ एव यथापूर्वं मण्डलं नृत्य चानुवर्तयतीति ज्ञाप्यत इत्यर्थः । हस्ताधिरूढा-
लिङ्गनमिति । 'रणचरणमेकेनोरणाक्रम्य स्विन्नश्वसितमपरपादेनाश्रयन्ती तदूरुम् । निजमथ भुजमेक पृष्ठतोऽभ्यार्पयन्ती'त्यादिना रसशास्त्रे निरूपितम् ।

हृष्टरोमा चुचुम्ब हेत्यत्र, सदानन्दत्वादिति । चुम्बनेन हि रस आस्वाद्यते । अधरादिवद् बाहौ न रसोऽतः कथं तथेत्याशङ्कानिरासायेदमुक्तम् । चन्दनाले-
१० ३० १२ पतात्पर्यमाहुः विवेकधैर्येति । अङ्गरागस्यानुभावात्मकत्वेन प्रचुरभाव-
विशेषजननाद्येन तयोर्नाश इत्यर्थः । बाहौ तथा कृतिर्न लोकसिद्धाऽतः सखीनां समक्षं कथमेवं करोमीति विवेकः । एकान्तसमयप्रतीक्षया स्थितिर्धैर्यकार्यम् ।

कस्याश्चिन्नाट्यविक्षिप्तमित्यत्र, अनेन तस्यै स्वविद्येति । यथा सर्ववेदान्त-
१० ३० १३ वाक्यानां निष्पीडितोऽर्थो ब्रह्मविद्या, तथोपनिषदादिवागधिपतिना रसात्मकेन स्वान्तस्थ भावविषयकस्नेहकणाभिर्निष्पीड्य स्थापितं ताम्बूलचर्वितमिति तथेत्यर्थः । दानप्रयोजनमाहुस्तेनैवमेवेति । विप्रयोगदशायामुपस्थितमरणनिवर्तक-
वाक्यकथनेन सखीनां जीवयित्री भविष्यतीत्यर्थः । ब्रह्मविद्या हि ब्रह्मप्रापिका । अत्रापीयं स्वामिनी प्रियं प्रापयिष्यतीति भावः ।

नृत्यन्ती गायती काचिदित्यत्र । अपरा पुनर्दैन्यपात्रमस्मि यदि । अत्रायं भावः ।
१० ३० १४ यद्यपि स्नेहातिभरेण विप्रयोगासहिष्णुत्वेऽप्यासां समाधानं न सम्भवतीति तथापि यथा यासां समाधाने शक्तिर्भवति, तथा पूर्वदत्तज्ञानकार्यसिद्ध्यर्थं विचारातिरूपमनुनीयमन तथापि कार्यभ्रमसन्दिग्धत्वेन फलाव्यभिचारित्वेन तथापि स्वकार्यनिवर्तकं तथाऽकरोदिति तात्पर्यतस्य ज्ञानसहायत्वं च वैराग्ये प्रसिद्धम् । यद्यपि स भावोऽत्यावश्यकस्तथापि प्रभुसम्बन्धित्वेन यथा स तथा तथा हस्ताब्जमपि तथेति । तदेभयोरनुभयोभयकार्यगम्भत्वेन विनिश्चितमहारमाणो भाव उपपद्यत इति भावः । ननु पूर्वोत्तरयोरेकोत्तरनायिकयोर्मिथो भेदेनदं सर्वमनुपपन्नमिति चेन्न । नैवम् । अत्र ऐश्वर्यादिषड्गुणरूपा एता एव । अत एवैकैकशिष्टमेव स्वरूपं भगवच्छन्दवाच्यमिति निरूप्यते । धर्मधर्मिस्थानीयक, तथापि धर्मभेदात्सर्वोपपत्तिः । तथा च भगवतो ज्ञानवैराग्ये वियोगदशायां स्वामिनीनामेवार्थे उपयुज्येते इत्युक्तं भवति । एतेन नृत्यसमये प्रभोरपि रसात्मकत्वेन स्वामिनीविरहजम रसं पर्यवसितं नेन्याप्यत भवतीति सूच्यते ।

गायन्त्यस्तं विजह्रिर इत्यत्र, इयं क्रिया शक्तिरूपेति । शक्तिरूपा भग-
१०-३०-१५. वत्सामर्थ्यरूपेत्यर्थः । तस्मिन्सति स्वातन्त्र्यमुचितमिति भावः ।

उपक्रमात्प्राप्तेऽपि नृत्ये यत्पुनर्वार्तोक्तिपूर्वकं नृत्यकथनं तत्कञ्चन विशेषमाश्रित्येति
१०-३०-१६. तमाहुः अतः परं राधादामोदरवदिति । अथवा रसावेशजनिता
मर्यादारहिता क्रिया विहार इति तदुक्त्योत्तरस्यादिना पूर्वस्यावसानमिति
न्यायवत् पूर्वनृत्यविरामो ज्ञाप्यते । तथा सति पुनर्नृत्योक्तिरुचिता । तच्चेत्पूर्ववदेव
स्यात्तदा तत्यागो न स्यात् । रसार्थमेव तत्करणात्तदुदयं विना तत्यागासम्भवात् । एवं
सत्यपूर्वरसार्थमेवापूर्वमेव नृत्यमथोच्यत इति ज्ञायते । तदेवाहुरतः परमित्यादिना ।
कर्णोत्पललालकेत्यत्र, स्वतो वेत्यादि । श्रमाभावज्ञापकधर्मथोक्थनेन रसावेशादे-
वैतदपि नृत्यं जायत इति तस्मिन्भवति सति स्वत एव पूर्वविहारवृत्तिर्जातेति सूच्यत
इत्यर्थः । अथवा । क्रीडाया अनिवृत्तिः क्रीडानिवृत्तिः । श्रमाभावसूचनेन पूर्वक्रीडाया
निवृत्तिर्न स्वामिनीनामशक्त्येति सूच्यत इत्यर्थः । गोप्य इति । भगवत एवेत्यादि ।
भगवत्साम्येन नृत्यकृतिर्न पूर्वशिक्षया गोपजातीयानां, तत्रापि कुलवधूनां, तदसम्भवात्,
किन्तु तथा रसाविर्भावो येन तथा नृत्यं स्वत एवाभूदिति ज्ञापनायेत्यर्थः ।

रेमे रमेश इत्यस्याभासे, ननु प्राकृतीभिरित्यादि । अत्राप्राकृतत्वं निरूपयितुं
तद्विपरीतधर्मोक्तिः पूर्वपक्षे । सिद्धान्तस्तु ब्रह्मानन्दरूपत्वेनाप्राकृती रमा ।
१०-३०-१७. भगवांस्तु तदीशत्वेनाप्राकृतीरमणैकस्वभावः, तेनात्र रमणोक्त्यैवाप्राकृती-
त्वमप्युक्तमेव भवतीति भावः । किञ्च । स्वामिनीनामप्राकृतत्वे का नाम शङ्का, यत एत-
त्सम्बन्धद्वारैव रमापि प्रभुसम्बन्धं प्राप्तवती, नान्यथेत्याहुः रमापि भगवदाज्ञयेत्यादि ।
तदुक्तं 'श्रयत इन्दिरे'त्यादि । तथा च स्वामिनीषु प्रभोः स्नेहभरदर्शनेन स्वयं तत्र प्रविश्य
तद्द्वारा प्रभुसम्बन्धं प्राप्तुमिच्छन्त्यपि तन्महत्त्वस्फूर्त्या स्वयं न प्राविशत् , किन्तु तदार्तिं
दृष्ट्वा तन्निवृत्त्यर्थं प्रभुणाज्ञापिता तथाकरोदिति ज्ञापनायोक्तं भगवदाज्ञयेति । अपरञ्च ।
यदा नागरीवदस्मदतिरिक्तायाः प्रभुसम्बन्धो मा भवत्विति चित्तकौटिल्यं स्यात , तदा रमा
न तथा कर्तुं शक्नुयात् , एतास्तु सर्वथाङ्गीकृतरजःसम्बन्धिन्य इत्यतिसौजन्यादिगुणवत्य
इति सुखाराध्या इति रमायान्तःकरणमित्याशयेनाहुस्ता अप्यधिष्ठानयोग्या इत्यादिना ।
नन्वेतदसम्प्राप्त्यर्थं ह्येतदाज्ञापनम् । सा चोभयोरपि दम्पतिभावस्य जागरूकत्वेनाना-
संभाविता । एवं सति प्रियस्यापि पूर्वभावविलक्षणभावोत्पत्त्या रमाभावप्रसंगेन पूर्वरसस्यापि
भञ्जिकेयमाज्ञा, स्वोष्ठस्पर्शमप्यसहमाना रितवपथमपि क्षीरं नीरं पाययन्ती गौरिव–
अतस्तत्सम्पादनमनुचितम् । किञ्च । मत्सभावे हि ब्रह्मानन्दाविर्भावो, रमा चैतद्रूपा ।

स्वामिन्यस्तु ततोऽधिकभगवद्रसभाववत्योऽतस्तत्सम्बन्धोऽत्राशक्यवचनं इत्याहुर्नन्वेत-दप्यनुचितमित्यादिना । अत्रार्भकदृष्टान्तेन समाहितेरयमाशयः । यदुक्तं रमावेशे रसाभासप्रसंगः पूर्वरसविच्छेदश्चेति, तत्रोच्यते । यथा स्वप्रतिबिम्बं पश्यन् बालो दर्पणादौ गृहादिप्रतिबिम्बे सत्यपि स्वप्रतिबिम्ब एव रमते, न तु तदन्यस्मिन्, अत एव मूले स्वपदोपादानम्; तथा स्वामिनीषु रमासमागमेऽपि स्वस्य रसरूपत्वेन तदात्मकान् भावानत्र दृष्टवांस्तत्रैव तदनुरूपभावचेष्टावानेव रेमे, न तु रमास्फूर्तिरपि, येन भार्यात्वज्ञानेन पूर्वरसविच्छेदः स्यात् । तस्य रसस्य तादृक्स्वभावत्वादेव तथात्वं प्रभोः । अर्भकस्य स्वभावस्य तथात्वात्तस्येव । रमायास्तु भगवति भर्तृभाववत्त्वेन न मुख्यरससम्प्राप्तिः, अत एव 'नायं श्रियोऽङ्ग उ नितान्तरते'रिति श्रीमदुद्धववचनम् । किन्तूक्तभावविशिष्टप्रियाङ्गसंगित्वेना-ङ्गनाङ्गसंगित्वेनैव पूर्वमननुभूतजातीयः कश्चनानन्दविशेषः समजनि, येन सर्वविस्मृतिरभूत् । एतेनैव रमाप्रवेशे स्वामिनीनां भाववैलक्षण्येन पूर्वरसविच्छेद इति निरस्तम् । नहि प्रतिबिम्बाश्रयस्य तज्ज्ञानं लोके क्वचिद्दृष्टचरम् । ज्ञानस्य तद्धर्मत्वेन तत्र तदसम्भवात् । अपि च । स्वामिनीनां प्रभोश्च तज्ज्ञानेऽपि न काचित् क्षतिः । यतो रसाभासभावाभासैर्मुख्यो रसः पोष्यते । प्रकृते च तदावेशात् क्षणमात्रं तथाभावोऽग्रिमक्षणजायमानरसविशेषानुभा-वक इतीष्ट एव । अतः प्रस्तुतस्त्रीघोषाभारधाराभरेण शिवयशोभाण्डाग्रपर्यतिशयेन पूरयन्त्यमुना गौरिवेयमाशेयुक्तितरा ।

यच्चोक्तं भक्तभावभियान तदानन्दरूपाया रमायाः सम्बन्धोऽनुपपन्न इति तत्रोच्यते । न हि भजमानात्मकमाधनेनाविर्भवद्ब्रह्मानन्दो रमा, तस्य तद्विशिष्टेषु पुरुषेष्वप्याविर्भावात्, अस्याः पुरुषोत्तमैकनिष्ठत्वात्, किन्तु पुरुषोत्तमस्य रसात्मकत्वेन स यादृग्विधस्तादृग्विधोऽयं निरूपणीयः । तथा च स्निग्धदम्पतीभावोऽप्येकस्य प्रकार इति तदात्मकानन्दप्रकाशिका । 'अर्धो वा एष आत्मनो यत्पत्नी'ति श्रुते स्वयमपि तदर्धत्वेनानन्दरूपा । अतः पुरुषोत्तमस्य या शक्तिः सा रमा ब्रह्मानन्दशब्देनोच्यते । तथा च एतादृश्याः सम्बन्धयोग्यतास्तीत्यत्र प्रवेश उपपद्यत इति । स्वामिनीनां प्रभोश्च रमानुसन्धानपक्षमाश्रित्य 'बालको ही'त्यारभ्य 'रमापर्यायै'रित्यन्तो ग्रन्थ उक्तः । अनुसन्धानपक्षमाश्रित्य ब्रह्मेत्यादिः । अत्र ब्रह्मपदेनो-द्दीपनानुभावकत्वादिनिमित्तविभावितो व्यभिचारिभावपुष्टो मुख्यो रस उच्यते । अविकृतो नित्योऽयं रस इति ज्ञापनाय ब्रह्मपदोपादानम् । ब्रह्मानन्दपदेन पूर्वोक्तो मुख्यरसपोषको रमावेशजनितो भावविशेष उच्यते ।

ननु रमासामर्थ्यादिस्थापनेनैव चेद्रमणम्, तदा रेवत उत्तमनायिकाचार्यास्या स्वामिनीषु भगवतश्च रमासामर्थ्यादियोजनप्रसंगेनोत्तमरसाननुभवप्रसंग इत्यरुच्या पक्षान्तरं

यक्तु तामुद्भावयति नन्वेतदपी यादिना । सामर्थ्यादि योजयि वा रमणे विलक्षकर्म यप्रसंगे नोनुचितमिदमित्यर्थ । पक्षा तरे दशा तस्यामासमाहुः किमनेनेति चेदित । स्वामिनीनामेवार्थ अस्या लीलाया क्रियमाण वाद्रमावेशेन रमणेन स्वामिनीना किं फल सम्पादितमानित्यर्थः । इयमाशङ्का दशा तेनापास्यते । तथाहि । यदा यशोदारोहिण्यादिसमक्ष र्त संकोचतः स्वयमाश्लेषाय करणेना यार्तानां व्रजसु दशीणामार्तिहरणार्थं बालभावव्याजेन तदुरस्सु विविधविहारान् करोति, तदैतासा रसरीत्यैव रसपूर्तिरार्तिहरण न भवति, अन्यासा तु विचित्रबालचेष्टावर्त्मानेन बाललीलारसानुभव एव भवति, एवमिहापि स्वामिनीना निजरसभावानुरूप एव रसानुभवो रमायास्तेनत्प्रसंगेन निजभावानुरूप एव स इत्यर्थ । तथा च दशा तद्वयमत्र ज्ञेयम् । यथार्भको रमे तथेत्येक, अपिमथापरः । साक्षि यास एव तथाविधो यथेति । अत्रावृत्तेनार्भकपदेन लौकिकः स उच्यते । द्वितीयो दशा त पूर्वोक्तप्रकारक एवेत्याचार्यैरन नोक्तः । एव सति रमाप्रवेशत एवात्र रमणयोग्यतेति कथि मन्येतेत्यस्वरुच्या पक्षान्तरमाहुः यद्वे यादि ।

कामार्दिताः शशाङ्कश्चेत्यत्र । एकस्मिन् वाक्य उक्तयावद्धर्मविशिष्टेन येन सम यस्योक्तस्यानुक्तस्योभयोर्वा समुच्चयस्तस्य तयोर्वा तावद्धर्मवत्त्वमावश्यकमिति
१० ३० १९ चन्द्रेपि कामार्दितत्व चकारेण बोध्यते । तत्रैतस्मि वाक्येऽनुक्तोऽकलङ्कश्चन्द्रो ष्यनेन समुच्चीयत इत्याहुः आनन्दमयोऽपीति । अग्रे लौकिकेन्दोर्निरूपणम् । उक्तसमुच्चितमर्थमाहुः चकारादित्यारभ्य तथा चन्द्रोऽपीत्यन्त । भगवति निवेशनार्थमित्यारभ्य जात इत्यन्तेनालौकिकस्येन्दोः कथनम् । अन्यथा तथा चन्द्रोपीत्यतिदेशेनैव कामार्दितत्व प्राप्तमेवेति पुनर्नोक्त स्यात् । अत्रैव निरूपणे नियामकमाहुः अनेनाग्र इत्यादिना । अत्रेदमाकूतम् । 'एव परिष्वङ्ग'इत्यादिना रसशास्त्रोक्तरीत्या रमणोक्त्या सहस्रवणादिकमपि प्राप्तमेव भवति, तस्य तावद्रूप त्वात्, पर तत्खण्डरूप भगवति स्वमुद्रया तत्रोपपादयितु शक्यत इति गोप्य गुच्च प्रकट न वक्तु शक्यमित्यनेन प्रकारेण शुकदेवैर्ज्ञापितमित्याचार्यैस्तथाऽग्रादि । सोमस्य रेतोरूपत्व श्रुतिसिद्धमिति नानुपपत्तिः काचिदत्रानिवर्तन इति दिक् । ननु स्वरूपस्य रसात्मकत्वेनैव सर्वमुपपत्स्यत इति किमेतत्प्रवेशेनेति चेत् । मैवम् । अस्य रेतोरूपत्वाचास्य चाध्यात्मिकरूपत्वेन स्वरूपान्तर्ग तत्वात्तेन रूपेण प्रवेशस्यावश्यकत्वात् । न च तस्य तत्रैव स्थितत्वेन साधाय इति वाच्यम्, प्रकारबोधनपरत्वादस्या लीलाया । अन्यथा तन्निरूपणमिय लीला न स्यादिति ।

आत्मारामोऽपि लीलये यत्र, चन्द्रप्रवेशादिति । तत्पादस्य भावपादत्वादिति भाव । अस्यामपि दशायामिति । प्रमाणसिद्धत्वेनोभयोरविरोधाभावादिति
१० ३० २० भाव । एतद्विद्वन्मण्डने प्रपञ्चितमस्माभि । वस्तुतस्तु लीला

स्वरूपात्मिकेति तन्मध्यपातिन्योपि तथैवेत्यात्मरमणमेवात्रापी याशयेनाहुः तत्रापि **आत्मरमण एवेति** । अत एवाग्रे वक्ष्यति 'गोपीनां तत्पतीनां चे'ति श्लोकम् । लीलापदध्वनितमर्थमाहुः **यथा मदानपी**त्यादिना । ईश्वरोऽपि सत्त्वाधिकप्राधान्येन स्वस्य गौणभावेन रेमे, तस्य रसस्य तथात्वादित्यर्थः ।

गोप्यः स्फुरद्इत्यत्र, **गाने हीति** । एवमत्र ज्ञेयम् । पूर्वश्लोकेन हि स्वाधी-
१० ३० ४२ नभर्तृकात्वमुक्तम्, अस्मिन्नपि कुण्डलकुन्तलगण्डशोभा प्रियकरकमलसम्पादितैव । अत एवास्या मानधारणे हेतुत्वम् । स्वनिष्ठत्वेन सहज रसस्य । एवं सत्युत्साहविशेषो यो गानजनकः स रजोगुणशब्देनोच्यते । तथा च पूर्वं मानेन दुःस्वयभूदिति तादृशत्वाभावाय गुणगानमिति । अत्रैव **मूलभूतगुणेति** । भगवच्चातुर्यकार्यमित्यर्थ । गानजः पुष्टो भावविशेषोऽलौकिकेष्टसाधकत्वेन पुष्पपदेनोच्यते ।

ताभिर्युत इत्यस्याभासे, **तुल्याभिरिति** । निर्दोषपूर्णगुणत्वेन भावैरानन्दा-
१० ३० २३ त्मकत्वेन च तुल्याभिरित्यर्थः । अत एव प्रतिषेक सम्पत्स्यते । रमण जलस्थलभेदेन द्विविधम् । तच्च पूर्णरात्रिसाध्यम् । तत्रैतस्य पूर्तावितरस्यारम्भ इति महारात्रसमय इत्युक्तम् ।

वैमानिकैरित्यस्याभासः । **ननु देवैरिति** । अविचार्येत्यर्थं बहुभिरेकदा कृतः
१०-३० २४ परिषेको लोके व्याकुलतासम्पादको दृष्ट इत्यत्रापि तथा सम्भावनयान्तरङ्गभक्तैः स्वामिनीषु शनैः परिषेकः कार्यो नैवमिति विज्ञप्ति कथं न कृतेत्यर्थ । अन्यस्य भक्तस्यापि तदा दर्शनं दुर्लभम्, परन्तु पूर्वं विमानशतसङ्कुलमित्युक्तमिति तत्स्थितानां दर्शनं सम्भाव्यते । तेषां तु प्रभुलीलोपयोगिमण्डपस्थितिलक्षणसम्बन्धेनैव जनितानन्देन भगवदिच्छया पुष्पवृष्टिस्तुतिरसाभिनिवेश एव भवति, न तु दर्शनमपीति भाव । यद्यपि दर्शनेपि तैर्न किञ्चिद्वक्तुं शक्यम्, भगवदतिरिक्तस्यैतासु वक्तुमनधिकारात्, तथापि यदन्यत्र दुःखदं दृष्टं तदेताभिः कृतं प्रभोरतिसुखदमिति ज्ञापयितुमाचार्यैराभासस्तथोक्तः । अत **एवात्र गजेन्द्रलील** इत्युक्तम् । अत एवोत्क्षिप्तजलप्रतीकारं उत्तानपाणिभ्यां सम्भवत्यपि प्रभुर्न करोति, प्रत्युत तदभिमुखत्वेन बाहू प्रसारयतीत्याशयेनाहुः **सर्वे देवा** इत्यादि । बाह्वोर्देवतारूपत्वेन तदवयवभूताङ्गुलीकरतलादीनामपि देवत्वमिति भाव. । अन्यथा **लोके** इति । भगवता निवारणे कृते स्वामिनीलक्षणे लोके तथा न भवेदित्यर्थः ।

यथा मदच्युदित्येतत्तात्पर्योक्तौ, ततः **अविचारेणेति** । पूर्वस्यां लीलायां
१० ३० २५ देशकालनायिकाविचारपूर्वकं रमणं कृतम्, तदनन्तरं न तथेत्यर्थः ।

प्रश्नतात्पर्यं तु लौकिक्यपि यदा दृष्टिरित्यत्र निरूपितम्।

प्रतीपमाचरदित्यत्र, धर्मो नष्ट इत्यादि। अधर्मनाशधर्मस्थापनतत्करण-
१०-३०-२८. तदुक्तिलक्षाणां पूर्वमुक्तानां प्रतीपा अर्था अनेनोक्ताः।

नैतत् समाचरेदित्यस्याभासः, ननु तेजीयसामपीत्यारभ्य न्यायादित्यन्तः।
१०-३०-३१. यद्यप्येतत्समाहितिर्नैतेन श्लोकेन भवति, तथाप्युत्तरार्धेऽन्यस्य कर्तुर्नाशोक्त्येश्वराणामनाशज्ञापनेन च समाहितिर्भविष्यतीत्याशयेनेदमप्युक्तमिति ज्ञेयम्। अन्तरङ्गैरेवेत्यग्रे वक्ष्यन्ति च।

इच्छयात्तवपुष इत्यत्र, वपुष्शब्दस्य वपुष्प्राकट्यपरत्वमित्याचार्याणामाशयः।
१०-३०-३५ [1](तत्रैवाग्रे यथान्नभेदेनेति। यावदस्यान्नेन देहः पोषितो भवति, तावत्तदीयत्वेन लोके व्यवह्रियते। पुनरन्यस्यान्नेन पोषितः स एव तावत्तदीयत्वेनापि व्यवह्रियते। एवमेकदेहस्यान्नभेदेन भेदव्यवहार इत्यर्थः।)

योन्तश्चरतीत्यत्र, वस्तुतस्तु नायमित्यादि। देहस्तत्तन्निषेधोऽत्र क्रियते।
१०-३०-३६. प्रभुस्तु स्वत एव पुमान्। अत एव श्रुतावेकस्मिन्नेव वाक्ये पुरुषं पुरुषविधमित्युक्तम्।

भजते तादृशीः क्रीडा इत्यत्र, तत्तद्धर्मप्रवेशेति। श्रोतॄणामिति शेषः।
१०-३०-३७. यल्लीलाश्रवणमेव भगवद्भावसाधकम्, तल्लीलामध्यपातिनां स्वरूपं किं वक्तव्यमिति भावः।

ब्रह्मरात्र इत्यत्र, वासुदेवपदतात्पर्यमाहुः यतो भगवानित्यादि। दिवा
१०-३०-३८. विप्रयोगजार्तौ सत्यां दिनान्ते प्रियसङ्गमे य आनन्दो, न स सदा दर्शन इति सोऽत्र मोक्षपदेनोच्यते।

श्रुतिसिद्धरसात्मत्व प्रकटीकृत्य मूर्तिके।
क्रीडन्मल्लोचने शश्वच्छिरसीशुरते प्रभुः ॥ १ ॥ इति त्रिंशोऽध्यायः।

अथैकत्रिंशाध्यायं विवृण्वन्त उक्तलीलानन्तरमन्यभजनं कुतुकादपि व्रजवा-
१०-३१-०. सिनामनुपपन्नमित्याशङ्क्य इदं प्रकरणं न सर्वथा पूर्वप्रकरणमध्यपातीति ज्ञापनाय पूर्वप्रकरणार्थमनूद्यैतदुक्तितात्पर्यमाहुः नामलीलात इत्यारभ्य हरिणैव तिरत्यन्तेन। नामलीलातो यो रसस्तदर्थमन्यभजननिवृत्तिपूर्वकमिदं प्रकरणमुच्यत इत्यर्थः। यथा रूपलीला स्वतन्त्रा, तथा नामलीलापीति ज्ञापनाय भिन्नारम्भेणैतत्प्रकरणारम्भः कार्यः। तत्रान्यभजननिवृत्तिपूर्वकं भगवन्माहात्म्यज्ञानमङ्गं तदर्थं तदाप्यते।

---

1. ( ) चिह्नान्तर्गतं श्रीहस्तलिखितपुस्तके नास्ति।

एवमुद्धृतभक्ता इति । इन्द्रभजननिवृत्तिपूर्वकमित्यर्थ । एतावान्पर विशेषो यद्रूपलीला-रसानुभवे वैष्णवधर्माणामपि त्यागोऽङ्गम् , नामलीलारसानुभवेऽन्यदेवताभजननिवृत्तिस्तथा, न तु विहिताना भगवद्धर्माणामपि । विधेरपि नामलीलामध्यपातित्वात् मर्यादापुष्टिभेदेन तस्या द्विविध ग मर्यादामिश्रपुष्टिमार्गीयाः पूर्वाध्याये कथ्यन्ते । शुद्धपुष्टिमार्गीया द्वितीये । मर्यादामार्गस्य सदोषत्वज्ञापनाय शङ्खचूडप्रसङ्गः ।

रजनीं तां महाभागा इत्यत्र, **अग्रिमानिष्ट**मिति । सर्वथा परिग्रहो भाग्ये महत्त्व तद्रूत्वादेतेषामन्यभजने दुःखसम्भव, उपेक्षाया तु सुखमेव
१० ३१ ४ भवेदिति भाव ।

स्वेन पाप्मनेत्यत्र, **पूर्वं ही**ति । ब्रह्मवृत्त्यपहारस्य सर्पयोनिफलकत्वादिति भावः ।
मपन्नोऽस्मि महायोगिन्नित्यत्र, **तत्र नैते पित्रादय** इत्यादि । सर्पत्वादीनाधि-
१० ३१ १६ कारित्वादेव कथनमिति ज्ञेयम् ।

तदात्मवैभवमित्यत्र, **यत्र क्रियाज्ञानादीना**मिति । तेषा प्रयोजनाभाव इत्यर्थः ।
कदाचिदथ गोविन्द इत्यत्र । **इयं हि लीले**त्यादि । तत्तत्काल एव
१० ३१ १९ कर्मविधानात्तामलीला कालप्रधाना । स चोपाधिरूपत्वेन स्वयंक्षयिष्णुरन्यानपि कालयति, दैत्याश्च तादृशा इति तदनुगुणः कालो भवतीति—कालप्रधाने मार्गे दैत्याना बाधकत्वमावश्यकम्, राजसे मार्गे तामसाना प्रभावस्योचितत्वाच्च । एव सति तन्निवारणे भगवन्माहात्म्येन जातेपि तत्र नामलीलारसस्यैव प्रयोजकत्वात्तु माहात्म्य नामलीलापर्यवसायित्वे भवतीयप्रजाय मणिदानेन ज्ञापयन् इत्यर्थ । अत एव प्रकृते शिवरात्रिरात्रिनिशासुखसमान-नायुक्तानि । तत्र बाधनिवारणस्यावश्यकत्वादाहुः **लौकिकालौकिके**ति । लौकिकं शङ्खचूडवधग्रणादि दर्शनमात्रेण ब्रह्मशापग्रहितस्यापि नाशोऽपूर्वरूपसम्पत्तिश्चालौकिकम् । ज्ञात एव । लौकिकैः प्रत्यक्षतया ज्ञात एवेत्यर्थः । विपरीते बाधकमाहुरन्यथेति । लौकिकालौकिकमाहात्म्याननुभवे पश्चश्रुतेर्यथाश्रुतार्थस्य प्रत्यक्षबाधितत्वेन तथोत्प्रेक्षापरत्व कल्प्येत । यथा यजमानस्य बर्हिर्मुष्टिरूपत्व प्रत्यक्षबाधितमिति यजमान. प्रस्तर इति वाक्य यागोपयोगित्वेन, उभयोस्तत्त्वेनोत्प्रेक्ष्यते यजमान इति कल्पयन्ति । वस्तुतस्तु लौकिकमानानुरोधेन वेदार्थबाधका भ्रान्ता एव । यतो लौकिक मानमलौकि-कार्थसमर्पणे न समर्थम्, अतो यथाश्रुतार्थ एव प्रामाण्य श्रुतेर्मन्तव्यमिति भावः । **क्रियाश-क्तिप्रधान** इति । इन्द्रत्वेन देवत्वस्येति भाव । **अनेन मध्यमाधिकारिणा**मिति । प्रमाणरूपत्वाद्देवपराणामपि युगपदङ्गीकारेणेति भावः । अत एवैतादृशानामधिकारिणामन-न्यत्वभङ्गोपि नेत्याहुः **अन्यथे**ति । आवेशाभाव इत्यर्थः । तेनैव तेषामङ्गीकारात तद्भङ्ग

इति भावः। अद्भुतविक्रम इत्यस्य तात्पर्यान्तरमाहुः केवलार्थपराणामिति। अत्रायमर्थः। अद्भुतं हि लौकिकोपपत्तिरहितं मनस उल्लासकं भवति। प्रकृते वेदरूपरामस्य विक्रमः क्रियाशक्तिफलरूपो विचित्र स्वर्गादिस्तन्निरूपकस्य वेदस्य श्रुतितात्पर्यविदुषां यथाश्रुतार्थपराणामुपयोग। वस्तुतस्तु स्वर्गशब्देन 'यन्न दुःखेन सम्भिन्न'मिति वाक्यादात्मसुखमेवोच्यत इति तत्त्वनिबन्धे विस्तृतं पितृचरणैरिति तात्पर्यविदन्यभजनराहित्येन प्रभुमेव भजेत्। तथा च केवलार्थपराणामित्यस्य यथाश्रुत्यर्थपराणामित्यर्थो वेदपक्षे। भगवत्पक्षे तु स्वप्रयोजनपराणाम, न तु निरुपधिभगवत्पराणामित्यर्थः। अत्र स्वरक्षा काममुखं च स्वप्रयोजनम्। एवं सत्यधिकारिभेदेन भजनभेदा फलभेदोपीति तदुपपत्त्यर्थमुभयरूपेण क्रीडतीति भाव। विपरीते बाधकमाहुः अन्यथेति। उभयरूपेणैतल्लीलाया अकरणे शङ्खचूडवधः स्त्रीणां स्वप्रयोजनसमर्पणं चेति कार्यद्वयमेकेनैव रूपेण न सम्भवतीति तद्रक्षार्थं रूपान्तरं प्रकटनीयं स्यादित्यर्थः। नामलीलायां शब्दप्राधान्य मत्वा पक्षान्तरमाहु वेदे वेति। यदि साधनरूपेण यथाश्रुतार्थपराणामर्थनिरूपणं फलरूपेण च तात्पर्यविदुषामितरनिराकरणं न कुर्यात्तदा 'हिंसायां यदि राग स्याद्यज्ञ एव न चोदने'ति वाक्या'त्तावत्कर्माणि कुर्वीत न निर्विद्येत यावता। मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायत' इति वाक्याच्च यागादिविधीनां 'पञ्च पञ्चनखा भक्ष्या' इति वाक्यस्य तदितरभक्षणनिषेधपरत्वनयागातिरिक्तकर्मनिषेधपरत्वमेव सिध्यति, न तु यागविधानपरत्वम्। अकरणे प्रत्यवायश्रवणादवश्यकर्तव्यताश्रयविधानपरत्व चैकस्यैव विधे स्वार्थपरत्वं स्वार्थातिरिक्तनिषेधपरत्वं चेति द्विगुणा वृत्तिः स्यादित्यर्थः।

विरजाम्बराविति, शुद्धा मायेत्यादि। वेदमार्गे हि द्विधा प्रवृत्तिः। कर्मजडत्वेनैका, भगवदिच्छा नान्या भगवत्परत्वेन चान्या। उभयत्रापि माया
१०-३१-२१. सहकारिणी। तत्र रजस्तमोयुक्ताऽऽद्ये। एतद्रहिता द्वितीय इति तयेति भाव।

उदितोडुपतारकमित्यत्र, प्रमाणं चन्द्र इत्यादि। अत्रायं भाव। अत्र हि रामप्रभ्वोर्लीलोच्यते। तौ च प्रमाणफलरूपौ। सामग्र्यपि तद्रूपैवोच्यते।
१०-३१-२२. तथा च रसप्रमापकत्वादिन्दुस्तथा। 'सुकृतां वा एतानि ज्योतींषि यन्नक्षत्राणी'ति श्रुतेः सुकृतफलानुभवसामग्रीतेजोरूपत्वादुडूना तदुदयोक्त्या फलोदयो ज्ञाप्यत इति। मत्तालिजुष्टमित्यत्र, षट्पदत्वादिति। गत्यर्थशब्दानां ज्ञानार्थत्वाज्ज्ञानसाधनषट्कवत्त्वमत्र सूच्यते। तानि दर्शनस्पार्शवेति सर्वत्रम्।

मणिमादाय भास्वरमित्यत्र, मणिग्रहणेन मणिगता देवतेति। गृहीतेति शेषः। तदधिष्ठानं विना भास्वरग्रामाद्यथा विशेषणं न वदेदिति भावः।
१०-३१-३२ ताः कामयतीति पक्ष इति। वक्ष इति शेषः। उपभोगायान्या अपि कामयन

इति ज्ञापनाय बहुवचनम् । नन्वेवं चेद्देवताया एव ग्रहणमुचितम्, न तु मणेरपीत्यत आहुः तत्रैवेति । मणिनियामकस्वलक्षणाधिकाररूप देवताया हि भगवद्दत्तम् । तच्च तत्रैव स्थिताया भवति । तथा च तत्रैव मणावेव स्थिता या देवता वं भजते तस्या अपीत्यर्थः । यत्किञ्चित्करोतीति । यन्मार्गसम्बन्धि यत् करोति तत् तन्मार्गाधिष्ठातरि तथेत्यर्थः । प्रकृते प्रमाणमार्गसम्बन्धिकर्मकमण्याहरण कृतवानिति तथेति भावः । तर्हि सर्वमूलत्वाद्भगवतस्तत्रैवास्य स्थापनमुचितम् । प्रभुकरस्थत्वस्य मुक्त्यमानत्थानुपपन्न इत्याशङ्क्याहुः प्रमाणबलमेवेति । [इत्येकत्रिंशोऽध्यायः ॥]

द्वात्रिंशाध्यायार्थोक्तौ, द्वात्रिंशेऽन्तरित्यादि । यद्यप्यानन्द सर्वत्रैवा-

१० ३२ ० न्तरेवानुभूयते, तथापि बाह्यरमण शरीरचेष्टयोरेव प्राधान्यात्स्वरूपस्य मूर्तत्वेन तदात्मकानन्दस्यापि तथात्वाच्छरीरेन्द्रियादिष्वपि स्वरूपत स्थापितस्य मनसाऽनुभवो भवति । प्रकृते त्वन्तःसङ्गेन प्रकटेनानन्देन शरीरेन्द्रियादिषु बाह्यरमणेनेव धर्मो भवतीत्यभिप्रेत्यान्तरित्युक्तम् । स्वानन्द पूरयामास इतीर्यत इति सम्बन्धः । ननु धर्मिस्वरूपविरहजदुःखनिवारण धर्मरूपेण गुणगानेन कथ सम्भाव्यते । तत्रापि स्वरूपेणैवानन्दपूरण चेत्यत आहुः येनेवेति । यथा स्वरूप पूर्णानन्दात्मकम्, तथा नामलीलापीति सर्वमुपपद्यत इत्यर्थः । यद्वा । येन स्वरूपलक्षणेन हेतुना पूर्वं तथा कृत-वांस्तेनैवान्तःस्थितेनैवोद्रेकेण मुखकमलद्वारा निर्गतेनाधुनापि तथा कृतवानित्यर्थः । एतदेव विवृतमन्तःप्रविष्ट इत्यादिना । यद्वा । यथा यथा स्वविषयिका भक्तानामार्तिं पश्यति भगवांस्तथा तथा मुदितो भवतीति वस्तुस्थितिः दिवा विरहार्तिपूर्णानां साय मिलने यो रसो भगवत स न दिवा सङ्गमे सतीति च येनैव स्वानन्देन स्वय पूर्णानन्दो ज्ञातो भक्तैस्तादृश त पूरयामासेत्यर्थः । यद्यपि गुणगान भावस्वभावादेव भवति, न तु प्रयोजनानुसन्धानेन, तथापि पूर्वभावस्थैर्यमप्यनेन भवतीत्याहुः अन्तःप्रविष्ट इत्यनेन । पूर्वं या नादद्वारा सुधा प्रविष्टा भावा भक्तमनसदात्मिका 'र प्रा वेणोरधरसुधया पूरय'न्नित्यत्र निरूपिता सा पूर्वोक्तप्रकारैर्बहि फलानुभवपर्यन्तैः क्रमेण पुष्टा सती स्वविषयरूप स्वपोषक बहि सम्बन्धमलभमाना तदर्थं स्वय गुणगानरूपेण प्रकटाप्यलब्धविषया सती स्वप्राकट्यात्पूर्वमन्त साक्षात्प्रियप्राकट्यात्पुनस्तत्रैव स्वस्यायासा च श्रोत्रद्वारा प्रविष्टा तत्र स्वविषय पोषक प्राप्य सुस्थिरा जाता । तदेतदुक्तमन्तःप्रविष्ट इत्यादिना । युगलश्लोकैर्गाने हेतुमाहुः शब्दार्थयोरिति । पूर्वं नादमात्रमनुभूतमिति नादप्राधान्येन 'अक्षण्वता'मित्यादिना गीतम्, अधुना स्वरूपानुभवोऽपि साक्षाद्वृत्त इत्युभयोरपि महारसरूपत्वज्ञापनाय द्वाभ्या कथनमुभयोरप्येकरूपत्वमिति ज्ञापनायैकवाक्यता चेत्यर्थः । सङ्ख्यातात्पर्यमाहुः सर्वेष्विति ।

निरूप्यते यत इति शेषः। अत्र हि वर्षे वर्षे यावती लीला प्रभुः करोति, तावती सर्वा लीला क्रमेण स्वामिनीभिर्गीता, न त्वेतावन्मात्रेति ज्ञापनाय पूर्णवर्षस्य द्वादशमासात्मकत्वात् माससमानसङ्ख्याका युग्माः श्लोका उच्यन्त इत्याहुः अतोऽत्रेति। किञ्च। उपक्रमोपसंहाराभ्यां चैकं युग्मं भवति, तेनाधिमासेपि यत्करोति तदपि स्वामिनीभिर्गीयत इति ज्ञाप्यत इत्याशयेनाहुः आद्यन्त इति। समाहारोऽत्र। तत्र प्रतिपाद्यं रूपमाहुः सक्रम इति।

गोप्य कृष्ण इत्यत्र, केवलपदादिति। गात्रजयोषितामितिवदपकर्षज्ञापक-
१० ३१ १ धर्मानुक्तिपूर्वकं शुद्धमात्रज्ञापकगोपीपदाद् रासमण्डलमध्यस्था एवोच्यन्ते, न तु पूर्वाध्यायोक्ता इत्यर्थः।

अन्ययुग्मद्वयतात्पर्योक्तौ जानाति भगवानेवेति। ततः पुस्त्वेनि। त्रिविधेष्विति
१० ३२ २ शेषः। लतानां तरमध्यपातित्वेन पुस्त्वेन गणना कृता। वलितभ्रुरित्यस्याभासे, मानुषभावादिति। मानुषभावमनतिक्रम्य लीलां करोतीति तथोक्तम्।

मुकुन्दतात्पर्योक्तौ वेणुनादेनेति। परोक्षवादोऽत्र कृतो, विवक्षितार्थस्य गोप्यत्वात्।
१० ३२ ३ शुद्धिर्भगवद्भावायभावराहित्यम्, मोक्षो भजनानन्दानुभवः।

हन्त चित्रमित्यत्र, सोमोत्पत्तौ निर्णय इति। तत्राणारास्याया सोमस्य दिवा स्थितिस्थानमुक्तम्। 'त्रिमुहूर्तं वसेदर्के त्रिमुहूर्तं जले वसेत्। त्रिमुहूर्तं वसेद्गोषु
१० ३२ ४ त्रिमुहूर्तं वनस्पता'विति। एवं सति दिनस्य द्वादशमुहूर्तात्मकत्वात्प्रतिमुहूर्तं या या लीला प्रभुः करोति, सा सा लीलाऽत्र गीयत इति सङ्ख्यया ज्ञापितं भवति। लीलासहितो भगवान् हृदि प्रकट इति यदा या लीला प्रियः करोति, तदैव सैव लीला स्वामिनीहृदयेषु स्फुरतीति मानुपपत्तिः काचित्। हारहास इत्यत्र, कमलमुक्ताहारतुल्यत्वे चित्रता नास्तीति यथा रत्नैरित्युक्तम्। अधरप्रभाभिररुणत्व दन्तानां सहजम्। हासविभागस्थैर्यसूचितमर्थमाहुः अनेनेति। भगवत्स्नेहेन सर्वात्मना मायापगमः प्रमाणबलम्। तत्स्थैर्यकृत्या तु तन्निराकरणं भवति। एवं सति स्नेहमायाकार्ययोः सहभावकरणेन भगवत्स्नेहवतोऽपि जगतो व्रजीयनीत्ररूपस्य प्रपञ्चे विषयरूपे तथात्वं तयेत्यर्थः। इदमप्येकं चित्रम्। एतादृशस्य सूचितस्यार्थस्योक्तौ हन्तेति खेदोक्तिबीजम्, भगवति रागवतामन्यत्रापि रागदर्शनं भक्तानां खेदोपपत्तेरावश्यकत्वात्। अन्यथा तु स्नेहेन सर्वत्यागे तैः सह लोके लीला न स्यादिति तथा कृतिरिति भावः। लोके नैव हासः सम्भवतीत्यत्राप्यसम्भावना मा भवत्विति प्रमाणमुक्तं श्रुतार्थापत्तिरित्यादिना।

अग्रिमपद्येप्येवमेव ज्ञेयम् । अचिरस्थायित्वधर्मसाम्येन विद्युत्पदेन धन लक्ष्यते । यद्वा । हारवद्भगवदुरस्येन हासस्थित्या विभागस्थैर्यसूचिता या प्रपञ्चविषयिण्यासक्तिस्तामपि स्वविषयिणीमेव करोति । एव सति प्रपञ्चे प्रपञ्चविषयको यो मोहस्तस्य स्वविषयकत्वेन जनकत्वं स्थिरीकृतं स्वस्मिन्निति टीकार्थं सम्पद्यते । स्वमात्रविषयकासक्तिजनकत्वं लोकेऽप्यप्रसिद्धमिति चित्रतात्र । एवमेवाग्रेपि ज्ञेयम् । अस्मिन्पक्षे हन्तेति हर्षे । अत्र न कस्यापि बल प्रभवतीति ज्ञापनाय सम्बोधनम् । विशेषणयोर्मुख्यार्थोऽतिगोप्य इति पितृचरणैर्न लिखित । अत एव स्वामिनीभिरपि गूढार्थज्ञानार्थं सावधानतया श्रोतव्य-मित्याशयेनेदं श्रृणुतेत्युक्तम् । अस्माभिरप्यत एव न लिख्यते । तदनुग्रहवता स्वत एव तत्स्फूर्तेः, अन्येषा तज्ज्ञानस्यानुचितत्वात् । भगवन्मात्रस्नेहवतोऽन्यधर्मनिवृत्तिः स्वाभाविकीति प्रमाणबलनिरास ।

कर्हिचित् सबल आलीत्यत्र, गोप्यतयायमर्थ इति । एतेन कर्हिचिदेव सबलः, कर्हिचिदेव गावै सहित इत्यपि सम्बन्धो ज्ञाप्यते । तेन सदैकान्ते
१० ३२-६ भोक्तैवेति स इत्यनेनोच्यते । मुकुन्द इत्यत्र, दर्शनसुखमात्रं मोक्ष, स्वरूपरसज्ञानं स्वरसस्थापनमिति ज्ञेयम् ।

वनचर इत्यत्र, सात्विकभावापन्न इति । वृन्दावनस्य रसोद्दीपकत्वेन स्तम्भादिसात्विकभावहेतुत्वात्तदुक्त इत्यर्थ । आदिपुरुषस्य तद्रहितत्वेन
१० ३२ ८ श्रवणात्तस्माद् भेदेन वर्णनमुचितमिति भावः । वनलतास्तरव इत्यत्र, पञ्चधर्मयुक्ता इति । 'पश्यतैतान्महाभागा'नित्यादिनोक्ताश्चत्वारो भगवदीयत्व चैकमिति तथा ।

१० ३२ ११ पद्येत्यस्याभासे, ज्ञानरूपे चेति । आत्मन्येव प्रसत्वेन ज्ञात इत्यर्थः ।

विदधत्मतपत्रमित्यस्याभासे, किन्तु राज्यमपीति । सरभीकृतगोविन्दाभिषे-
१० ३२ १३ कनदस्यापि स्वाधिपतित्वेनैव वरणमिति तथोक्तम् ।

स्वरजातीरनयदित्यत्र, नूतनत्वेनेति । यद्यपि स्वरजातिप्रापकत्वमेव मूल उच्यते, निजदीक्षा इति विशेषणेनापूर्वत्वं च प्राप्यते, न तु नूतनो-
१० ३२-१४ त्पत्ति, तथाप्य यज्ञानमपेदयेदमुक्तमिति ज्ञेयम्, अतो नादब्रह्म नित्यमिति पूर्वग्रन्थाविरोधोऽपि ।

स्ववञ्चितचित्ता इत्यत्र, इदानीमेवोपयोग इत्यादिना प्रतीतिप्रकारकथनम् । उपयोगो नायिकावदुपभोग इति यावत् । वेणुनादस्यैतादृगनुभावो यदेतासामप्येवं
१०-३२-१९ भावस्तत्रान्यासा का वार्तेति भाव ।

वत्सलो व्रजगवामित्यत्र, गावो मुच्येरनिति । एकैकेक्षणादिलीलारसस्य
१० ३२ २२ निरवधिमहारसत्वेनैकत्र निमग्ना नात्मानमपि जानीयुः, किमुतान्यदित्यर्थः ।

मदविघूर्णितेत्यत्र, रजोगुणो मुख्य इति उद्दीप्तो रसभाव इत्यर्थं, तस्मिन् सत्येव
१० ३२ २४ तत्करणात् । मदविघूर्णितेत्यत्र मदोऽत्रेत्यारभ्योक्तमित्य तम् । पूर्वानुभूत विविधनायिकाविविधविलासस्मृतिधाराजनितान दमन्दोहानुभवः पूर्णावबोध इयुच्यते । स चेतरविस्मारक इति मदरूपः । सोऽधुना भवतीनामिव ममापि भवतीसम्बन्धस्मृत्यैव वनेऽपि मोद, न त्वन्यनायिकाविषयिण्या क्रिययापीति ज्ञापयितु ज्ञानप्रापकनयनयोरेव मदः प्रदर्श्यते । ज्ञानमपि भवतीमात्रविषयकम् , न त्वन्यविषयकमपीति ज्ञापयितु विघूर्णितत्वम् । तादृग्बहि प्रसरद्रूप न भवतीति तथा । प्रचुरप्रेमवतीना तत्रापि दिवा क्लिष्टाना प्रियदर्शने तत्रैवात्मप्रवेशः स्यादिति तदभावायैषदेव मान ददाति यावता पृथक् स्थितिर्भवतीत्याशयेनाहु स्वरूपस्थित्यर्थमित्यादि । यद्वा । इयदवधि पृथक्स्थित इति ज्ञानेन माने सम्भवत्यपि ज्ञापितार्थज्ञानेनैषदेव मानो भवतीति तथा । अथवा । उक्तज्ञापनेनेषदपि मान यतीत्यर्थ । यद्वा । प्रचुररसभाव एव मदस्तेन तथेति पूर्ववत् । यद्यप्ये तादृशस्य स्वप्रियाभ्य पूर्णमेव सम्मानन कर्तव्यं भवति, तथापि मध्येमार्गम येपि पश्यन्तीति तेषामनुचितत्वज्ञान यावता न भवति, तावदेव दत्तवानितीषन्मानद । अत्र हेतुः कीर्तिमत्त्वमेव, अन्यथा तु लोका अन्यथा वदेयुरित्याशयेनोक्त वनमालीति । ईषत्त्वे हेतुमाहु त्रिष्वपीति । त्रिष्वपि पक्षेष्वित्यर्थ । ते स माननमानमानखण्डनरूपाः । रूपेणाश्वस्ताना स्मितेक्षणादिना य आश्वासः स स्वल्प एव कार्यः सम्माननस्य । पृथक्स्वरूपस्थितिमात्र मानस्य । पूर्णमानवतीनामशेषमानखण्डने सति प्रचुरप्रेमवत्त्वेन लोकाद्यनुरोधाभावत्वात्तदेव स्वानुरूप सर्वं कुर्यु । अतस्तत्खण्डन तावदेव यावता तदा लोकविगीत न भवति । बदरपाण्डुवदनमित्यत्र, ईषन्मानदत्वादिति । अग्रे पूर्णमानप्रद इति तस्माद्विशेष इत्यर्थं । मृदुगण्डमित्यत्र, मृदुत्व भोगार्थमिति । रसविशेषानुभवार्थमित्यर्थ । तदुक्त 'अनङ्कुरितकूर्चक श्रृतसितोपलाढ्य पयस्ततोङ्कुरितकूर्चक सलवणाम्बु [1]तक्र पयः । तत पलितकूर्चकः क्वथितगुग्गुलूद्वेगकृद् भवति हरिणीदृशा सततमेव[2] भावात्मय' इति ।

यामिनीपतिरिवैष इत्यत्र, नन्वहर्पतिरपीति । चन्द्रदृष्टान्तेन दिवा सुखदान न
प्राप्यते, तस्यातथात्वात् । भगवांस्तु दिवापि सुख ददातीति कथमय दृष्टान्तो
१० ३२ २५ युज्यत इत्यर्थः । अङ्गीकृत्योत्तरमाहु सर्वालङ्कारेति । सर्वामामलङ्कारभूतो

---

१ 'तक्र पय ' इति मूलपाठ । तक्रोपम ' शोधितपाठ ।
२ सततमेवेति मूलपाठ । प्रियतमेषु' इति शोधितपठ ।

वृन्दमध्ये तिष्ठति यस्ता विहाय स्थातुमशक्तः परस्परगुणानुवादश्रवणतद्भावानुभवजनितानन्दसमुद्रलहरीभिरार्द्रो रसपोषायाप्रकट इव दिवा यः स एव इत्यनेन प्रदर्श्यते । इतोऽप्यानन्दपोष इति ज्ञायते । यथान्यासां लीलानां परिज्ञानं भावबलात्, तथा स्थितेरपि । परन्तु कादाचित्कमिदं ज्ञानम्, अन्यथा गानरस एव न स्यात् । तथा च दिवा निकट एवाप्रकटः सन्मुखयति प्रकारान्तरेण । दिनान्ते तु प्रकटः सन् दूरादेव चन्द्र इव तापनाशकः । यामिनीपतिपदाद्यथाग्रे यामिनीं पूर्णां साक्षाद्भुङ्क्ते सः, तथा प्रियोऽप्यस्मान् भोक्ष्यतीति ज्ञाप्यते । **मोचयन् व्रजगवामित्यत्र, गवां चेति** । सद्यःप्रसूतानामिति शेषः । यद्वा । यथा रात्रिजं विरहजं तापं दिवा स्वरूपनादादिभिर्गवां मोचयति, तथा व्रजस्थिताः सर्वं तदेकनाथत्वेन तदेकपोष्यत्वेन तदधीनप्राणादिधर्मत्वेन, यथा तद्देहप्राणादिरक्षार्थं दिवा ता वने नीयन्ते, तथा तदर्थं निशीति च गाव इवेति गोपदेन स्वामिन्य एवोच्यन्ते ॥

पितृपादाब्जकृपया निरोधविवृतिर्मया । स्फुटीकृता यथाशक्ति भक्तानां तुष्टये हरेः ॥१॥
अनेनैव प्रकारेण निरोधविवृतौ बुधैः । छेत्तव्यः संशय इति तं प्रदर्श्योपरम्यते ॥२॥
न हि व्रजवधूपदाम्बुजपरागरागं विना मनागपि विचारणे भवति शक्तिरस्यास्ततः
मया चिरविचारहृद्गततदीयतात्पर्यमाश्रितेन लिखितं सदा गिरिधरेशपादाम्बुजम् ॥३॥
संशयपङ्ककलंकितहृदया गोविन्दविहृतिविवृतौ ये । ते श्रीविठ्ठलवाणीपाथोभिर्निर्मलाः सन्तु ॥४॥

इति श्रीगोपीजनवल्लभचरणैकतानश्रीविठ्ठलेश्वरदीक्षितविरचितो दशमस्कन्धप्रकरणद्वयविवृतिप्रकाशः समाप्तः ॥

श्रीगोपीजनवल्लभाय नमः ।

भ्रमरगीताध्यायटिप्पणी

श्रीमद्विट्ठलेश्वरप्रकटिता ।

श्रीकृष्णः शरणं मम ।

विविधापराधकृत्क्षमाक्षमांस्तातचरणयुगरेणून् ।
नत्वा तत्तात्पर्यं प्रकटीकुर्मो यथाशक्ति ॥ १ ॥
तत्पादरजसागत्य यादृग्भावः कुतो मम ।
तादृशेनैव तद्भावं वर्णयाम्यवशः क्वचित् ॥ २ ॥

ननु व्रजसीमन्तिनीनां 'ता मन्मनस्का' इत्यादिवाक्यैः प्रभुणा स्तुतानां ज्ञानोपदेशो निरोधविरोधी, तयोः सहानवस्थाननियमात् । एवं सत्यस्याध्यायस्यैतत्स्कन्धा-
१०-४४-०. प्रवेशश्च स्यात् । 'तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः । न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहे'ति भगवद्वाक्यादत्युच्चावस्थां प्रापितानां नीचावस्थाप्रापणमयुक्तं चेत्याशङ्कानिरासमध्यायार्थोक्त्यैव कुर्वन्ति चतुश्चत्वारिंशेऽध्याय इति । अस्मिन्नध्याये निरोधमेवाहेति संबन्धः । उद्देश्यत्वेन ज्ञानोक्त्यव्यवच्छेदायैवकारः । 'तं वीक्ष्ये'त्युपक्रमेण 'भक्त्युद्रेकं व्रजौकसा'मित्युपसंहारेण च स्नेहस्यैवोक्तिः सम्यक्त्वम् । पूर्वमहर्निशं पूर्णो भगवद्भावो निरूपितः । अधुना तु यथा प्रियेण समं स्वसंबन्धव्यवच्छेदकोपस्थितावार्त्यतिशयोऽनिर्वचनीयो भवति लौकिकानामपि, तथा तादृग्ज्ञानोपदेशश्रवणेनातितप्ततैलपतितजलबिन्दुसदृशेनात्युत्कटभावो वर्ण्यत इति पूर्वस्माद्विशेषः । ननूपदेशस्य न भावजनकत्वम्, किन्तु स्थितस्यैव प्राकट्ये हेतुत्वं । एवं सत्येतदुक्तिर्व्यर्थेयत आहुः **याते कृष्ण** इति । अन्यथेति शेषः । हृदि सर्वदा प्राकट्यान्नैकट्याभावो बाधित इत्यत उक्तं **लोकरीत्येति** । देहलीदीपवल्लोकरीत्येत्युभयत्र संबध्यते । तथा सति लोकरीत्यैव याते, वस्तुतस्तु व्रज एव सदा प्रकट इत्यर्थः । लोकवन्नैकट्याभाव पूर्वमपीति स्फुटमित्युक्तम् । यद्येतत्कथनं न स्यात्तदा गृहे प्राकट्यागमेपि फलाक्षेपदर्शनात् सर्वेषां भक्तानां तथा मतिः स्यात्, तदभावार्थमेतत्कथनमावश्यकमित्यर्थः । ननु ज्ञानोपदेशश्रवणेनापि सा मतिर्भवित्र्येवेत्यत आहुः **सेवकेनेति** । ता उक्तप्रकारैर्निरुद्धा एव । तत्र हेतवः **सेवकेने**त्यादिनोच्यन्ते । यदि ज्ञानमार्गे प्रवेशयेद्, ज्ञानमार्गीयेणैवोपदेशं कारयेत् । सेवकेन कृत्वोपदेशं यत्कारितवांस्तेन भक्तिमार्ग एव प्रवेशोऽभिमतो, नेतरस्मिन्नित्यर्थः । किञ्च । एताः पूर्वं प्रयोजनवशान्न निरुद्धाः । तथा सति प्रयोजने जाते निरोधो

गच्छेत् । किन्तु 'शुद्धभावप्रसादितः' 'प्रीतः प्रोवाच सस्मितम्' 'माऽसूयितु नार्हथ तत्प्रियं प्रियाः । न पारयेह'मित्यादिवाक्यै भगवतो व्रजसीमन्तिनीविषयिणी या प्रीतिस्तयैव ता निरुद्धाः, अतः कथमन्यथा कुर्यात् । अतो ज्ञानेन उपदेशजनितज्ञानेनापीत्यर्थः । तत्र प्रकारमाहुः आत्मत्वेनेति । नहि स्वात्मनः स्वेन सम वियोगः स्वविस्मृति स्वाहिताचरण वा संभवत्यतस्तथाभूतासु किं समाधेयमस्तीति स्वस्मिन्नसाधारणनिरवधिस्नेह प्रियस्य ज्ञातवत्य इति पूर्वस्मादतिविलक्षणः स्नेहभाव उपन्नः । अत एव मूले प्रियतमपदमुक्तमेवं प्रियतमादिष्टमिति । अथवा । सेवकेनेत्यादिना भगवतः कायवाङ्मनोभिस्तन्निरोध उच्यते । सेवकः कायरूप, उपदेशो वाग्रूपः, प्रीतिर्मानसी । अत उपदेशजेनात्मत्वेन ज्ञानेनापि प्रियस्वरूपपरत्वमेवासाम्, न तु ज्ञानिनामिव स्वास्थ्यम्, अन्यथा 'कृष्णाविशात्मविक्लव'मिति न वदेत् । तथा चैतावत्पर्यन्तं स्वसत्ताज्ञानमपि स्थितम्, अतः परं तु तामपि न ज्ञास्यन्तीति पूर्वस्मादधिको निरोधः सेत्स्यतीत्यर्थः । अत एव सर्वथेतिपदम् । एवं भक्तिमार्गविरोधं परिहृत्य ज्ञानोपदेशस्यावश्यकतामाहुः वस्तुत इति । 'विज्ञाय सदेशहर'मितिवाक्यात् स्वार्थमेवागत इति निश्चयेन मानोत्पत्तिरिति निश्चयस्यापि दोषत्वम् । भगवदीयत्वनिश्चयाभाव उपालम्भासंभवादिति भावः ।

चतुश्चत्वारिंशाध्यायविवरणे स्वामिनीमात्रेषु दोषशब्दप्रयोगस्यायमाशयः । लोके ह्यन्यावस्थाहेतुर्दोषो भवति, विरहभावस्य च तथात्वं प्रसिद्धमेव । यथातिप्रचुरे दोषे तीक्ष्णौषधदान विषनाशौविषदंशश्च कार्यते मर्मस्थानेषु, तेन वहिःसंवेदनं तत्कालीनमरणनिवृत्तिश्च, ततो विविधरसैः शनैः शनैः सर्वात्मना दोषापगमे स्वाभाविकजीवनहेतुत्वप्रदानम्, तेन च सर्वात्मना स्वास्थ्यम्, तथात्राप्यत्यन्तप्राणबाधाया हि प्रिये दोषारोपः । स चाचिरादेवान्त्यावस्थाज्ञापको भवति, अतस्तं दृष्ट्वा तन्निवृत्त्यर्थमेवोक्तरूपसदृशोपदेशं दत्वा स्वयं प्रियभिषजा प्रेषित इत्युद्धवस्तादृश त दत्तवान् । तदा बाह्यानुसन्धानमभूत् । अत एव 'तत्संदेशागतस्मृती'रितिवचनम् । 'ततस्ताः कृष्णसंदेशैर्व्यपेतविरहज्वरा'इति ज्वरपदप्रयोगश्च । भगवतोऽत्रैव तात्पर्यमित्येतदेव फलत्वेनानूद्यते, न तु ज्ञानमार्गीय ज्ञानम्, अन्यथान्ते 'कृष्णाविशात्मविक्लव'मिति न वदेत् । तर्हि ज्ञानोपदेशस्य कोपयोग इति चेत् । उच्यते । यथा योगिनो वपुर्योगसंस्कारसंस्कृत सन्नाग्न्याद्युपहत भवति, तथा भगवानात्मेति महापुरुषोपदेशेन ज्ञानात्मसंस्कारे संपन्ने विरहेऽन्यावस्था भवितुं न शक्नोतीति तत्रैवोपयोग इति । अत्रागतस्मृति वे 'विरहज्वरराहित्ये च हेतुः संदेशे प्रियसंबन्धि वचनमेव, न तु नात्रार्थोऽयमिति ज्ञानम् । अन्यथोपदेशपदमेव वदेदुभयत्र, न तु संदेशपदम् । किञ्च । ज्ञानोपदेशलक्षणसंदेशो युक्तरूप एव ।

तत्रोपक्रमे 'श्रूयतां प्रियसंदेश' इति संदेश एकत्वमेवोक्तम् । 'कृष्णसंदेशै'रिति बहुत्वं पश्चादुच्यते । एवं च सति ज्ञानोपदेशस्य स्मृतावुपयोगो विविधान्तरङ्गवार्तानां तज्ज्वरापगम इति मन्तव्यम् । अत एव भगवतापि 'मत्संदेशै'रिति बहुत्वमुक्तं संदेशेषु । विप्रयोगे प्रियसंदेशस्यापि तत्तुल्यत्वभानेन तदा स्वास्थ्यस्य रसशास्त्रसिद्धत्वादपि । अपरञ्च । स्मृतिर्हि पूर्वानुभूतस्य, पूर्वमनुभवश्च निर्दोषपूर्णगुणस्य भगवत । मध्ये विरहस्वाभाव्याद्दोषारोपक्षणे व्यभिचारिभावे जाते यथा पैत्तिकादिज्वरभरेण दोषवशात् प्रलापे सत्यञ्जनादिना प्रकृत्यनुसंधानेन प्रलापनिवृत्ति, न तु ज्वरस्यापि, तथोपदेशसंदेशेन विरहभरनिवृत्त्या पूर्वोक्तव्यभिचारिभावनिवृत्ति, न तु विरहस्यापीति । अत्र वयं त्वेवं मन्महे । पूर्वमुपक्रमे दुःखमेवोक्तम्, तत उपदेश, तदनन्तरमपि 'हे नाथे'त्यन्तेन ग्रन्थेन क्लेशो निरूपित । ततो विविधसंदेशैर्विरहतापनिवृत्तिर्भगवत्यात्मत्वेन ज्ञानं चोक्तम् । ततोन्ते 'दृष्ट्वा स्त्रीणां भगवति कृष्णावेशात्मविक्लव'मिति सर्वदानुवर्तमानः क्लेश उक्त । एवं सत्युपक्रमोपसंहाराभ्यां विरहभाव एव दृढो निरूपितो भवति । मध्ये यद् 'ज्ञात्वात्मानमधोक्षज'मित्युक्तम्, तत्तु 'असावहं' 'कृष्णोहं' 'पश्यत गति'मितिवत्कादाचित्क एव भाव उक्त इत्युपसंहारानुरोधान्मन्तव्यम् ।

नन्वेवं सत्युद्धवप्रेषणं किंप्रयोजनकम्, उक्तभावस्य सार्वदिकत्वादिति चेत् । अत्रोच्यते । उद्धवे हि प्रभोः परमा कृपा, अतः पूर्णो भगवद्भावो यादृशोस्ति, तादृशोत्र देयः । स च व्रजसुन्दरीष्वेव सिद्ध । पुंस्यत्वसंभावितश्च । अतो मद्भाव एतादृश इत्युद्धवाय प्रदर्शनमेकं प्रयोजनम् । ततस्तद्दर्शनेन सततं तद्भावनया प्रियसंदेशहारकत्वेन तासामत्यनुग्रहेण चोद्धवेपि तज्जातीयभावोत्पत्त्यर्थमिति द्वितीयं प्रयोजनम् । विप्रयोगे प्रियसंदेशागमनेन यः कश्चन संतोष. स नान्यदा नान्यथा चेति तृतीयम् । 'मद्वियोगाधि'मितिवचनान्मध्ये मध्ये यदैव प्रियेणैवमेवं संदेशः प्रेषित आसीदिति स्मरिष्यन्ति, तदा च पूर्वविलक्षणो भावो भविष्यतीति तुरीयम् । ज्ञानाद् भक्तिरधिका, यतस्तदुपदेशेपि भक्त्यैव तदुपमर्दो, न तु तेन भक्तेरिति निदर्शनार्थमपीति पञ्चमम् । अत एवैकादशे भगवद्वचनं 'न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहे'ति । पित्रोः प्रीतिजननमुक्तमेव । भगवतः स्वामिनीनां चान्योन्यसंदेशैरन्योन्यं ये भावा जायन्ते, तेऽनन्ता एवेत्यनन्तान्येव प्रयोजनानीति दिक् ।

प्रकरणार्थमाहुः बीजमिति । वक्ष्यमाणस्तोत्रादौ बीजं स्नेहः । स पूर्वं निरूप्यते । स्तोत्रोपदेशयोरनन्तरं दोषस्य प्रिये दोषारोपस्य मानस्य च निवृत्तिः, तया च पूर्वस्नेहोक्तिः । ततो ज्ञानस्य फलं प्रिये निर्दोषपूर्णगुणत्वज्ञानं स्वस्मिन्नलम्पटत्वज्ञानं च । तत उद्धववाक्यैः कृतार्थत्वम ।

१० ४९ १ मानाद्दोषद्वयमिति । उपालम्भो भ्रमर याञ्चा च । दोषापत्तिश्चेति द्वयम् ।

जानीमस्त्वामित्यादिवाक्यप्रतिपाद्या अत्र यत तर त्स्याश्चिदेव तामसतामस्या

१० ४४ ४ इति । अ युत्कटभक्तिमार्गीयभावत्त्वेन ज्ञानमार्गीयज्ञानोदयसभावनारहिताया
इत्यर्थ । सत्त्वरजस्तमांसि प्राकृतेभ्यो भिन्नानि भगवद्धर्मरूपाणि सतीति पूर्वमेव बहुधोक्तम् । समि युपसर्गसूचितमर्थमाहु तत्रापीति । भूषणान्निसर्गसप्रयुक्त आगत इति । भर्तरि अपि कुशल जायते तत्रापि तथ यर्थ । एव कथने गूढाभिमभिमुद्घाटयन्ति अन्यथेति । स्वयमापन्नमस्तोऽ यानुपक्षेत चेत्, न दोषः स्यात, सर्वतः कुशली स्वयम यान् दु खिताश्चेदुपेक्षेत, तदा स दोषायैव स्यात् , प्रकृत स्वापेक्षाकरणा-त्तथात्वमिति भाव । दु खिता अपि तदीयत्वमम यमानाश्चेत्, तदा तदुपेक्षा न दोषाय स्यात्, न तु तद्विपरीतानामपी याशयेन स्वस्य केवलतदीयत्वमाहुः भर्त्रेति पदेन । विवाहिता हि भर्ता भवति । अत्र तदभावेपि स्वस्य केवलतदीयत्व वक्तु तथोक्तम् । किञ्च । न पातत्वमात्रम् किन्तु भरणकर्तृत्वमपि, एतादृशश्चेदुपेक्षते तदा तासा जीवनमेव न भवतीति भाव ।

पुभि स्त्रीषु कृते यत्र विवाहिता पुमास स्त्रियश्च नेया । अत एव विरागे

१० ४४ ६ श्रु युक्त यागोक्ति । स्नेहमेव कुर्वन्तीति । न स्वपराधेपि क्रोधानुवृत्तिरिति
भाव । अथवा । कुर्वन्त्येवेति सर्व था ज्ञेयः ।

तत्र सात्त्विकादिभावेष्विति । आद्यो दश तो राजससात्त्विक । ततो राज-

१० ४४ ८ सराजस । ततस्तामसतामस । ततस्तामसराजस । ततो निर्गुण । तत
सात्त्विकराजस । ततस्तामससात्त्विक । तत सात्त्विकसात्त्विक । तत
सात्त्विकतामस । ततो राजसतामस इति दश ।

मधुप कितवेत्यस्याभासे, प्रथम तामसतामसीति । अत्रेदमाकूतम् । विप्रयोगे

१० ४४ १२ प्रलपदे यादिवद्दोषारोपोपि व्यभिचारिभाव एव । तथा सति रसात्मकत्वा
विशेषेप्य युग्मभावो यतो भगवद्धर्मरूपो रसात्मक प्रमाणादिसर्वबलनिरासको युग्म-स्तामसत्वेनोपचर्यमाणो य स एव हेतुरिति वाच्यम् । भावाना मिथ उपमर्द्योपमर्दकभावस्तु 'रजस्तमश्चाभिभूय सत्त्व भवति भारत । रज सत्त्व तमश्चैव तम सत्त्व रजस्तथे'ति प्रभुवाक्या सत्त्वादीना यथा, तथैवेति तत्त्वमुपचारेणो यते । एव सति रसात्मकप्रभुधर्म त्वाविर्भवती यारोपो दोषत्वायेमिति न वक्तु शक्यम् । भगवदितरास्मरणात्, स्मर्यमाणस्य तस्य स न वक्तु शक्य । इत एव नानुभूयमानस्य, प्रभुस्वरूपे तद्धर्मेषु वा दोष वाभावात् । ज्ञानवत् आ मस्फूर्तिश्चावश्यकी । एवं सति तदा

तदभावाद्दोषत्वेनैव प्रभुधर्मेषु ज्ञानादुच्यमानधर्मात्मकत्वमेव स्वामिन्यास्तदा सपत्नमिति तामसतामसीत्युक्तम्। श्रीमदुद्धवानामपि स्वामिन्या एतादृगवस्थादर्शनेन प्रभुरतादृशार्त्ता कथं न मिलतीति भावो दोषारोप इव जात इत्यपि ज्ञापनार्थैव स्वरूपत्वमेवोक्तम्, एतादृश्याः स्वामिन्या हृद्यागमननैतद्भावोदयात्। उपचारोयमित्यरुच्या पक्षान्तरमाहुः तद्भावयुक्ता चेति।

मधुप कितवेत्यत्र, मतान्तरमाद्येयमित्यादि। अत्रायमाशयः। शुद्धपुष्टि मार्गीयभक्तानां ज्ञानमार्गबोधनं भक्तिमार्गविरुद्धतमम्, अतो न समाधिभाषायामस्य प्रवेशो वक्तुं शक्यः। वर्ण्यते चात्युत्कृष्टो रसात्मकः स्नेहभाव। स एव हि परमपुरुषार्थरूपः। तद्विघातकश्च स। यद्यपि ज्ञानस्य स्यात् येणात्रानुद्देश्यत्वम्, किन्तु प्रिये दोषारोपमात्र निवर्तकत्वेन, तथापि तदारोपस्यापि रसात्मकत्वाद् व्यभिचारिभावत्वेनास्थिरत्वाच्च न सर्वथा ज्ञानस्योपयोग। न ह्येतावत्पर्यन्त साधिते निरोधे काचिन्न्यूनतास्ति, येन ज्ञानमुपयुज्येत। तस्मात् सुष्ठूक्त मतान्तरे यादि। कथने तूपपत्तिरियमेव। यत्संगमस्तदा तिर्वा पुरुषार्थ इतिशास्त्रार्थ। एवं सति विप्रलम्भे प्रिये दोषस्फूर्तौ स्वदुःखदत्वज्ञान हेतु। तथा सति स्वसुखदत्वेनोत्तमत्व प्रियत्वं च सिध्यति, न तु स्वरूपतः। तथा सति स्नेहस्य निरुपधित्वं भज्येतेति तत्समाधानायात्मत्वेन बोधनम्। तथा सति भगवदैतासामेतासु च भगवतः सहजः स्नेहः गर्वितो भवति, दुःखदत्वासम्भवश्च। यथा स्वाधिष्ठितं देहं पीडायत्तु जीवात्मा नो सहते, तथा स्वाधिष्ठितं जीवात्मानं भगवानियुक्त भवति। अत एव श्रुतिराह 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वा'मिति। तथा च विप्रयोगे तल्लाभ', संयोगे बहिरिति तदा तदा तत्तद्धर्मा, स्नेहवशादाविर्भवति। तावपि स्नेहजनितावेव, अन्यथा सर्वेषां तौ स्याताम्। तथा च स्नेहस्यैव दोष स्फूर्तिहेतुत्वं पर्यवस्यतीति निर्दोषत्वं प्रिये भाति। इदं तु मर्यादारीत्योच्यते। वस्तुतस्त्व त्युत्कटस्नेहेनैव दोष स्फुरति, सोपि भगवद्भाव एवेति न भ्रमरूपो, न वा दोषरूप। रसात्मकभगवत्स्वरूपमेतादृशमेवेति नाधिकं विचारणीयमत्रास्ति। अन्यथा रसाभाव (रसाभास?) एव सिध्यतीति न प्रतिभाति। ज्ञानात् भक्तेराधिक्यमप्यनेन ज्ञाप्यते।

समाधिभाषायामिति, तत्र हि माहात्म्यज्ञानस्नेहौ कचिद् व्यस्तौ कचित् समस्तौ न निरूप्येते। प्रकृते तु 'काचिन्मधुकर'मित्यादिना प्रस्तुता कथा न तादृशीत्यस्याः कथायाः समाधिभाषात्वं तद्विरुद्धार्थकत्वं च विरुद्धमिति कस्यचिद् भाति, विहितस्नेहाभावेन भक्तिमार्गविरोधश्च तथा, स बोध्यते विरोधोत्र नास्तीति। तत्र मतान्तरभाषात्व कामशास्त्रानुरोधित्वं चेति हेतुद्वयम्। अत्रेदं ज्ञेयम्। मर्यादामार्गीमतात् पुष्टिमार्गीय

तत् मतान्तरमित्युच्यते । समाधौ तु व्यासैर्द्विविधोपि भक्तिमार्गो दृष्टः, 'अनर्थोपशमं साक्षाद् भक्तियोग'मिति वाक्यात् । तदर्थस्तु 'अनर्थोपशमं भक्तियोग'मिति पदेन साधनरूप उच्यते, 'साक्षाद् भक्तियोग'मिति पदेन फलरूपः । 'अजानतो लोकस्य' आद्यः । 'समाधौ दृष्ट्वा स्वयं विद्वा'निति द्वितीयमपि तमुक्तवान् व्रजसीमन्तिनीषु । अयं पुष्टिमार्गीय इति मतान्तररूपः । एतादृशेषु ज्ञानोक्तिरपि तथा । कामशास्त्रानुसारेणैव पूर्वं स्वरूपानन्द दत्तवानित्यधुनापि तथैवोच्यत इति न कोपि विरोधः । तथाचेयं समाधिभाषैव । तथाचात्र समाधिभाषायां सत्यां भक्तिमार्गे च सत्युक्तौ या न विरोध इत्यर्थः ।

कालस्य दूतत्वमुपपादयन्ति **कालद्वारा** हीत्यादिना । तत्तत्काले तथा तथा भगवत्पूजाध्यानस्तोत्रादेर्विहितत्वेन स स काल एव भगवत्प्रापकः, तदभावे तदकरणादिति भाव ।

प्रियसखे यत्र, प्रथमपर्यायादित्यादि । 'काचिन्मधुकरं दृष्ट्वे'त्यादिनोक्तः प्रथमः पर्यायः

१०.४७.२२. तदेतद्दर्शनेन यादृशी बुद्धिर्जनिता तस्याः सकाशादन्यथा प्रकारान्तरेण बुद्धिमधुना जनयतीत्यागमनमपि तथैव संभावयतीत्यर्थः । कालपक्षे अर्थसंगतिमाहुः **हेमन्ते तासा**मित्यादिना । पूर्वं वसन्तेऽनागमनमुक्तम् । तथा च 'पुनरागा' इति पदात्तस्यैवाधुनाप्यागमनं वक्तुमुचितम्, न तु हेमन्तस्येति शङ्कां निरस्यन्ति **तासां साधनोपक्रम** इत्यादिना । अत्रेदमाकूतम् । पूर्वोक्तस्तु नेष्टसाधकत्वेन प्रतीतः, अधुना प्रतीयमानस्त्विष्टसाधकत्वेन प्रतीयते, तादृशश्च हेमन्त एव । व्रते कालस्याप्यङ्गत्वात्तेन तत्त्वमुच्यते । तथा च व्रततत्फलदानसमये पूर्वमागत आसीः, अधुना किं पुनरागा इष्टं साधयितुमित्यर्थं पर्यवस्यति । किञ्च । चैत्रादिकस्य संवत्सरस्य नवमो मासो, हेमन्तस्य प्रथमो मासो मार्गशीर्षो भवति । उक्तिश्चेयं नवमीति स एव तद्व्यापारविषयीक्रियते । गतस्य तस्यैवावृत्तिरसंभावितेतिशङ्काभावायाहुः **पुनर्दण्डकलितव**दिति । यथा गतोपि पुरुषः पुरुषान्तरेण दण्डेन प्रेरितः पुनरावर्तते, कुलालचक्रप्रादेशो वा, तथा पुनरस्मदिष्टं सिषाधयिषुस्त्वां प्रेषितवानित्यर्थः । कालो हि सर्वनियामकः, तस्यान्यदोषवेनागमनमसंभावितमित्यत आहुः **सात्त्विक** इति । दोषाभावज्ञापनपूर्वकप्रियत्वादिज्ञानानुगुणत्वेन तथा । भक्त्यनुगुणत्वेन गुणातीतो वेत्यर्थः । प्रेषितो हि प्रेषकवाक्यमङ्गीकृत्यागत्य तदुक्तं वचनं निवेदयति । प्रकृते कालस्तादृश इति तस्मिंस्तद्धर्मानाहुस्तदीयेत्यादिना । कालपक्षे स्वस्य श्रुतिरूपत्वान्मन्त्रदेवतारूपत्वम् । तत्तत्काले कृतं पूजनादिकं मन्त्राधिष्ठातृदेवताद्वारेणैव फलितं भवतीति **वरये**त्युक्तमित्यर्थः । **विभज्यैवे**ति । शक्तीनां भगवद्धर्मत्वेन तत्स्वरूपाश्रितत्वेपि पृथक्कार्यकरणार्थं तथेत्यर्थः ।

सान्त्वयन् प्रियसंदेशैरित्यत्र, तत्रापि प्रियसंदेशेनैव, न तु स्वत इति । अत्रायमाशयः । एतादृशेना सान्त्वनं प्रभुप्रादुर्भावं विना तद्वाक्या-
१० ४४ २२ नामप्यशक्यम्, किं पुनर्मम, तच्चावश्यकम्, तत्र स्नेहस्यैवाय सहजो धर्मो यतत्संबन्धिन्यपि तत्त्वेनैव भानम् । तेन शब्दार्थस्यानभिप्रेतत्वेपि प्रियसंबन्धित्वेन शब्दाज्ञानेनैव तच्छ्रवणेनापाततः सान्त्वनं भविष्यतीति ज्ञात्वा श्रीमदुद्धवैर्विवक्षित मुक्तमितिज्ञापनाय प्रियपदमुक्तमिति । अत एवोपक्रमोपसंहारयोरपि 'श्रूयतां प्रियसंदेश' इति, 'तत्संदेशागतस्मृती'रित्येवोक्तम्, न तूपदेशपदम् । वस्तुतस्तु संदेशोप्येतादृशीषु न वक्तुं शक्यः, तथापि प्रभोराज्ञा तथेति तत्पालनार्थमुक्तमित्याहुराज्ञा चेत्यादि । स्वरूपातिरिक्तस्य सान्त्वनहेतोः स्वस्याज्ञानेप्याज्ञानुभावेनैव सान्त्वनं भविष्यति, नो चेत्प्रभुः कथं वदेदिति हृदि कृत्वा वदन्तीति भावः । एतदवस्थादर्शने तादृग्वाक्यश्रवणेपि यदेतेषां वाक्प्रसवः स तु 'मत्संदेशैर्विमोचये'त्याज्ञानुभावेन, न तु स्वसामर्थ्येनेति ज्ञेयम् । वस्तुतस्त्ववश्यभाव्यसामर्थ्ये प्रेषणवैयर्थ्यं ज्ञात्वा स्वसामर्थ्यमेव वरमिव दत्तवान् 'मत्संदेशैर्विमोचये'ति वचनेनेति प्रतिजानीमः ।

अहो यूयमित्यादेराभासे, तासां स्वाभाविक इत्यादि । षड्भिः स्तोत्रकरणे तात्पर्यमुच्यते । स्त्रीत्वादिस्तत्स्वभावश्च भगवद्गुणकृत एवेति । 'ता मन्मनस्का'
१० ४४ २३ इति भगवद्वाक्याच्च तद्धर्मा भगवद्धर्मा एवेति निर्दोषगुणरूपा एवेति ज्ञापयितुमैश्वर्यादिगुणसंख्यासमानसंख्याकैः श्लोकैः स्तवनमित्यर्थः । भगवद्गुणैरन्तःस्थितभगवत्स्वरूपा इति तद्धर्मा एव वागादिरूपेणाविर्भवन्तीति तथेत्यर्थः । साधारण्यार्थाविति । कतिपयानामेव न पूर्णार्थत्वम्, किं तु सर्वासाम् । लोका अपि न तथा किन्तु सर्व इत्यर्थः । तेषामिति । लोकानामित्यर्थः ।

भवतीनां वियोग इत्यत्र, जीवब्रह्मणोस्तु भेदेऽज्ञानमेव हेतुरित्यादि । अत्रेदं प्रतिभाति । 'एतावानस्य महिमा अतो ज्यायांश्च पूरुष' इत्यादिश्रुतिभ्यो
१० ४८ २९ 'यस्मात्क्षरमतीतोह'मित्यादिवाक्यैश्च प्रपञ्चातीतत्वं पुरुषोत्तमस्य निर्विवादम् । 'एतावानस्य महिमा' 'सर्वं खल्विदं ब्रह्मे'त्यादिश्रुतिभ्यः प्रपञ्चस्य विभूतिरूपत्वात्मकत्वम्, एवं पुरुषोत्तमलीलापदार्थानां पुरुषोत्तमात्मकत्वमेव, पुरुषोत्तमस्य तदतीतत्वं चोपपद्यते । 'ते ते धामानि'त्यादिवाक्यानि न तु पूर्वमध्यपातित्वमिति मन्तव्यम्, अन्यथा 'ते ते धामान्युश्मसी'त्यादावृक्षु 'विष्णोः परमं पद'मिति न वदेत्, 'विष्णोः कर्माणि पश्यत' 'तद्विष्णोः परमं पद'मित्यादि च । एवं सति सर्वस्यापि लीलापदार्थस्यात्मरूपेण सह भवतीनां वियोगो न संभवति । न हि स्वेन साकं वियोगः संभवति । एतदेव मूले सर्वात्मनेति पदेनोक्तम् । सर्वात्मना

सर्वथेत्यर्थः । तथा च तत्तद्देशकालज्ञानक्रियानन्तःकरणादेरातृणस्तम्बस्य नित्यत्वेन श्रीरासोत्सवस्वनृत्यप्रभुबाहुगृहीतकण्ठानि स्वस्वरूपाणि पूर्वमनुभूतान्यधुनापि वर्तमानैस्तैः साकमेतद्वस्थापन्नानामपि स्वानामभेदज्ञापनं पूर्वोक्तानामनिर्वचनीयनिरवध्यानन्दात्मकत्वा-त्तथात्वमेवाधुनापि स्वस्मिन्भातं भवतीति स्वास्थ्यं भवति । सयन्यस्य कादाचित्कत्वेन तस्य च मर्वोपमर्दित्वेन न सर्वात्मना स्वास्थ्यसंभावना, तथान्यस्य प्रियसंगमरूपत्वेन निरवध्यानन्दरूपत्वेन भवतितरां तथात्वम्, येन तत्सामयिकोत्कटदुःखनिवृत्त्या किञ्चित्कालं सस्मितस्वामिनीमुखाब्जदर्शनेन स्वागमनमार्थक्यज्ञानेन स्वस्यापि दुःखनिवृत्तिः । एवं सति भवतीनां मे वियोगो, मम च भवतीनां वियोगः, सर्वात्मना सर्वात्मरूपेण वर्तमानस्य मम न संभवतीत्यर्थं संपद्यते । अयमेवार्थोऽग्रे व्यक्तीकृतो **यथा भूतानी-**त्यादिना । आश्रयकरणकर्मणामभेदथोक्त आत्मन्येवेत्यादिना । सृष्टिः स्वरूपस्थितिहेतुः, सोऽत्र प्रभुसंगम एव । हननं वियोगकरणम, सर्वतिरोधायकत्वात् । तदपि रसार्थमेवेत्यनु पश्चात्पालये स्वरूपानन्ददानेन । अत एवान्ते पालनमुक्तम् । अत्र हेतून् क्रमेणाह आत्मेत्यादिना । आत्मानुभावे सृजे, तदपि माया योगमायान्तरद्वा लीलोपयोगिनी तदनुभावेन मानं सति हन्मि, तेन सर्वतिरोधाने भूतेन्द्रियगुणस्वरूपेण पुनराविर्भूयानु-पालये । ननु देहाद्यध्यासवानात्मा प्रतीयत इति कथं भगवदात्मकत्वमिति चेत्तत्राह **आत्मा ज्ञानमय इति** । ज्ञानप्रचुर इत्यर्थः । लीलासंबन्धिदेहानामपि तदात्मकत्वात्तत्राहमिति ज्ञानं वास्तवमेव, न त्वविद्याकृतम्, यतः **शुद्धो**ऽविद्यासंबन्धरहितः । अत्र हेतुर्व्यतिरिक्तः प्रापञ्चि-केभ्यो जीवेभ्य इति शेषः । तत्र हेतुर्गुणाश्रय इति । पुरुषोत्तमगुणाश्रयत्वात्तथा । न हि प्राकृतेषु लीलां स्वयं करोतीति भावः । स्वापाद्यवस्थावत्त्वेनापि प्राकृतत्वं न शङ्कनीयम् । यतः सुषुप्त्यादयो लीलोपयोगिन्या मायया संपादिता या वृत्तयस्ताभिः स संबध्यते । 'लोकवत्तु लीलाकैवल्य' मितिन्यायेन लोकमध्ये क्रियमाणा लोकसमानाकारा चेन्न भवेत्, तदा लीलारसो न भवेत् । अत एव व्यासैरपि लोकसमानाकारत्वम्, न तु लोकमध्यपातित्वमिति ज्ञापनाय 'लोकव' दित्युक्तम् । ननु लीलाविषयिणी कस्यापि नैवं प्रतीतिर्दृश्यत इत्याशङ्क्य प्रतिबन्धकवशान्नैवं प्रतीतिर्लोकस्य, तदपगमे सा भवतीत्याशयेनाह **येने**ति । सर्वतो मनसो निवृत्तौ केवलभगवत्परत्वे तथैव प्रतिपद्यते जानातीत्यर्थः । नन्वेवं सति शास्त्रानेकत्वं कथ-मित्याशङ्क्य साधनप्रकारभेदत एव तद्भेदः, न तु तत्र फलभेदोऽप्यस्तीत्याह **एतदन्त इति** । नन्वेवं सति विशेषाभावात् संनिकर्ष एव कुतो न साध्यते, दुःखहेतुर्विप्रकर्षः किमर्थं इत्याशङ्-कायां तत्तात्पर्यमाह **यथे**त्यादिना । अत्रेदमाकूतम् । पूर्वमनुभावितो यो भजनानन्दः स तु ब्रह्मानन्दतः शास्त्रीयभक्त्यानन्दतश्च कोटिगुणाधिकोऽनिर्वचनीयश्च भवति । तथा च संनिकर्षे

त्वग्रिमाग्रिमनूतननूतनरसाकाङ्क्षा तदनुकूलो यत्नश्च भवति, न तु पूर्वानुभूतलीलास्वरूपतत्स्पर्शः कदापि। विप्रकर्षे तु मनआदीनां बहिःस्वविषयालाभेऽन्तर्विद्यमानमेव तं गृह्णन्ति, तदा यथा बहिः प्रकटात्प्रियाद्रसानुभवः पूर्वमासीत्तथान्तःप्रकटात्प्रियात् पूर्वस्मादपि विलक्षणो रसोऽनुभूतो भवति, यः संगमेपि दुरापः। अतो महारसदानार्थमेवैवंकरणम्। एतदेवोक्तं मदनुध्यानकाम्ययेतिपदेन, यथेत्यादिना च। संगमे मदुपयोगित्वेन देहादिस्फूर्तिरप्यस्ति, द्वितीये तु सापि नास्तीत्यपि रसाधिक्यम्। एतदेवोक्तं विमुक्ताशेषवृत्तीति विशेषणेन। एतेन रसानुभवे नैरन्तर्यमुक्तं भवति। बहिरनुसन्धाने तु तदेव बहिः साक्षात्संबन्धात्मकं फलं शीघ्रमेव साधयति। अतस्तथैव भविष्यतीत्याह अचिरादित्यादिना। एतासां त्वधुनैव बहिःसंगमोऽभिलषितः, तदभावादस्मदनभिप्रेतामप्यस्मदधिकारविरुद्धामपि ज्ञात्वेश्वरभावेनाज्ञापितवान्, अनभिप्रेतमपि बलाद् ग्राहयितुमिति यनाकर्णनीयमिदं भवति यद्यपि, तथापि प्रियतमसम्बन्धीत्याकर्णनमावश्यकमिति तथा। एताभिः प्रियसंबन्धित्वेनैव श्रुतत्वात्तथैव फलिष्यति, न तूपदेशत्वेनेतिज्ञापनायाग्रे संदेशपदम्। एतेनैव 'ननु वयमिव भगवानपि पूर्वमस्मद्वियोगासहिष्णुरनुभूतः, अधुना तं कथं सहत' इत्याशङ्का निरस्ता। भगवदुक्तिप्वाज्ञात्वमेव प्रतीतम्, न तु प्रीतिवचनत्वम्। सा त्वीश्वरभावेनैव भवतीत्यैश्वर्यमेवाधुना स्वस्मिन् जानाति, ईशितव्यतामेवास्मासु जानातीति युक्तमनागमनम्। न चैवं भक्तिमार्गविरोध इति वाच्यम्, 'स्वागतं व' इत्यादिवचनवत्पूर्वतिरोधानवदस्यापि रसविशेषानुभावकत्वात्। एवमेव प्रभावपि ज्ञेयमिति दिक्। मतान्तरभाष्येयमित्याचार्यवर्यैः पूर्वमेवोक्तमिति नाधिकं शङ्कनीयं समाधेयं वास्त्यत्र। परन्तु 'यन्मायया दुर्जयया मुह्यन्ति ज्ञानकाशये'ति वाक्याज्ज्ञानस्य मोहरूपत्वाद्धर्मिमात्रपराणामन्येन मोहासम्भवात् तस्य फलत्वेन मोहकत्वासंभवान्न भगवद्भावच्युति' कदापि भविष्यतीति सर्वं सुस्थम्। अत एव 'ज्ञानिनामपि वाक्येन न भक्तं मोहयिष्यती'त्याचार्यवचनमस्मत्सर्वस्वपालकमस्तीत्यतिनिश्चिन्ता वयम्।

ईश्वरस्य कृतौ वाचि पूर्वपक्षसमाहितौ।
ब्रह्मादीनामप्यशक्ये तथापि स्वस्य सर्वथा॥ १॥
तदीयत्वबशाद्वाग्यच्चोदितं किञ्चित्कथयामि तत्।
क्षमन्तां तातचरणास्तेनैवाशेषमुत्तमम्॥ २॥
यो बीजावापमारभ्य फलपाकावधि स्वयम्।
पोषितस्तं व्रजतरुं नाथो नापि जिहासति॥ ३॥

इति श्रीमद्विट्ठलेश्वरविरचितभ्रमरगीताध्यायटिप्पणी।

परिशिष्टम् ।

: १ :

श्रीहरिः । [1]नम इति । श्रीकृष्णस्य ये पादाब्जे तयोस्तले तत्र यदङ्किते कुङ्कुमपङ्के तयोः रुचे नमः । श्रीकृष्णपदेन भक्तसहितलीलारसाविष्टत्वं सूचितम् । तादृशस्य चरणयोरब्जवोधया लीलाया परस्परसम्बन्धेन उभयोस्तापहारकत्वं सुखदत्वं च ज्ञापितम् । किञ्च । अब्जं विकसितं भवति । अत्रापि तत्तत्सम्बन्धादिषु तत्तथैव भवति । अब्जे अरुणत्वं भवति सहजमपि विशेषतः कुङ्कुमपङ्केन तादृशम् । पद्मिनीनां तलमप्यारक्तं भवति । शृङ्गारादिषु कुङ्कुमपङ्केन रञ्जितमपि क्रियते । अत एव रुचे नम इत्युक्तम्, न तु पङ्काय, तदभावादिति । कृता ते सर्वोत्कृष्टत्वज्ञापनाय नमनमेवोक्तम् । तदेवाहुः यदरुणमिति । मदीयं हृदयाम्बुजं यत्सम्बन्धेन शश्वदारक्तं जातम् । निरन्तरं तत्कान्तेः स्थितया तदात्मकतया तादृशमेव जातमिति भावः । यद्वा । अत्र प्रभुचरणसरोजतलसम्बन्धि कुङ्कुमपङ्कमुक्तम् । तन्नायिकानामेव सम्भवति, न तु नायकस्येति कथमुपपद्यत इति चेत् । तत्रोच्यते । श्रीकृष्णपदेन गूढभावात्मकत्वम् । तेन तद्भावात्मकस्य विरचितप्रियावेषोचितसकलशृङ्गारस्य प्रभोश्चरणतलमपि तेन रञ्जितं क्रियत इति तत्स्मृत्या तथोक्तम् । प्रियायास्तु पूर्वं तादृशमेवेत्युभयोश्चरणतलस्यारुणत्वमुक्तम् । अत एव पङ्कयोरिति द्विवचनं चोक्तम् । अन्यथा पङ्कस्यैकरूपत्वात्कथमेवं वदेयुः । तयोः रुचे नम इति । तत्तलशोभां दृष्ट्वा प्रणयभरेणातुरतया रसेन नमनम् । अन्यथा चरणं विहाय रुचे नम इति कथमुक्तं स्यात् । किञ्च । यत्सम्बन्धेन मामकं हृदयाम्बुजं सततमरुणं जातम् । रसात्मकतत्सम्बन्धेन हृदयमपि तल्लीलारसात्मकं जातम् । तादृशलीलासमये प्रियासहितप्रभुचरणतलं स्वकरतलेन यदा लालितं क्रियते, तदा तच्छोभादर्शनेन परमरसावेशेन तदात्मकतया तच्चरणतलं हृदये स्थाप्यते । तदा तदा तद्धृदयं पूर्वमप्यम्बुजत्वेन सरसं तथापि तदानीन्तनप्रचुरभावेनान्तर्लीलारसभरेण पुष्टं विशेषतो जातमिति तथोक्तम् । अत एव तादृग्लीलाविवरणमभूत् । सर्वदा तल्लीलात्मकमेव तिष्ठतीति शश्वदित्युक्तम् । किञ्च । यथा रविसम्बन्धेन कमलं विकसितं भवति, तथा तदरुणकान्तिसम्बन्धेनैतद्धृदयाम्बुजमपि

---

१. चाचाश्रीगोपेशानां स्यादिति प्रतिभाति ।

विकसितम् । पुनस्तस्य तद्रसात्मकतया तद्रूपत्वमेव जातमिति तथोक्तम् । किञ्च । यथा प्रियमिलने तदात्मकतया प्रियरूपत्वं भवति, तथा तत्स्यारुणत्वे तत्सम्बन्धेन हृदयस्याप्यरुणत्वं युक्तमित्यारक्तादिपदानि विहायारुणपदोपादानादवगम्यते ॥ १ ॥

: २ :

